CC0. In Public Domain, Digitizagtion by eGangotri

युगवीर समन्तभद्र-ग्रन्थमाला-१२

5.5

मंगलायतनम्

•

लेखक
विहारी लाल शर्मा
प्राध्यापक, रणवीर संस्कृत-विद्यालय
(काशी हिन्दू विश्व-विद्यालय)
वाराणसी (उत्तर-प्रदेश)

•

वीर-सेवा-मन्दिर-ट्रस्ट प्रकाशन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुहृद्वर आ. पं. रतिनाथ जी झा को
सादर सप्रेम

द- लो. नारायण झा
मंत्री
31. 1. 76

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युगवीर-समन्तभद्र-ग्रन्थमाला -१२

मंगलायतनम्

लेखक
बिहारीलाल शर्मा
कलादर्शनाध्यापक, श्रीरणवीर-संस्कृत-विद्यालय
काशी हिन्दू विश्वविद्यालय
वाराणसी

वीर-सेवा-मन्दिर-ट्रस्ट प्रकाशन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशक

मंत्री, वीर-सेवा-मन्दिर-ट्रस्ट

●

ट्रस्ट-संस्थापक

आचार्य जुगलकिशोर मुख्तार 'युगवीर'

●

प्राप्तिस्थान

डॉ० दरबारीलाल कोठिया

मंत्री, वीर-सेवा-मन्दिर-ट्रस्ट

चमेली कुटीर, १।१२८ डुमरांव कॉलोनी,

अस्सी, वाराणसी—५ (भारत)

●

प्रथम संस्करण : ५००

महावीर-निर्वाण-रजत-शती

(दीपावली)

वी० नि० सं० २५०२

३ नवम्बर, १९७५

मूल्य : आठ रुपए

●

मुद्रक

शिवनारायण उपाध्याय

नया संसार प्रेस, भदैनी, वाराणसी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशककी ओरसे

यह वर्ष भगवान् महावीरका मङ्गल रजत-शती वर्ष है, जो सारे राष्ट्रमें और राष्ट्रके बाहर कई देशोंमें मनाया जा रहा है। इस प्रसङ्गसे अनेक जन-कल्याणी कार्य सम्पन्न हुए और हो रहे हैं। अनेक महत्त्वपूर्ण ग्रन्थोंका प्रकाशन इस रजत-शती वर्षकी महान् उपलब्धि है। अखिल भारतवर्षीय दिगम्बर जैन विद्वत्परिषद् द्वारा प्रकाशित स्वर्गीय डॉक्टर नेमिचन्द्रजी शास्त्री ज्योतिषाचार्य-रचित 'तीर्थङ्कर महावीर और उनकी आचार्यपरम्परा' नामक अद्भुत ग्रन्थ, जो चार भागोंमें है और दो हजार एकसौ बत्तीस पृष्ठोंमें है, इस मङ्गलमय वर्षकी अद्वितीय उपलब्धि है। वीर-सेवा-मन्दिर-ट्रस्टने भी इस पुण्य प्रसङ्गपर लगभग सात महत्त्वके ग्रन्थोंका प्रकाशन किया है और आठवाँ यह है।

दो वर्ष पूर्व हमारे मनमें एक भव्य विचार आया कि भगवान् महावीरका जीवन-चरित प्राकृत, अपभ्रंश और संस्कृत भाषाओंमें पद्य-काव्यके रूपमें अनेक आचार्यों-लेखकोंने लिखा है तथा वे शतशः उपलब्ध हैं। किन्तु बाणकी कादम्बरी, वादीभसिंहकी गद्यचिन्तामणि, दण्डीके दशकुमारचरित आदि संस्कृत-गद्य-रचनाओं-की तरह तीर्थङ्कर महावीरका किसी लेखकने जीवन-चरित संस्कृत-गद्यमें लिखा हो, ऐसा ज्ञात नहीं है और न वह उपलब्ध है। अतः संस्कृत-गद्यके माध्यमसे भी भगवानका एक सुन्दर एवं सर्वोदयी जीवन-चरित लिखा जाना चाहिए। हमें प्रसन्नता है कि प्रस्तुत कृति 'मङ्गलायतनम्' उसी पुण्य विचारका एक सुपरिणाम है।

इसके रचयिता श्री पण्डित बिहारीलाल शर्मा साहित्याचार्य, एम० ए०, चक्रवर्ती, संस्कृत-प्राध्यापक श्रीरणवीर संस्कृत-विद्यालय (काशी हिन्दू विश्वविद्यालय) वाराणसी हैं। ये उन दिनों स्याद्वाद-महाविद्यालयमें साहित्याध्यापक थे। ज्ञान-रुचिसम्पन्न एवं मेधावी तरुण विद्वान् हैं। हम इन्हें सन् १९६२ से जानते हैं, जब ये काशी हिन्दू विश्वविद्यालयके प्राच्यविद्या-धर्मविज्ञान संकाय (संस्कृत महा-विद्यालय) में साहित्य-विभागके छात्र थे और हम जैन-बौद्धदर्शनके क्रमशः प्राध्यापक एवं रीडर। स्याद्वाद-महाविद्यालयमें इनकी नियुक्ति हो जानेपर इनकी ज्ञानरुचि और मेधाको परखकर इनसे संस्कृत-गद्यमें महावीर-चरित लिखनेकी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हमने प्रेरणा की। इन्होंने बड़ी नम्रता और हर्षके साथ हमारे प्रस्तावको स्वीकार कर लिया तथा लगभग आठ माहमें प्रस्तुत ग्रन्थ लिखकर हमें दे दिया। शर्माजीने अनेक जैन ग्रन्थोंका अध्ययन करके इसे लिखा है। इसके लिए वे हार्दिक बधाई एवं धन्यवादके पात्र हैं।

संस्कृत गद्य-पद्यकाव्यके विशिष्ट विद्वान् डॉ० पं० पन्नालालजी साहित्याचार्य, प्राचार्य गणेश संस्कृत-महाविद्यालय सागर और श्री पं० रतिनाथजी झा रीडर संस्कृत-महाविद्यालय, काशी हिन्दू विश्वविद्यालयने हमारी प्रेरणा पाकर इसे देखा है और आवश्यक संशोधन भी किये हैं। हम इन दोनों विद्वानोंके अत्यन्त आभारी हैं। सुहृद्वर पं० श्री शिवदत्तजी चतुर्वेदी प्राध्यापक काशी हिन्दू विश्वविद्यालयने इसका प्राक्कथनके रूपमें 'सर्व-मङ्गल-माङ्गल्यम्' लिखकर अनुगृहीत किया है। इसके लिए उन्हें धन्यवाद है।

आशा है इस अभिनव एवं भव्य कृति 'मङ्गलायतनम्' का विद्वानों, छात्रों और पाठकों द्वारा उसी प्रकार स्वागत एवं समादर होगा, जिस प्रकार वीरसेवा-मन्दिर-ट्रस्टसे इतः पूर्व प्रकाशित ग्रन्थोंका हुआ है।

(डॉ०) दरबारीलाल कोठिया,
मन्त्री, वीर-सेवा-मन्दिर-ट्रस्ट

चमेली-कुटीर, अस्सी
वाराणसी-५
वीर-शासन-जयन्ती (श्रावणकृष्णा १)
वीर-निर्वाण-संवत् २५०१।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्व-मंगल-मांगल्यम्

जीवन-तरंग-मालाकुले नाना-वासना-घोर-नक्राक्रान्ते जगत्समुद्रे अशेषाभयसन्देशप्रदानधूर्वहं हि चैतन्यस्य भगवतो महावीरस्य चरित्रम्। चरितं हि तत् सर्व-मङ्गल-माङ्गल्यं, निखिल-विश्रान्तिस्थलम्, दानवस्यापि देवत्वसंपादकम्, सर्वसमृद्धिसेव्यमानम्, प्रकाशस्तम्भायितम् जडचेतनानाम्। धन्यास्ते पुरुषशार्दूला ये मानवतामुन्मुखीचक्रुर्विकासदिशायाम्, प्रसारितो यैः शंखनादः "सर्वे अमृतस्य पुत्राः" इति। भगवान् महावीरो नायकस्तत्रा-सम-सम्भावनाऽऽपूरितस्वान्तः। मोमुदीति यच्चरिताकर्णनतो लोकः, तुच्छं गणयन्ति निखिलमपि पुरतो विकीर्णमापातरमणीयमखिलसम्पत्प्रपूरितसुखजालं यदीयचरित्रेषु रसग्रहणतत्पराः, प्राणिदयाऽऽप्लावितान्तःकरणाः महामहीयांसो मानवताधूर्वहाः।

दैवीसम्पत्समृद्धं महावीरस्य भगवतश्चरित्रममृतलेपनमिव सर्वाङ्गेषु न केवलं वाचिकरूपेण प्रचारितं संरक्षितं वाऽपितु वाङ्मयस्यापि सुतरामुपकारस्तेन सम्पादितः, सम्पाद्यते चाद्यापि। परःसहस्राः जीवन-द्वन्द्व-रहस्य स्फोरकाः, प्रकाशमसमं सञ्चारयन्तो ग्रन्थास्तदीयचरित्रोपदेश-सिद्धान्ताख्यायिकावर्णनादितत्परा वाङ्मयमापूरयन्ति संस्कृत-संस्कृतेः। सार्धद्विसहस्रतमेयं निर्वाणशताब्दी महावीरस्य निखिले चेतने जगति नवं स्फुरणं संचारयतीव। परःसहस्रास्तत्सन्देशालोकितस्वान्ता महापुरुषाः तस्य सर्वत्र सर्वदुःखनिवारकानुपदेशान् जीवनसिद्धान्तान् गृहे-गृहे करुणा-पारवश्यात्प्रचारयन्तो तृणीकृतदेहाद्यभिमाना शीतातप-वर्षादिकमपि न विगणय्य संचरन्ति लोके, संचारयन्ति च नवं नवं जीवनप्रवाहम्।

प्रकाशनप्रक्रमे विद्वद्वर्येण महापुरुषेण डा० नेमिचन्द्रशास्त्रिवर्येण, यस्य 'स्वर्गीय' इति विशेषणं योजयन्ती दुःखभरेण कम्पते लेखनी, तेनानेकाब्दपर्यन्तं परिश्रमं सम्पादयता चतुर्षु बृहत्कायेषु भागेषु 'तीर्थंकर महावीर और उनकी आचार्य परम्परा' शीर्षकयुतः नितान्तं मननीयः प्रशंसनीयः समादरणीयश्च विशालो ग्रंथः प्रणीतः, यश्च अखिलभारतीय-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दिगम्बर-जैन-विद्वत्परिषदा नितान्तमाकर्षके स्वरूपे जनतायै उपहारीकृतः। हिन्दूविश्वविद्यालयतः प्रवाचकपदाद् गृहीतावकाशाः सुज्ञातपाण्डित्यरहस्यमुद्राः विद्वत्प्रकाण्डाः, युवकजनस्याप्यादर्शभूतेनाऽसमेनोत्साहगुणेन सततं तरंगितान्तःकरणाः श्रीमन्तो डा० दरबारीलालकोठिया महाभागा नूनमेतस्य ग्रन्थरत्नस्य प्रकाशनाय विदुषां धन्यवादपरम्पराभाजनानि । ग्रन्थकृतिर्महतीयमुपलब्धिरस्य मङ्गलशताब्दिवर्षस्येति निश्चिनुमः ।

एते हि महाभागाः संस्कृतभाषायां नितान्तं बद्धानुरागा इति भगवतो महावीरस्य महीयांसं जीवनमिमे संस्कृतभाषायां गद्येऽपि प्रकाशितं द्रष्टुं व्याकुलतामनुभवन्ति स्म। शतशो जीवनवर्णनग्रन्थाः सन्ति संस्कृते पद्ये उपनिबद्धा भगवतो महावीरस्य । परं संस्कृते गद्ये नोपलभ्यते तस्यैकमपि प्राचीनं जीवनचरितम् । नाप्यधुनातनसंस्कृत-विदुषां संस्कृते गद्ये लिखितं हि जीवनमाधुनिकसमाजस्याधिकाधिकमुपकर्तुं समर्थं किमपि दृश्यत इति तैरस्यापि प्रयासस्य पूर्णत्वं सम्पादितम् ।

तत्राऽस्मदन्तेवासिना प्रियमित्रेण, काश्मीरोद्भवेन, लक्षणग्रन्थविहितचेतसापि काव्यनिर्मितिशूरेण, विविधकाव्य-नाटक-प्रबन्ध-रचयित्रा दर्शितशोभाकरमित्रपाण्डित्येनाधिगतहिन्दूविश्वविद्यालयीयप्राच्यविद्याधर्मविज्ञान-संकायप्रदीयमानचक्रवर्तीतिशोधोपाधिना, रणवीरसंस्कृतमहाविद्यालयाध्यापकवर्येण श्रीमता पण्डितबिहारीलालशर्मणा समनुशील्य भगवतो महावीरस्यानुपमं चरित्रम्, समवगाह्य दार्शनिकसिद्धान्तेषु 'मङ्गलायतनम्' नाम ग्रन्थोऽयमारचितः । संस्कृते गद्य-काव्ये कोमल-कान्त-पदावली-प्रपूरितोऽयं ग्रन्थस्तावदावर्जयति नितान्तं तीर्थंकरस्य महावीरस्य करुणासाम्राज्यं तदन्यान्यांश्चोपदेशान् प्रति पाठकान् सहृदयान् । सर्वैरपि सहृदयशिरोमणिभिनूनमास्वादयिष्यत एवात्र रसप्रवाह इति वस्तुनिष्ठा चमत्कृतिर्नितमां विज्ञापनाद्यावर्जनमाकाङ्क्षते ।

अभिनन्दामहे धन्यवादैः श्रीमन्तं डा० पं० दरबारीलालकोठियामहोदयमाशास्महे संस्कृत-साहित्यस्य तत्कार्यंजीवनेऽसमां समृद्धिमिति ।

दीपावली
१९७५

शिवदत्तशर्मा
चतुर्वेदः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुख-बन्ध:

संवत्सरोऽयं तीर्थङ्करमहावीरस्य निर्वाण-रजतशताब्दी-समारोहस्य वर्त्तते। दिव्यमहोत्सवोऽयं स्वकीयराष्ट्रे परकीयराष्ट्रेष्वपि च सोल्लासतया समाद्रियमाणोऽस्ति। भगवन्तो महावीरस्वामिनो जैन-धर्मस्यान्तिम-तीर्थङ्कररूपेण प्रतिष्ठन्ते, पूज्यन्ते च सर्वत्र। सर्वैरप्यधिगतमेव तेषामुपदेशामृतम्। वर्षाणां विगते सार्द्धसहस्रद्वये सहस्रशो लेखकाः संस्कृत-जीवन-चरित्रं निबद्धवन्तः।

विषयेऽस्मिन् पद्यबद्धाः संस्कृत-रचनाः बाहुल्येन समुपलभ्यन्ते, किन्तु संस्कृत-गद्ये नाद्यावधि काचिदपि कृतिर्दृष्टिपथमायाता। काशीहिन्दूविश्वविद्यालये रीडरपदमलङ्कुर्वद्भिः, विद्वद्वर्यैः डाक्टरोपाधिविभ्रद्भिः पण्डितश्रीदरबारीलाल-कोठियामहाभागैः सौभाग्यवशात् प्रेरितोऽहं भगवन्तं महावीरं समवलम्ब्य संस्कृत-गद्यस्य माध्यमेन बाणभट्टस्य कादम्बरीकथयाऽथवा वादीभसिंहस्य गद्य-चिन्तामणिना तुल्यमतुल्यं जीवन-चरित्रमुपस्थापयितुम्। अस्यामेव दिशि वर्त्ततेऽयं मदीयो लघुप्रयत्नः।

'मङ्गलायतनं नामेदं स्वोपज्ञं गद्यकाव्यं पञ्चसु सोपानेषु विभक्तम्।

पुराणेतिहास-प्रसिद्ध-कथानक-मूलकत्वाद् रचनेयमेकाऽऽख्यायिकाऽऽख्यातुं शक्यते। वृत्तमैतिहासिकम्। नायको भगवान् महावीरः। स चापि प्ररूढ-वैराग्यत्वाद् धोरप्रशान्तः। शान्तो रसस्त्वङ्गित्वेन व्यवतिष्ठते। शृङ्गार-वीर-करुणाद्भुतप्रमुखाः अन्येऽपि रसा यथास्थानं निर्व्यूढाः।

सूर्येन्दु-रजनी-प्रदोष-ध्वान्त-वासर-प्रभात-मध्याह्न-शैलर्तु-वन-मुनि-स्वर्ग-नगर-ग्राम-संग्राम-प्रभृतीनां वर्णनानि यथाप्रसङ्गं निबद्धानि।

स्वच्छन्दोच्छलद्रस-प्रवाहैः, शब्दार्थोभयालङ्कारझङ्कारैः, कोमल-कान्त-पदावली-विन्यासैः, भौतिक-विडम्बनाऽऽडम्बरोत्पाटनैः, गूढतम-दार्शनिक-रहस्योद्घाटनैश्च संवर्धित-सौन्दर्यं-काव्यमेतत् सचेतसां चेतांसि समावर्जितुं कियत् सामर्थ्यं-शालीति समीक्षकाः एव प्रमाणम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्तरोत्तरं विषयानुसारं विकट-बन्ध-प्रबन्धस्य परित्यागः पतत्प्रकर्षदोषतया न विभावनीयो बुधैः ।

श्रीमन्तः पं० श्रीदरबारीलालकोठियामहाभागाः प्रतिक्षणं बौद्धिक-साहाय्य-प्रदानेन काव्यस्यास्य सम्पादनेन प्रकाशनेन च मामुपकृतवन्तः । अतश्चैतेषां महामात्यानां विनम्रतयाऽभिनन्दनं कुर्वन्नात्मानं कृतार्थं मन्ये ।

विदुषां वशंवदः

कमच्छा, वाराणसी

विहारीलालशर्मा
(एम० ए०, साहित्याचार्यः)
कलादर्शनाध्यापकः, श्रीरणवीरसंस्कृतविद्यालयः
(काशी-हिन्दू-विश्वविद्यालयः)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयानुक्रमः

प्रथमे सोपाने

विषय	पृष्ठ संख्या
१. भारत-वर्णनम्	१–३
२. विदेह-(विहार) वर्णनम्	३
३. वैशाली-वर्णनम्	३
४. कुण्डग्रामवर्णनम्	३
५. सिद्धार्थराज्ञः वर्णनम्	३–४
६. त्रिशला-वर्णनम्	४–५
७. सौधर्मस्वर्ग-वर्णनम्	५
८. सौधर्मेन्द्र-वर्णनम्	५
९. कुण्डग्रामे कुवेरद्वारा रत्नवृष्टिवर्णनम्	६–८
१०. गर्भावतारवर्णनम्	८–१०
११. त्रिशलायाः षोडशस्वप्नदर्शनम्	१०–१२
१२. त्रिशलया सिद्धार्थाय स्वप्ननिवेदनम्	१३–१४
१३. सिद्धार्थेन स्वप्नफलकथनम्	१४–१५
१४. देवीभिः मातुः सेवा-जिज्ञासाकथनम्	१५–२०
१५. तीर्थंकरजन्म-वर्णनम्	२१
१६. तीर्थंकरजन्मोत्सव-वर्णनम्	२१–२२

द्वितीये सोपाने

१. मेरौ इन्द्रद्वारा जन्माभिषेकवर्णनम्	२३–२५
२. राजभवने सुरपतेर्नाटकप्रदर्शनम्	२५–२८
३. सुतजन्मना सिद्धार्थस्य त्रिशलायाश्च हर्षवर्णनम्	२९–३०
४. नामकरणसंस्कारोत्सवे सुतस्य वर्द्धमाननामकरणम् ...	३०
५. वर्द्धमानस्य बाल्यक्रीडा-गुणादिवर्णनम्	३०
६. सञ्जय-विजयमुनिनायकयोः शङ्कानिवृत्तिः	३१
७. सङ्गमदेवद्वारा वर्द्धमानस्य परीक्षा	३१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषय	पृष्ठ संख्या
८. सङ्गमदेवद्वारा वर्द्धमानस्य संस्तुतिः	३२
९. वर्द्धमानद्वारा मत्तगजेन्द्रवशीकरणम्	३२–३३
१०. वर्द्धमानस्य तारुण्य-वर्णनम्	३३–३४
११. विवाह-प्रस्तावः	३४–३८
१२. विवाहप्रस्तावस्यास्वीकारः	३८
१३. वर्द्धमानस्य चिन्तनम्	३८–४०
१४. वनप्रदेश-गमनार्थं पित्रोराज्ञामादातुं तत्समक्षे आगमनम् ...	४०
१५. पित्रा वनप्रदेश-गमनस्वीकृतिः	४१–४२
१६. लौकान्तिकैर्देवैर्वर्द्धमानस्य वैराग्यस्यानुमोदनम्	४२–४३
१७. राजकुलस्य प्रजायाश्च वियोगोद्गाराः	४४–४५

तृतीये सोपाने

१. वर्द्धमानस्य निर्ग्रन्थदीक्षाग्रहणम्	४६–४७
२. वर्द्धमानस्य स्वात्मचिन्तनम्	४७
३. वर्द्धमानस्य विविधतपसामाचरणम्	४७–४८
४. कूलग्रामनृपस्य गृहे आहारग्रहणम्	४८
५. वर्द्धमानस्य देशेषु ग्रामेषु च विहारवर्णनम्	४८–५६
६. वर्द्धमानस्याभिग्रहः	५७
७. चन्दनाद्वारा वर्द्धमानस्याहारग्रहणम्	५८
८. वर्द्धमानस्य केवलज्ञानोत्पत्तिवर्णनम्	५९

चतुर्थे सोपाने

१. गणधराभावे वर्द्धमानस्योपदेशाभावः	६०
२. इन्द्रभूतेर्गौतमस्य समक्षे इन्द्रस्यागमनम्	६१
३. वर्द्धमानस्य समवशरणे गत्वा इन्द्रभूतेः तच्छिष्यताग्रहणम् ...	६२–७१

पञ्चमे सोपाने

१. तत्त्वोपदेशः	७२
(क) सामान्यधर्मोदेशः	७२–७६
(ख) पञ्चाणुव्रतवर्णनम्	७७–७८
(ग) सप्तशीलव्रतवर्णनम्	७९–८०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषय	पृष्ठ संख्या
(घ) महाव्रतवर्णनम्	८०–८१
(ङ) आत्मवर्णनम्	८१
(च) मोक्षमार्गवर्णनम्	८२
(छ) सम्यग्दर्शनवर्णनम्	८२
(ज) अजीवद्रव्यवर्णनम्	८२–८३
(झ) आस्रवतत्त्ववर्णनम्	८४
(ञ) संवरवर्णनम्	८४
(ट) निर्जरावर्णनम्	८४
(ठ) बन्धतत्त्ववर्णनम्	८५
(ड) मोक्षतत्त्ववर्णनम्	८५
(ढ) सम्यग्ज्ञानवर्णनम्	८५
(ण) सम्यक्चारित्रवर्णनम्	८६
२. ईश्वरस्वरूपम्	८७
३. कर्मणः स्वरूपम्	८८
४. स्याद्वादस्वरूपम्	८८
५. उपसंहारः	८८–९३
६ वर्द्धमानस्य निर्वाणगमनम्	९४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मङ्गलायतनम्

प्रथमं सोपानम्

त्रिभुवन-लक्ष्म्याः विलासस्थलीव, भुवन-सदने देदीप्यमाना दीपशिखेव, जगत्सरसि विकसिता सरोजिनीव, विश्वपुरुषस्यात्मशक्तिरिवास्ति वन्दनीया भारतभूमिः।

या च स्रोतोवहाप्रवाहदोलायमानचामरा, विविधरत्नोपहारसमर्पणरत-रत्नाकरा, उपधानान्तिक-विराजमान-नगपतिप्रहरिका सम्राज्ञीव; हिमनग-भासमान-रजत-किरीटा, ब्रह्मपुत्रवेणी-विभूषिता, कश्मीरभालतिलका, पीरपञ्चाल-शुभ्रदन्तावलिका, अवगाहनरतसुन्दरीस्तनतटविगलितकुङ्कुमरक्तवितस्ताधर-पल्लवा, तरङ्गायित-गङ्गा-यमुनावलयितभुजलतिका, पञ्चनदसमुन्नतवक्षःप्रदेशा, देवसरोवरनाभिमण्डला, कमनीयकटिकटकभागमनोहरा, कन्याकुमारीकेरल-पादपद्मा, विद्रुममणिनखनिकरकरम्बिता, जलनिधितरङ्गरमणीयनूपुरा, मूर्त्तिमती सुषमादेवीव विश्रामं कुर्वती, दिक्चतुष्टय-चतुष्पादा, ब्रह्मदेशपुच्छाग्रभागा, कश्मीरवदननिर्गलन्निर्झरमिषरोमन्थाभ्यसनपतत्फेनततिशोभिता, दिनकरकरग्रथित-तुषार-कण-हीरकहारोपशोभितहिमाद्रि-शिखरशृङ्गा, पञ्चनदलम्बमानसास्ना-पिण्डा, गङ्गादितरङ्गिणीव्याजप्रवहत्पयोरसा काचित् कामधेनुरिव चतुर्वर्गफलप्रदा-नायोद्यता; रक्तमन्दिरच्छटाच्छद्मना नखक्षतरक्तिमानमादधती तन्वङ्गीव, नील-निलयनीलिम्ना रतिविगलितवन्धचिकुरजाला प्रगल्भेव, स्वच्छस्फटिकनिर्मित-भवनश्रिया रतिहासं प्रकुर्वती प्रमदेव, प्रत्येकभवनं पुष्परागमिषविकीर्यमाणमन्मथ-सम्मोहन-चूर्णमूर्च्छितसकलपथिकैः, समुच्छलितयन्त्रधारापतितप्रभाकरकरनिकर-निर्मितेन्द्रचापैः, भ्रमरगणगुञ्जितवीणासङ्गत—कोकिलपञ्चमराग—रमणीयैः, दाम्पत्यानुरागोपमानभूतालिङ्गितलतापादपैः, मधुरमदिरापानोन्मादनिर्दयालिङ्ग-नत्रुट्यमान-कुचहारसुगन्धित-कुञ्जैः, सततसन्निहितवसन्तसौरभसुरभित-दिगन्तरैः, एलालताश्लिष्टताल-तिलक-तमाल-हिन्ताल-वकुल-नारिकेल-कलापैः, द्राक्षा-वल्लरी-व्याप्ताक्षोटविटपैः, सम्फुल्लसहकारमञ्जरीपरागपिञ्जरैः, महाभारतप्रसङ्गैरिवा-र्जुनचर्चितैः रम्योद्यानैः समालिङ्गिता; उत्फुल्लकुमुद-कोकनद-कुवलय-पुण्डरीक-सहस्रैः, सञ्चरज्जलचर-गगनचर-सहस्र-वाचालितवीचिमालैः, अनवरतजलक्रीडा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निमज्जद्वन-देवता-कुचपाषाणविलुलितसलिलैः, सरसिज-मधुपानमत्त-सारस-कलहंस-कृत-कलकलमनोहरैः, अवगाहनरतसुन्दरीनिवह-केशपाशकुसुमाङ्गरागकषायितैः, पुलिनतरुपल्लवपुटानिलोल्लासितजलतरङ्गशीकरारब्धपयोदकालैः, पवनान्दोलित-जलजातपरागपटलकलितकूलैः, जलनिधिभिरिव जलधरगजनिवहनिपीयमानजलैः, गगनमण्डलैरिव नक्षत्रकुसुमाकृष्टदर्शकनयनैः, शृङ्गारसज्जां समवलोकयितुं धरासुन्दरीकरधृतदर्पणैरिव, करुणापरिप्लुत-सज्जनहृदयैरिव, सरोवरैः सम्पूरिता, विततजलदपटलाभ्यन्तरकन्दरक्रीडत्किन्नरमिथुनैः, नृत्यन्मयूर-कृतकेका-रव-कोलाहलामोदितसकलजनमनोभिः, स्रवन्मदजलैर्मातङ्गैरिव, सचपलैर्घनमण्डलैरिव, खड्गधारिभिः रक्षकपुरुषैरिव, धरानितम्बिनी-हीरकहारालङ्कृतपयोधरमण्डलैरिव, निर्झरझङ्कार-मुखरैः शिखरिभिरुत्तामितहस्तैराह्वयतीव सौन्दर्यप्रतियोगितायां समस्त-द्वीपलक्ष्मीः; उभयतोऽपि विटपिकिसलयकरगृहीतकुसुमस्तबकाभिनन्द्यमानपथिकजनैः, यौवनोन्मादालसभूमिभामिनी-भ्रुकुटिभङ्गकल्पैः, सांसारिकगमनागमनोपदेशोपमानभूतयातायातसङ्कीर्णैः, नानाविध-यानभुङ्कृतिमुखरैः, राजमार्गैर्विराजिता; क्वचित् खन्यमानैः, क्वचित् सिच्यमानैः, क्वचिद् उप्यमानैः, क्वचित् लूयमानैः, विविध-धान्यसौरभसुवासितदिगन्तरैः, गोपकन्यकामधुरगीतावकृष्ट-निस्तब्धपथिकैः, खलस्थानस्थितगगनचुम्बिधान्यराशिभिः सस्यक्षेत्रैर्मनोहारिणी; मधुमासविविधसुमनोमण्डितोद्यानदेशैरिव, अनेकरत्नालङ्कारगम्भीररत्नाकर-हृदयैरिव, नक्षत्रनिकर-करम्बितगगनमार्गैरिव, नानावर्णवर्ण्यमानवस्तुचाकचिक्य-चर्चितरथ्यास्थानैरुपशोभिता, कान्तिपूरपूरितमानसनिमग्नकटाक्षचञ्चुप्रहारपीड़ित-तरुणहृदयकमलतया राजहंसीभिरिव, कुसुम-गुम्फित-कुटिल-कुन्तल-जालतया दर्शकदृष्टिबन्धनलालसमन्मथप्रेरित-फणधरपाशविद्याभिरिव, स्फुटितकञ्चुकी-प्रकटित-कुङ्कुमार्द्र-कुचमण्डलतया समरारूढमनोभवसिन्दूरसमाजितकुम्भस्थलोप-शोभिताभिः करिणीभिरिव, दुर्बलदेववृन्दव्याकीर्णं देवलोकं विहाय बलिष्ठभार-तीययुवकरतिकामिनीभिरवतीर्णाभिरप्सरोभिरिव, भ्रुकुटिविलासनर्तित-निखिल-चराचराभिः, रमणीभिः संवर्धितसौभाग्या; स्वर्गङ्गाप्रवाहैरिव प्रकाशितकनक-कमल-कलापैः, तान्त्रिकैरिव विविधमन्त्रप्रयोगाधिकृतभोगैः, नारिकेलफलैरिवान्त-स्तरलैः, महामानैरपि विनयशीलैः, अन्तःसरलैरप्यहिमाचलशिखरैः, सदाचार-परायणैः, करुणार्द्रहृदयैः, सुशिक्षितैः, सुसभ्यैः, सुसंस्कृतैः, स्मितपूर्वाभिभाषिभिश्च नागरिकैः समभिनन्दिता, जिनवाणीव समग्रजीवैश्वर्यवादिनी, अमरावतीव विबुधभूषिता, भोगावतीव सन्निहितभुजङ्गा, त्रिभुवनलक्ष्मीरिव रत्नान्नचन्दन-कुसुममालाद्यलङ्कृता, अलकेव धनपतिवर्द्धितमाहात्म्या, द्यौरिव द्विजराजप्रभा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भास्वरा, गङ्गेव कुक्षीकृतविविधधारा, सत्कवितेव समग्ररसालङ्कारगुणगुम्फिता, कादम्बिनीव तापहारिणी, अवलम्बितदिगम्बराऽपि विविधाम्बरभूषिता, कुदर्शनीयाऽपि रमणीयदर्शना, विशालाऽप्यनेकविश्रामशाला, गरूत्पयोधराऽपि युवकजनपरिभोग्या, भुजङ्गभुक्ताऽपि पवित्राऽस्ति ।

यस्यां, लतायां पुष्पमिव, पयसि नवनीतमिव, दिवि चन्द्रमा इव विराजते विदेहनामको देशः। यश्च सेवनाहतरोग औषधालय इव, समशीतोष्णानुभवपरायणो योगीव, तरङ्गिणी व्याजप्रवहत्सुषमाप्रकरः, निष्कलङ्कचन्द्रमण्डलेतिहासोऽन्तर्निहितखनिजश्चास्ति । यश्च पुरा भगवतो महावीरस्य विहारैर्विहारप्रदेशनामाभिरामो बभूव । तत्रापि चन्द्रमसि चन्द्रिकेव, प्रभाकरे प्रभेव, उद्याने मधुमासलक्ष्मीरिव, पयोधरे तडिल्लतेव, दीपके वर्तिकेव, जलनिधौ लहरीवासीद् वैशाली नाम नगरी । या च रसालकल्पपादपोपशोभिता, गण्डकी-गङ्गा-चुम्बितपादपद्मा, रमणीयोद्याननोदितनन्दनामोदा, सुन्दरी-सुराङ्गना-सङ्कुला, साक्षादमरावती मानवशाद् धरायामवतीर्णेति मन्ये । प्रशासकश्च चेटकनामधेयो गणराज्याध्यक्षः सुरपतिरिवासीत् । तत्रापि सुरलोकशिशुरिव विबुधाभिनन्दितः, केसरिकिशोरक इव केसरविभूषितः, कुञ्जरशावक इव मदविरहितः, कुण्डाख्यो ग्रामः समवर्तत । यस्यामरलोकातिशायिनी सम्पत्तिर्लोकैरद्यापि सङ्गीयते ।

तस्मिन्नेवंविधे निखिलजनमनोलोभनीये नगरे काननप्रदेश इव सखड्गधेनुकः, नूतनजलधर इव शिखण्डिशिखण्डाखण्डलचापधारी, दिक्कुञ्जर इव निरन्तरवसुधासंवाहकः, मन्दरायमाणभुजदण्डमथित-वैरि-सिन्धुतलाविष्कृतभूमण्डलरत्नसम्भारः, सफलमन्त्रोत्साहप्रभावशक्तित्रयः, निखिलगुणगणाधिष्ठाता, राजनीतिविद्या-विचक्षणः, समधिगतसकलकलः, द्वितीय इव दिवाकरः, दूरीकृतदम्भाडम्बरप्रपञ्चः, सागर इव करुणानदीनाम्, नगाधिराज इव दुरवलोक्योन्नतिः, अवतार इव धर्मस्य, वल्लभ इवाहिंसायाः सिद्धार्थनामको राजा बभूव ।

यो गुरुतायां हिमालय इव, गम्भीरतायां जलधिरिव, स्निग्धतायां नवनीतमिव, प्रतापे दिवाकर इव, शान्तौ निशाकर इव, क्षान्तौ सर्वंसहामण्डलमिव, सम्पत्तौ लक्ष्मीपतिसमोऽपि दानेऽद्वितीय एवासीत् । देवलोक इव विबुधवेष्टितः, ग्रहगण इव काव्यसङ्गतिरसिकः, मधुमास इवापङ्कमित्रः, काव्यपुरुष इव विविधालङ्कारविभूषितः, दिनकर इव पद्मामोदकरः, गजराज इवानवरतदानजलक्लिन्नहस्तः, चम्पकतरुरिव तिरस्कृतमधुपगणः, सालद्रुम इव निश्चलीभूतकृष्णशिलीमुखसमूहः, पर्वत इव व्याहतपक्षपातश्चासीत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यश्च कमलकरोऽपि करविहीनः, कुनृपतिरपि प्रजाभिनन्दितः, उदारोऽप्यनुदारः, सर्वाङ्गयुक्तोऽप्यनङ्गः, विदेहोऽपि सशरीर एवातिष्ठत् ।

यस्य शक्तिः रक्षणाय न तु परपीडनाय, धनसंग्रहो दानाय न तु भोगाय, भवनानि गृहविहीनानां निवासार्थं न तु स्वविलासार्थं, श्रवणमार्तक्रन्दने न नूपुरे, सेवनं करुणरसस्य न मद्यस्य, शत्रुता तु दीनदुखैः सहाऽभूत् ।

यस्य च प्रशासनकाले कलङ्को मृगाङ्के, कलहो रतिकलासु, क्षतिर्नखानाम्, आलस्यं गजगमनेषु, प्रवञ्चना मृगतृष्णासु, मानभङ्गो मानिनीनाम्, नमनं शाखानाम्, नियमनं पापस्य, कुटिलता भुजङ्गगमनेषु, कठोरता पाषाणखण्डेषु, सजलता च सरित्स्वेवासीत् ।

तस्यैवंविधस्य महीपतेः पुष्पधन्वनो रतिरिव, विश्वम्भरस्य लक्ष्मीरिव, सत्यभामेव माधवस्य, जानकीव रामचन्द्रस्य, विबुधाधिपस्य पुलोमजेव वल्लभाऽऽसीत् त्रिशलाभिधाना ।

सीमन्तसिन्दूरसुशोभितचिकुरजाला सुरपतिचापाङ्किता मेघमालेव, परित्यक्त-मृगाङ्कशोभाध्युषितनिर्मलमुखमण्डला, वदननलिननिषण्ण-नासिकाकीरभयविवर्ण-कर्ण-कर्णिकारपलायित-नयनमधुकरा, अतिधवल-दन्तपङ्क्तिप्रभयोपहसन्तीव मौक्तिकस्रजम्, अभिनवरसालकिसलयाधरोष्ठा, समरारूढमन्मथध्वन्यमानकम्बु-कण्ठा, मनसिज-कल्पितशिरीषकुसुमपाशवन्धनबाहुयुगला, हृदयहिमाद्रिप्रवह-द्धाराभिषिच्यमानकुचकुड्मला, त्रिवलिसोपानपङ्क्तिविभूषित-नाभि-रतिकुण्डकम-नीया, कदली-स्तम्भ-स्निग्ध-जघनभागा, मनोभव-तूणीरायमान-जङ्घायुग्मा, कञ्चुकी-निगडित-कुचशम्भु-वीक्षण-मुदित-मदन-रणरणद्दुन्दुभिनूपुररवरमणीया, सा कस्य सचेतसो मानसपयोनिधिं न ममन्थ ?

मन्ये सा राहुभीता कलाधरकलेव परित्राणार्थं वसुन्धरायां समागता, उताहो साक्षात् सुन्दरतेव सुवर्णस्य कान्तिं, चम्पकस्य सौरभं, पीयूषस्य माधुर्यमादाय मूर्तिमती सञ्जाता ।

सा च चन्द्रिकेव लोचनानन्द-दायिनी, दिनपतिप्रभेव बोधितसकललोका, साधुजनवाणीव सत्पथप्रदर्शिनी छायेव सन्तापहारिणी, औषधिरिव रोगनाशिनी, भवभूतिकवितेव करुणरसपरिपूर्णा, वृद्धायावलम्बनयष्टिरिव, विविधपर्यायि-चक्र-चंक्रमिताय परमार्थप्राप्तिरिव, विकीर्णजीवनस्रोतसे स्रोतस्विनीव, दिग्भ्रमव्या-कुलाय सन्मार्गरेखेवासीत् ।

सा दर्शनशास्त्रगहनाऽपि कथेव सरसा, वीराङ्गनापि धर्मभीता, विनिन्दिता-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यहरणापि प्रियतममनोहारिणी, समुन्नतापि नमनशीला चासीत् ।

राजा मूर्तोऽनुरागः सा देहधारिणी ममता, सः रूप-कल्पः सा च सुषमा, स कल्याणरूपः सा च कल्याणी, सः पुरुषः सा च प्रकृतिरिवातिष्ठत् ।

चक्रवाकी-चक्रवाकयोरिव, सरित्सागरयोरिव, लता-पादपयोरिव, दृढतर-स्नेहभावासक्तयोस्तयोः सुख-दुःखेषु सर्वेषु विचारविनिमयेषु च शाश्वतिकं साहचर्य्यमासीत् । सर्वजनीनधर्मशालानां, विद्यालयानां, भोजनालयानां च निर्माणेन, निरोधेन पशुबलेः, शरणापन्नानां परित्राणेन, दानकर्मणा च सततं धर्मार्जनं चक्रतुस्तौ । परन्तु तनयमुखकमलविलोकनं विना स्वकीयं जीवनं फलहीनं पादपमिव, जलरहितं जलाशयमिव, पुष्पशून्यमुद्यानमिव वृथैव मेनाते ।

भोगपरिपालितसमग्रजीवनैः, निर्गतार्थोपार्जनचिन्तोद्योगैः, अप्रतिहत-गतिगमितनिखिल-ब्रह्माण्डैः, अनवरत-विविध-भुवन-सञ्चरण-परिश्रम-खेदानभिज्ञैः, देदीप्यमान-विमानाधिकृत-कमनीय-प्रकृति-सुषमा-सार-विलोकन-हृष्यमाण-हृदयैः, गिरि-वनोपवन-रमणीय-रमणी-सङ्ग-निधुवनरतैः, सतत-धार्मिकानुष्ठान-श्रद्दधानैः, आमोद-प्रमोदैककार्य-निमग्नचित्तैः, मनोविनोदैकतानमनोयोगैः, विविध-प्रदेश-पुण्यमय-जिन-बिम्बदर्शन-लालसैः, सागरैरिव मुक्तामयैः, राजहंसैरिव निर्मलमान-सानुरक्तैः, देवैर्देदीप्यमानः; अवगाहन-रतसुरसुन्दरी-स्तनतट-जर्जरित-तरङ्गमालया विकच-कमल-प्रवहन्मकरन्द-सौरभ-मिश्रित-पवन-सञ्चारापनोदित-रति-क्लान्त-देव-दम्पती-श्रम-भारया, विकसित-पुण्डरीक-लोचनया, निमज्जितैरावत-कुम्भ-स्तनतटया, फेनपुञ्ज-धवल-हासया, शैवाल-चिक्कण-चिकुर-जालया, कल्लोल-कलकल-मुखरितनूपुरया, स्वर्गङ्गया समालिङ्गितः, वैज्ञानिकैरप्यज्ञातः, अनु-सन्धानस्याप्यविषयः, पुराणैकगम्योऽस्ति स सौधर्म-स्वर्गः ।

तत्रानवरत-कृत-धार्मिकचर्चाप्रसङ्गः, निष्पक्ष-विवेचनापहृत-सकल-देवगण-मोहभ्रमः, हिमालय इव सतत-सन्निहित-सोमः, अलकापुरीपरिसर इव परिगीत-धनराज-महिमा, पुलोमजा-शयनोपधानीकृतभुजदण्डः, निर्दयालिङ्गिताप्सरो-वक्षोज-कुङ्कुम-रचनाङ्कितहृदयदेशः, गैरिकधातुराग-रञ्जित-पर्वतोपमः, प्रणामरता-मरमुकुट-मणिकिरण-कर्बुरी-क्रियमाणपादपद्मः, परिगृहीतवज्रोऽप्यरत्नाकरः, पक्षहीनोऽप्यपर्वतः, स्वर्गणिकानुनयतत्परोऽप्यविटपः, अधिनायक-पदमलङ्कुर्वाणः सौधर्मेन्द्रः सुरपतिरधिवसति ।

एष कदाचित् अवधिज्ञानबलेनाच्युतेन्द्रस्य वयःसमाप्तिं विजज्ञे । षण्मासा-नन्तरमसौ देवदेहं विहाय भारतेऽन्तिमतीर्थङ्कररूपेण पवित्रतमे सिद्धार्थमन्दिरे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिशलाकुक्षेर्महावतारं ग्रहीष्यति। वर्द्धमान-नाम्ना वसुधायां प्रसिद्धिं समवाप्य सर्वेभ्यश्च जनेभ्यः श्रेयोमार्गोपदेशं प्रदास्यतीति।

विचार्येदं प्रमुदितान्तःकरणः सुरपतिः शाश्वतिकं सहचरं, निखिलयोजना-सहयोगिनं, सुख-दुःख-भागिनं, स्वकीयमनोऽभिलाषप्रपूरकं, समीरमिव जवशालिनं, चिन्तामणिमिव चिन्ताहरं, चन्द्रमिव हृदयाम्बुधि-समुल्लासकं, पयोधरकालमिव सन्तापहारिणं, प्रियवयस्यं कुवेरनामधेयमामन्त्र्याब्रवीत्—'मित्रवर ! तवामन्त्रण-स्यास्ति कारणविशेषः। युष्माकं कार्यकुशलतायां, कर्मठतायां, नैतिकता-यांश्चास्ति मे दृढतरो विश्वासः। त्वय्येव हृदयस्थस्यास्य कार्यस्य सम्पादनशक्ति-मनुमिनोमि। धर्मभावनापि तेऽत्युज्ज्वला। कैर्न ज्ञायते त्वदीया कर्त्तव्यपालन-पद्धतिः ? अनेनैव हेतुना संसारेऽस्मिन् वितताऽस्ति ते कीर्तिलता। किं बहुना ? आशास्महे संक्षेपेणैव भवन्तः सर्वमुपनतं ज्ञास्यन्ति। न मे वचनं गुरुभारतयानु-भविष्यन्तीति। अमरलोक-शृङ्गारभूतोऽच्युतेन्द्रोऽच्युते दिवि षण्मासपर्यन्तमेव स्थास्यति। तदनन्तरं स देवदेहं विमुच्य वसुन्धरायां सिद्धसर्वार्थस्य सिद्धार्थस्य त्रिशलाभिधानायाः महिष्याः नन्दनतां प्राप्स्यति। राजकुमारः सन्नपि विषयवासना-स्वनासक्त एवाऽऽजीवनं स्थास्यति। अनलावलम्बनं विनैव मदनं विजित्य त्रिलोचन-मप्युपहसिष्यत्ययं महामनीषी। सर्वस्वमुपेक्ष्य काननैकशरणो भूत्वा शान्तिगीतामेव गास्यत्यनवरतम्। प्राप्स्यति च कैवल्यमनुपमम्। केन जनेन धर्मामृतममरसन्देशश्च नोपलप्स्यते?तस्मात्? अचिरेणैव चाहिंसापताका समुत्तोलिता भविष्यतीति मन्ये। युगस्यान्तिमं तीर्थङ्करं निखिलापि जगती पूजयिष्यति। कूजयिष्यति चास्य कीर्तिकोकिला युगयुगपर्यन्तम्। अतो भवद्भिः सत्वरं कुण्डग्रामं लक्ष्यीकृत्य प्रस्थानं विधीयताम्। वर्षतु च रत्नवृष्टिः सिद्धार्थनृपतेः प्राङ्गणे। येनात्रैव जिनेन्द्रस्यावतरणं भविष्यतीति जानात्वयं लोकः।

एवमस्त्विति सुरपतेराज्ञां शिरसि निधाय धनाधिपो रत्नराशिं समादाय मूर्तिमान् आदेश इव मारुतगत्या कुण्डग्रामं लक्ष्यीकृत्य चचाल। तेन सार्धमितरेऽपि गायन्तो देवाः, नृत्यन्त्यश्च देव्योऽपि चेलुः। तस्मिंश्च नगरे गृहीतसुवर्ण-वेष्टित-वेतस-यष्टिभिः, शुभ्रशिरोवेष्टनैः, शुभ्रानुलेपनैः, धवल-कुसुम-शेखर-मण्डितैः, सित-परिधान-परिग्रहैः, सत्यपुरुषैरिव,मूर्त्तिमद्भिरादेशैरिव महाप्रभावैः,चित्रलिखितैरिव, महाकायैश्च द्वारपालैरलङ्कृतद्वारदेशम्; सञ्चरद्वधू-चरणालक्तक-राग-रञ्जित-शिलाखण्डैः, शिखर-निलीन-जलधर-यवनिकाच्छन्न-कन्दर-द्वाराभ्यन्तर-निधुवन-क्रीडा-निलीन-किन्नरमिथुनैः, ताण्डव-निमग्न-शिखण्डिकेकारव-वाचालित-शृङ्गैः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथिवीप्रमदा-पयोधर-मण्डलैरिव समुन्नतैः, विबुध-लोक-लावण्यं विलोकयितु-मिवोर्ध्वशिरोभागैर्गगनचुम्बिभिः क्रीडापर्वतकैरुपशोभितम्; लम्बमान-चामर-कलापच्चुम्बित-कपोलभागैः प्रस्रवत्प्रस्रवण-धारा-धवल-गिरिशृङ्गैरिव, देदीप्यमान-दन्त-देशैः सविद्युद्विलासैर्वलाहकैरिव, अनवरतक्षरितदानाम्बुप्रवाहैः विविधवर्ण-कम्बल-परिवेष्टित-पृष्ठभागैर्गन्धगजैः सङ्कुलाभ्यन्तरम्; धवल पट-प्रावृत पृष्ठदेशैर्हिमाचलशिखरैरिव, रसित-कर्णघण्टिका-निनाद-मुखरित-ग्रीवाभागैः लाक्षाराग-रञ्जित--सटा--समूहैर्विपिनगज--कुम्भ--पाटन-प्रवाहित- शोणित--धारा--रक्तकेशर-कलापैः केशरिभिरिव, सङ्गीतध्वनि-श्रवण निश्चल-कर्ण पर्णश्चर्व्यमाण-लाज-कम्बल-चपल-प्रोथपुटैः, प्रखर-खुर-क्षुण्ण-मन्दुरैस्तुरङ्गमैर्भ्राजमानम्; धवलोष्णीष-पट-पर्यावृतमस्तकैः समुदितचन्द्रबिम्बालङ्कृतोदयाचलशिखरैरिव गजप्रतिमात्यु-च्चासनोपविष्टैः, धर्माधर्मविवेककुशलैः परमस्निग्धैः, बुद्धि बल-निगडित-लक्ष्मीकैर्धर्माधिकारिभिरधिष्ठितम्; समधिगत-सकल-साम्राज्यप्रपञ्चैः, शासनलेखकैरालिख्यमानराजकार्यम्, हिमकणमण्डित-नगपति--शृङ्गैरिव खचित-मणि-राजि-राजित-मुकुटालङ्कृत-मूर्धभिः, राजकुमारैरुपशोभितम्; निर्गत मरकत-मणि-कुट्टिम-किरण-सहस्रेषु शाद्वल-शङ्कया सञ्चरतां कुरङ्गाणां कस्तूरिका परिमल-सुगन्धित-समग्रभागम् अन्तःपुरप्राङ्गण-प्रारब्ध-करकन्दुक-क्रीड़ा-व्यावलात्कच-भरोच्छ्वसितस्तनतट-बालिका-व्याकुलम्, जलधरमण्डितमिव घनगजघटाभिः, सनक्षत्रमाकाशमिव मुक्तामयमरकतशिखरैः, अमरलोकमिव मनोरमा-रम्भा-विभूषितम् सरोवरमिव विघटमान-पद्मोल्लासितम्, महाकाव्यमिव यथास्थानस्थित-विविध-वर्ण-प्रतिपाद्यमानरमणीयार्थसंग्रहम्, पुराणमिव सन्दृश्यमानसकलभुवन-प्रपञ्चम्, परिपूर्णसुधाकरमिव कोमलकरोल्लासित-रत्नालयम्, पाताललोकमिव महाभोगि-मण्डलाधिष्ठितम्, राकासमयमिव चन्द्र-किरण-कलाप-धवलाम्बरम्, प्रातःकालमिव जायमानमित्रोदयम्, दर्शनमिव बन्ध-मोक्ष-क्रिया-कलापनिपुणम्, नक्षत्रमण्डल-मण्डितमप्यनाकाशम्, विविध-सुमनोऽलङ्कृतमप्यवसन्तम्, महा-कञ्चुकी-व्याकीर्णमप्यनागलोकम्, अनन्तपुरुषपरिपूर्णमप्यसांख्यदर्शनम्, विविध-रसालङ्कार-गुण-रीति-गुम्फितमप्यनलङ्कारशास्त्रम्, प्रकृति प्रत्यय-सन्धि-विग्रह-क्रिया-कुशलमप्यपाणिनीयम्, कलानिधिमप्यसुधाकरम्, आबद्धकविसम्मेलनम्, वैतालिकगीतसिद्धार्थकीर्तिगानम्, प्रारब्धसङ्गीतकार्यम्, पोषितानेक-कुब्ज-किरात-वधिर-वामन-मूकापाङ्गरुग्णभिक्षु-जनव्याकीर्णम्, समुत्कूजत्कोकिल-चकोर-हारीत-शुक-सारिका-मयूर-कलरव-वाचालितम् राजभवनं व्यलोकयत् ।

प्रदक्षिणां विधाय परिचुम्ब्य च भवनशिखरं कुबेरो रत्नवृष्टिं प्रारेभे । कुण्डग्रामं पद्मोपवनमिव कुर्वद्भिः पतत्पद्माकार-पद्मरागैः, द्रुत-सुवर्ण-धारायमाणैः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पतन्माणिक्य-प्रभा-निर्झरैः, रति-केलि-रत-सुराङ्गना-देह-निर्गलद्धारहारिभिर्हीरक-गणैः, व्योमनदोन्दीवरसदृशैर्नीलमणिभिः, सर्वस्व-समर्पण-पिशुनैर्वैदूर्य-मरकत-मणिवर्षणैः, वप्रक्रीडानुरतारण्यककरीन्द्र-शुण्डासदृशैर्नीलमणिभिः, सिद्धार्थाऽऽशाकुसुमाभिषेकजलप्रवाहैरिवाच्युतेन्द्रागमनोपलक्ष्य-निर्मित-सोपान-मार्गैरिव, वीरागमन-श्रवण-लज्जित-दिग्वधू-धृतमुखावगुण्ठनैरिवान्यान्यरत्नपुञ्जैश्च नगरं रत्नावृतमजनि । निर्धनाः धनिनो जाताः, नास्ति परिमाणं रत्नोपलब्धेः । एकैका बाला हीरकहारैरलङ्कृता संवृत्ता, दैन्यं पलायितम् । मन्ये कामाकुलया लक्ष्म्यैवालिङ्गितोऽयं देश-वल्लभः । सर्वेऽपि जिनेन्द्रावतरणमनुमीयातीव जहृषुः ।

प्रियतम-निवारित-सुरति-सुख-बाधाभूत-रशनाजालेनेव, पीनपयोधर-भारावनत-सुरसुन्दरीनिभेन, प्रोषितभर्तृका-विरचित-प्रियतम-शुभागमन-निमित्तक-चन्दनमाल्येनेव, अभिसारिका-चरणालक्तकरञ्जिताभिसारमार्गेणेव, क्षितिगगन-मण्डप-रविवरदीयमान-वसुधा-वधू-सीमन्त-सिन्दूरेणेव, सङ्ग्राममग्नदेवासुर-गणाहत-वीरजन-स्रुत-शोणितप्रवाहेणेव, विवाह-कालिक-तडिन्मेघ-ग्रन्थि-बन्धनेनेव, प्रकृति-वधू-स्तन-नख-क्षतेनेव, रतिरत-प्रियाकुच-कुङ्कुम-रञ्जित-मदन-द्वारेणेव, संसृति-सुन्दरी-कुच-कञ्चुकेनेव, धरित्री-नग-वक्षोज-चित्ररेखाजालेनेव, महाकवि-विरचित-रमणीयार्थगुण-गुम्फित-काव्यबन्धेनेव, जलधर-शार्दूल-नियमन-साधन-भूत-रत्नदण्डेनेव, जलद-पादपालिङ्गित-कल्पलतान्तेनेव, रोषारुणप्रकृति-भामिनी-भ्रुकुटिजालेनेव, कादम्बिनी-हास-करम्बित-बिम्बाधरेणेव, सुरपतिचापखण्डेनोपमण्डित ; वप्रक्रीड़ा-विमग्न-करि-कलभ-निवहेनेव, समर-निरत-यम-महिषमण्डलेनेव, सनिझरोड्डयन-तत्पर-पर्वतपटलेनेव, विद्युद्-वधू-निधुवन-वेला-विगलित-बाल-जालेनेव, गगन-रङ्गभवन-नेपथ्येनेव, विष्णुपद-पारावार-शैवाल-पुञ्जेनेव, वियोगिनी-दह्यमान-हृदयोत्थित-धूमनिकरेणेव, नभो-वल्लभा-कृष्यमाण-वसुमति-पयोधर-परिधान-समानेन, रति-श्रम-स्वेद-कण-क्लिन्न-प्रकृति-कामिनी-वसनेनेव, गगनार्पित-वसुधा-कुचकञ्चुकेनेव, अवगाहनोत्थित-विबुध-कन्या-निष्पीड्यमान-जलार्द्र-केश-कलापेनेव, मदन-महोत्सव-गेहवितानेनेव, महोमहीधरस्तन-नख-क्षत-गोपन-साधन-भूत-मृगमद-लेपेनेव, अनिलान्दोलित-कदली-दलेनेव, भल्लूक-गण-परिपूर्ण-विचित्रालयेनेव, विस्फुटिताग्नेयास्त्रसमुद्भूत-धूम्रजालेनेव, कलिकालकृत-कुकर्म-कलनेनेव, परिपीड़ित-जनानुक्रोशेनेव, जलधरपटलेन पर्यावृतः; सघन-घनान्धकार-गमन-रताभिसारिकयेव, प्राणनाथजलधर-हृदयदेश-विपरीतरतिरत-प्रगल्भयेव, जलदानन्दभवन-नृत्य-परायण-नर्त्तक्येव, जलधर-गजमस्तक-परिचालिताङ्कुशलतयेव,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गगन-कानन-निर्दह्यमानाग्नि-ज्वालयेव, मुग्धा-घनावगुण्ठनातिक्रान्तस्मितिरेखयेव, वृन्दारक-कन्याऽऽकुञ्च्यमानघन-कच-कान्तिकयेव, प्रिय-गवेषणारत-विरहिणी-कर-गत-दीपिकयेव, नयन-निमीलन-केलि-निमग्न-सुर-कन्यकयेव, वल्लभ-दर्शन-लोभ-वारितघन-मुखपट-मुग्धयेव, रतिविमर्दित-वधू-कुचगलित-हारलतयेव, चित्र-रचना-सक्त-चित्रकारतूलिकयेव, मेघ-महिषासुर-संहार-निरत-चण्डीखड्गलतयेव, क्षण-विलासिनीकविकल्पनयेव, काव्य-प्रणयन-परायण-कवि-लेखिन्येव, विद्युल्लेखया समालिङ्गितः; सघन घन-गर्जन-भयभीत-प्रियतम-कण्ठाश्लिष्ट-मानिनीजनः; नृत्य-संलग्न-शिखण्डि-मण्डलः, विघटमान-केतकी-गर्भरेणु-पिञ्जरितः, प्रवहन्निर्झर-झङ्कार-रव-बधिरीकृतदिगन्तरः, घोर-गर्जनसन्त्रस्तपलायमान-बालिका-चिकुर-जाल-पतितमालती-नीप-जाति-कुसुमनिकर-करम्बित-सकलमार्गः, रसोच्छलित-तरङ्गिणि-तरङ्ग-भ्रूभङ्गः, चतुर्दिग्दर्दुरध्वनि-मुखरितजलाशयो वर्षासमयः समाजगाम ।

सिद्धार्थोऽपि रसाप्यायित-हृदयदेशो विलासवेश्म प्रविवेश । तत्र स हीरक-वन्दनस्रगलङ्कृत-द्वार-निवहे, नीलमणि-निर्मित-पर्यङ्क-कुसुम-कोमल-शयने, निर्दह्यमानागुरु-धूप-गन्धाकुले, सम्पृक्त-मधुकर-दम्पती-परिमृदित-कुसुममाले, चन्दनरसाभिषिक्त-सिन्धुवार-कुसुमचामरोपवीज्यमाने, शुक-सारिका-रतिकलह-कलकलायमान-पञ्जरजाले, पिक-कलरवाभिवृष्यमाण-पञ्चमरागपीयूषे, परितः सुवर्ण-यष्टिकाधिष्ठित—नृत्यन्मयूरे, यन्त्र-धारा-पतन्मणि-किरण-निकर-निर्मित-सुर-राजचापपटले, चन्द्रातप-धवल-वितत-विताने, हिमालयस्य हृदय-देश इव, लक्ष्मी-प्रणयागार इव, कलाधर-कलोद्भवभूमिभाग इव, पञ्चबाण-बाण-घर्षणशाणतट इव, हर-हुताशन-तप्त-मदन-विश्रान्तिस्थल इव विलास-गृहे निजेनैव कान्ति-किरण-कलापेन चरणचारणार्थमागतेनाप्सरोगणेनेव सखीजनेन परिवृताम्; रक्तांशुक-प्रच्छदपट-प्रावृतस्य पर्यङ्कस्योपरि सुधा-फेन-पुञ्ज-धवलोपधाननिविष्ट-भुजलतावष्टम्भेनावस्थिताम्; सरोवरनिमग्नां पद्मिनीमिव, अम्बरैकदेशे विलसन्तीं कौमुदीमिव, हिमालयोत्सङ्गे प्रवहन्तीं जाह्नवीमिव, क्षीरसिन्धौ निषण्णां लक्ष्मीमिव, धवल-कल्लोल-चामर-कलापैरुपवीज्यमानाम्, रत्न-खचित-भित्तिभागेषु विविध-प्रतिबिम्बच्छलेन प्रतिस्पर्धिनीभिः सुरसुन्दरीभिः सेर्ष्यं समवलोक्यमानाम्; नख-किरण-व्याजेन रागं समुद्गिरन्तीम्; कुटिल-भ्रुकुटि-लेखया मन्मथ-चाप-चापल्यं चूर्णयन्तीम्, कुवलय-श्रेणी-दीर्घ-कटाक्षैर्नीलोत्पल-काननमिव कक्षं प्रकुर्वतीम्, त्रिभुवन-लोभनीय-लावण्य-जलनिधौ कुच-कुम्भ-बलेनेव तरन्तीम्; नाभि-पीयूष-कुण्ड-हर-हुताशन-जनित-तापस्य शिशमयिषया समवतरण-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शीलस्य मनोभवस्य सोपान-पङ्क्ति-कल्पां त्रिवलीमादधानाम्, पृथुल-नितम्ब-मातङ्ग-मस्तकारूढ़-कटिपञ्चाननाम्, मदनमन्दिरद्वारावस्थित-कदलीस्तम्भायमान-जघन-युगलाम्; त्रिभुवन-जित्वर-मदन-काञ्चन-पदककल्प-तिलक-कलित-ललाट-पट्टाम्, सौन्दर्य-सागरोद्गत-विद्रुमाधरोष्ठाम्, रत्नशालामिव भास्वर-मणि-दशन-मयूखधवलित-दिग्भागाम्, वापिकामिवाधर-पल्लवरस-लोभागत-भ्रमर-वारण-व्यापृत-क्वणित-कङ्कण-कर-कमलाम्; प्रावृड्वेलामिव कालागुरुमलिनपयोधराम्, वीथिकामिव पुष्पस्तवकस्तनमण्डलशोभिताम्, कल्लोलिनीमिव कल्लोल-कलकल-क्वणित-रशनाम्, आवर्तनाभिञ्च; शरत्सुन्दरीमिव परिपूर्णसुधाकरमुख-मण्डल-मण्डिताम्, कादम्बिनीमिव विद्युत्कुसुम-गुम्फित-घन-कच-कलापाम् मधुमास-लक्ष्मीमिव विविधपुष्पाभरणमण्डिताम्, लीलाकमलैः परिहासरतसखीजन-ताडन-जनित-हास्योत्फुल्ल-कपोलभागाम्, निर्मलाम्बरामप्यशरदम्, कामफल-प्रदामप्य-कल्पवल्लरीम्, प्रियतमां व्यलोकयत् ।

अपरमिव मन्मथं सिद्धार्थं समवलोक्य ससम्भ्रमोत्थान-श्रम-जनित-स्वेदार्द्र-तनुवल्लरी सम्राज्ञी यथाकथञ्चिदुत्थाय राजानं सत्कृतवती । राजापि तामवनत-मुखीं वेपथुमतीं समुपवेशयन् तस्मिन्नेव पर्यङ्के समुपविवेश । तया सह चिरं चिक्रीड च ।

ततः सुरपतेराज्ञया प्रेरिताः देव्यस्त्रिशलयाः अङ्गेषु निवासञ्चक्रुः । धृत्या वक्षःस्थलं, कीर्त्या मुखमण्डलं, बुद्ध्या मस्तिष्कं, ललाटं वर्णमातृकया, ह्रियानयस्थानं, लक्ष्म्या कुक्षिस्थानं चाधिकृतम् ।

तस्मिन्नेव समयेऽच्युतेन्द्रोऽपि देवदेहं विहाय धरित्रीं लक्ष्यीकृत्य चचाल । ततः "हे महाभाग ! गम्यते चेद् गम्यतां ध्रियताञ्च नवजीवनम्, सानन्दं वसुन्धराऽऽ-मन्त्रणं स्वीक्रियताम् । भवतो वियोगे स्वर्गस्तु शून्यो जातः । धरातलमेव स्वर्गीयताम् । प्राच्याः दिशो दिवाकर इव त्रिशलायाः गर्भाज्जन्म लब्ध्वा संहर जगतः सकलान्धकारम्" इत्येवंप्रकारैर्देवानां जयजयकारमिश्रैः स्तवनकुसुमैः सुरकन्यकानां मङ्गलगीतैश्च सम्मानितः हर्ष-विषादशून्यः सोऽच्युतेन्द्रस्त्रिशलागर्भं आषाढस्य सिते पक्षे षष्ठ्यां प्रविवेश । त्रिशलापि परमानन्दपीयूष-पानसुखमन्वभूत् ।

ततो निश्चेष्टशरीरा सम्राज्ञी निद्रायां निममज्ज । सिद्धार्थोऽपि तस्मिन्नेव शयने शयनसुखमवाप ।

निद्रा-निमग्ना सती सा भाग्यशालिनी स्वप्नलोकं प्रविवेश । आशा-कुसुम-कल्पानि, शची-प्रेषित-रमणीय-चित्राणीव षोडश-स्वप्न-दृश्यानि क्रमशोऽवतीर्णानि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र। तथाहि—सर्वप्रथमं सा सौन्दर्येण सौभाग्यसुखं विकिरन्तं पुण्यावतारमिव, मूर्त्तिमन्तं सत्याङ्कुरमिव, सत्ययुगस्य बीजावापमिवैरावतकुञ्जरं व्यलोकयत्। तिरोहिते च तस्मिन् व्योमखण्डं समुज्ज्वलयन्, जलनिधिजलं दुग्धीकुर्वन्, कान्तारं रजताकारे रञ्जयन्, निखिललोकं प्रकाशमयं विरचयन्, वृषभो दृष्टिपथमायातः। तदनन्तरं घोषगम्भीरतया गगनतलं बधिरीकुर्वन्, घनाघन-घटाडम्बरमुत्क्षोभयन्, सकल-गिरि-कन्दर-द्वाराणि परिपूरयन्, समुच्छलित-लाङ्गूलमुल्लोलयन्, पञ्चाननोऽवलोकितस्तया सौभाग्यवत्या। इन्द्रजालचपले तस्मिन्नप्यन्तर्हिते सति मृदुल-हास्यज्योत्स्नापह्नुत-सकलान्धकारा, नूपुर-रव-मुखर-महीमण्डला, कटाक्षच्छलेन सौभाग्यपुण्याणीव विकिरन्ती गज-युगलाभिषिक्ता लक्ष्मीः पुरस्तात् प्रकटिताभूत्। ततो देवाधिप-वल्लभायाः वक्षःस्थलशृङ्गारभूतमिव, पीयूषनिर्झरमिव, विबुधाधिराजचापमिव रमणीयं हारद्वयं नेत्र-विषयीकृतं त्रिशलया मन्दार-कुसुम-गुम्फितम्। हारापहारे सति पीयूषशरावमिव सुरलक्ष्म्यार्पितं, पायसपरिपूर्णपात्रमिव देवोपहृतनैवेद्यं, चन्द्रमण्डलं बन्धुभ्रान्त्या महिषीमुखमण्डलं चुचुम्ब। नयन-पथमतीतवत्यां शशधरच्छायायां सा निर्गलत्सहस्रकिरणापह्नुतसकलान्धकारं, शोषितापार-पारावार-पानीयं, प्रचण्डताप-द्रावित-पर्वताधिराजप्रस्तरखण्डं, दीप्तिमन्तं दिवाकरं ददर्श। मुहूर्तादनन्तरमानन्दसागरे सन्तरन् मीनयुगलं समदृश्यत। ततस्त्रिशलायाः समभ्यर्चनार्थं सुसज्जिताविव काञ्चनकुम्भौ लक्ष्म्याः पयोधरौ जहसतुः। ततः कल्लोल-कलकल-कैतवेन जल-लक्ष्मी-नूपुर-रव-रणितं, वैकुण्ठमिवालम्बित-पुण्डरीकलोचनं, विस्तरेण सागरमपि हसन्तं, निर्मलसरोवरं दृष्टवती सा। तदनन्तरमाकाशमण्डलमिव सतत-सन्निहित-मत्स्य-कुलीर-कलापं विविध-तरङ्गोत्ताम्यत्तरङ्गिणीवल्लभं, रत्नराशिं विकिरन्तं जलनिधिं व्यलोकयत्। तस्मिन्नप्यगोचरे संवृत्ते हिमाद्रि-तुङ्गोत्तुङ्गं सिंहासनं प्रत्यक्षमाजगाम। समवततार च सम्मुखं भास्वरं सुरविमानम्। ततो नागेन्द्रभवनं महिष्यामनुरागं व्यधत्त। ततो रत्नराशिस्तदनन्तरं निर्धूमपावकश्च प्रकटयाम्बभूव। एवं षोडश स्वप्नानन्तरं पूर्वं समागतो गजाधिराज एव तस्याः मुखमण्डलं प्राविशत्। गजराज-व्याजेन भाविनस्तीर्थङ्करस्य प्रवेशेनातिनिर्भरां तृप्तिमतन्वत सा सिद्धार्थदेवी।

प्राची-जननी-क्रोडगत-कन्यकेव, प्रियतमचुम्बित-कपोल-राग-प्रक्षालन-निरत-सुरयुवतिरिव, अरुण-किरण-कलित-जलनिधि-तरङ्गमालेव, गगन-क्षेत्र-नक्षत्र-विहङ्गम-निर्वासन-परायण-रक्तांशुक-कृषककिशोरीव, उडुगण-दीपकोपशमनार्थं प्राणवल्लभालिङ्गित-विबुधललना-करयुगल-विकीर्यमाण-कुङ्कुमराशिरिव, कुसुम-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृदुलशयन-शयित-रतिपरिमृदित-मुग्धेव, समासन्न-पाणि-ग्रहण-गन्धर्व-कन्या-तनु-लता-लेप्यमानोद्वर्त्तनपङ्क्तिरिव, बहुवल्लभ वल्लभ-विडम्बित-रोषारुणा खण्डितेव, कुञ्जान्निर्गमनं विदधती, प्रोषित-प्रेमि-जन-चित्र-निर्माण-परायणा प्रेमिकेव, दूरी-कृत-तिमिर-वसन-वसुधा-नग्न-पर्वतस्तन-मण्डल-पयःपानं कुर्वती बालिकेव, विरह-वेदनां विसोढुमशक्नुवाना निरन्तर-रुदितारुण-नयन-मुखमण्डला काचिद् विरहिणीव, रक्त-प्रच्छदपट-प्रावृत-नितम्ब-विनिद्रिततरुणीव, गगन-सरोवरावगाहनरतराज-हंसीव, रक्तपद्म-पराग-रञ्जिता, समुद्धूतान्धकार-कर्म-विपाक-पावन-मुमुक्षु-मोक्ष-सरणिरिव, वसन्तालिङ्गित-नवपल्लव-मण्डित-कल्पपादप-वाटिकेव, रविचन्द्रोदयास्तच्छल-समुन्नति-पतन-पिशुनता-विचक्षण-विधिलेखेव, उद्दाम-रति-क्रीड़ा-व्यासक्त-सुरदम्पती-तनुराग-रञ्जिता कुसुमशय्येव, सुधाकर-ग्रहणोत्कण्ठित-धावन-निरत-निर्जर-कन्यकोच्छलज्जघनशाटिकेव, समुन्मद-कामिनी-गण्ड-सीधु-वर्षित-मदिराधारेव, विकसित-नवपलाश-वनस्थलीव, अमराङ्गना-पद्मरागनिर्मित-दोला-पङ्क्तिरिव, प्रज्वलदाग्नेयास्त्रज्वाल-जालिकेव, शृङ्गार-रस-परिप्लुतशरीरा महाकविकवितेव श्रीमत्युषादेवी व्यजृम्भत ।

गगन-सरोवर-नक्षत्र-मौक्तिक-कवलन-संलग्न-मराल-कुल-नायक इव, ताम्य-त्तुमुल-तिमिरमातङ्ग-मस्तकारूढ-मृगाधिराज इव, विरहविकलविरहिणी-दग्धहृदयदेश इव, मानिनी-मानापनोदनकेन्द्रचिबुकसंस्पर्श-पटुकरपुटः कश्चि प्रणयीव, किरण-कर-निकरापवारितावगुण्ठन-मुग्धा-मुख-कमल-चुम्बितुकामः कामीव, नक्षत्र-लोष्ठ-प्रहार-निर्वासितनिशा-जार-चन्द्र-विद्वेषी-दिवाकरोऽप्युदया-चलमारूढः ।

दिनकरागमनभयभीत-विधु-गोपन-परायां प्रतीच्याम्, कुत्रचिन्नष्टे कुमुदिनी-नाथे कुमुदिन्यः मूर्च्छां सम्प्राप्य पातिव्रत्यं प्रदर्शयामासुः । आकाशस्थली-ललना-रतिश्रम-जनित-नक्षत्र-स्वेदकणान् ममार्ज । श्रीखण्डशैलानिल-सुस्पर्श-पुलका-ञ्चिता लता ननृतुः । वितत-हिमकण-व्याजेन महावीरावताराऽऽशास्रुतस्नेहाश्रु-परिप्लुता इव संवृत्ता जगतीवधूः, कुलवध्वः कपोल-कुच-मण्डल-नख-दन्त-क्षत-चिह्नानि गूहयन्त्यो निधुवनशय्यां तत्यजुः । वनेचराः निद्रां विहाय जगर्जुः । विद्याभिलाषिणोऽध्ययने, कवयः काव्यप्रणयने, गृहिणो गृहकार्ये च दत्तावधानाः बभूवुः ।

इतो दासीजनाः देव्याः द्वारदेशमास्थाय प्राभातिकं मङ्गलगीतमगायन् । सम्राज्ञि ! जागर्तु भवती, तिमिरजालमाकुञ्च्य समुदीयमाना श्रीमत्युषादेवी,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शय्यां विहाय विनिद्राणा भवती च परस्परतुलामधिरोहताम् । चञ्चल-कनीनिक-नयन-युगलं ते प्रचलित-भ्रमरं कमलमुपहसतु । प्रभाकरप्रभया पद्मानि तव स्मितिरेखया चास्माकं हृदयानि विकासभावं भजन्तु । कुञ्चितालकं ते मुख-मण्डलं विलोक्य सकलोऽपि लोकः संहृततमस्कं सुधाकरं स्मरन्तु । तव हृद्य-गमनोपलब्धि-लाभ-लालसाः राजहंसाः बहिः प्रतिपालयन्ति । स्वकीयैर्मधुरवचोभिः कोकिला-कर्कशाऽऽलाप-प्रहारेभ्यो रक्षास्माकं श्रवणविवराणि ।

इत्थं प्रकारेण दासीनां गीतध्वनिमाकर्ण्य त्रिशलाऽजागरीत् । परिचारिका शयन-सदनं प्रविश्य शय्यायां विकीर्णानि पर्युषित-कुसुमानि चिक्षिपुः । परिधान-भूषणानि च यथास्थानं सन्निवेशयाञ्चक्रुः । सम्राज्ञी सुस्नात्वा जिनदेवांश्च समभ्यर्च्य शृङ्गारकक्षं प्राविशत् । ततः सभास्थानगमनोचितं वेष-भूषा-परिग्रहं विधाय स्वप्न-वृत्तान्त-निवेदनार्थं सभामण्डपमयासीत् । प्रविश्याऽसावलोकसामान्याकृतिं, समुन्मिषन्त्या देहकान्त्या धवलीकृतसभास्थानं, निदाघसमयमिव प्रचण्डदिवाकर-प्रभावाक्रान्तभूमण्डलम्, पूर्णमिव सकलकलाधरम्, वर्षाकालमिव धारासम्पात-शमितसमग्रजनसन्तापम्, शरदृतुमिव निर्मलाम्बरम्, पञ्चाननमिव केसरालंकृतशिरोभागम्, शिशिरमिव प्रियङ्गुमञ्जरीशुभ्रवर्णम्, मधुमासमिव कुसुमधवल-तिलककलितललाटपट्टम्, दिवसमिव भास्वन्-मौक्तिक-किरण-मिश्रितपद्मराग-भूषम्, त्रिलोचनमिव भस्मधवलशरीरम्, रत्नाकरतटमिव विविधरत्नालंकृतम्, काननमिव सिंहविष्टरोपशोभितम्, नर्मदाप्रवाहमिव वेतसयष्टिप्रावारितम्, मयूरमिव विस्फुरच्चन्द्रककमनीयम्, त्रिदशतरुमिव विबुधगण-परिसेवितम्, मैनाकपर्वतमिव अविदित-पक्षपातम्, गगनदेशमिव विस्फुरिततारकरमणीयम्, मातङ्गराजमिव सततदानप्रवृत्तम्, सन्ध्यासमयमिव तिमिरजालगुडाकेशम्, वट-वृक्षमिव छायापनोदित-निखिलजनसंतापम्, प्रातःकालमिव बालारुण-मुखमण्डलम्, सत्याङ्कुरैरिव दशनमयूखैः स्नपयन्तं सभासद्गणम्, गङ्गाप्रवाहमिव हंसमिथुनसनाथ-वक्षोदुकूलम्, ग्रहमण्डलमिव ध्रुवप्रतिबद्धम्, कुद्धमिव रक्तमुख-पङ्कजम्, महाकविश्लोकमिव कोमलकान्तचरणरमणीयम्, शीतप्रकृतिकमपि शत्रु-जनसंतापकारिणम्, निर्मलमपि मलिनीकृतवैरिवनितावदनमण्डलम्, कलाधरमप्य-सुधाकरम्, बुधमप्यग्रहम्, विदेहमप्यकुसुमायुधम्, सुमित्रोपेतमप्यदशरथम्, महा-सेनानुगतमप्यपशुपतिम्, महावंशप्रभवमप्यनर्मदाप्रवाहम्, लक्ष्मीप्रसूतिमप्यसागरम्, अनवरतदानशीलमप्यमातङ्गराजम्, सर्वविद्यावधूनां वल्लभं धर्मावतारं, निरहङ्कारं, निर्मत्सरं, तपोमूर्तिं, सामन्तसहस्रमध्यवर्तिनम्, कुलपर्वतमध्यस्थितं नगाधि-राजमिव; नक्षत्रमण्डलान्तर्गतं चन्द्रबिम्बमिव, करिनिवहपरिवेष्टितं गन्धगजमिव;

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विविधरत्नाभरणच्छुरितच्छटालंकृतशरीरं; सुरपतिचापर्चचितजलदखण्डमिव; अत्युच्चासने विराजमानम्, उदयाचलशिखरे देदीप्यमानं भास्करमिव; उभयतश्चामरवाहिनीवारवधूदीर्घकटाक्षस्नपितदेहम्, निर्गतप्रतापाङ्कुरैरिव, चरणनखकिरणजालैर्धवलितमणिकुट्टिमम्; चन्दनस्थासकखचितबाहुदण्डम्; परिधृतपीयूषफेनतुल्यधवलपरिधानं हिमाच्छादितं नगपतिशृङ्गमिव; चन्द्रातपधौतभूमण्डलमिव; सुगन्धितचन्दनरसानुलिप्तवक्षःस्थलं मलयाचलमिव; भागीरथीप्रवाहधवलितभारतभूभागमिव; अनेकमणिखचितमुकुटालङ्कृतशिरोदेशं, शिखरस्थितदिवाकरम् उदयाचलमिव; त्रिपुण्ड्रकालङ्कृतललाटभागं स्रोतोजलपरिप्लुतशिलातलाचलमिव; अपरभारतशङ्कया जाह्नवीधारयेव हारलतया कृतवक्षःपरिवेशम्, बद्धाञ्जलिर्वैतालिकगीयमानप्रतापम्, शुकसारिकाजप्यमानपावननामाक्षरम्, महाप्रभावं सिद्धार्थमपश्यत् ।

समयोचितशृङ्गारां त्रिशलां समवलोक्य सर्वेऽपि सामन्ताः, सभासदः, सेनापतयश्च द्रुतगत्याभ्युत्थाय स्वागतं व्याजह्रुः । राजाऽपीषदुत्थाय वामासनोपविष्टीकृतां तां स्नेहार्द्रगिराऽऽगमनकारणमपृच्छत् । ईषल्लज्जावनतानना सम्राज्ञी पत्युर्वचनं श्रुत्वेदमब्रवीत्—'प्राणनाथ ! मयाद्य रात्रौ विस्मयकारकाः षोडश स्वप्नाः समवलोकिताः । तेषां फलादेशपरिज्ञानार्थमेवाहमत्रागतवती भाग्यविधातारं जीवनाधायकं च भवन्तम् । कृपयार्द्रचित्तभवन्मुखारविन्दादहं सर्वमेतत् श्रोतुमिच्छामीति क्रमशः स्वप्नवृत्तान्तं निवेदयामास ।'

एतदाकर्ण्यान्तःप्रमुदितो भूपतिर्मुहूर्तमात्रं मौनं व्यालम्बत । ततोऽसौ गद्गद-गिराऽब्रवीत्—'प्रेयसि ! श्रूयताम्, श्रावयामि ते स्वप्नफलादेशम् । युगस्यान्तिमस्तीर्थङ्करस्तव कुक्षेर्जन्म लप्स्यते । स्वप्नच्छलेन गरिम्णो गुणा एवैते । तथाहि—गजावलोकनेन सुपुत्रस्य मातरमवेहि त्वमात्मानम् । दृष्टो वृषभस्तनयस्य ते धर्मधुरन्धरतां व्यनक्ति । केसरिणा तव गर्भस्थस्य शिशोर्निस्सीमशक्तिः प्रत्याय्यते । लक्ष्मीस्तवात्मजो मुक्ति-लक्ष्म्याः प्राणवल्लभो भविष्यतीति सङ्केतयति । सुगन्धित-कुसुममालिकाभिस्तस्मिन् तीर्थङ्करे समग्रजगतः पावनस्नेहस्य भाजनताभिव्यज्यते । कलाधरकला महात्मनस्तस्य त्रिविधसन्ताप-निवारकत्वं मोहान्धकारविध्वंसकत्वं च निगदति । स स्वयमेव निस्सम्बलतपसा ज्ञानार्जनं विधाय ज्ञानेशो भविष्यतीति निवेदयति देदीप्यमानो दिवाकरः । मीनयुगलव्याजेन सन्ततेर्भाग्यविकासमवेहि । स विषयतृष्णां शमयितुं पीयूषकलशो भूत्वा समवतीर्णोऽस्तीति पूर्णकुम्भौ व्यमाताम् । विकचकमलालङ्कृतसरस्तस्याष्टोत्तरसहस्रगुणागारत्वं बोधयति । रत्नाकरो ब्रवीति यदसौ ममेव गम्भीरतमो विचारकः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मर्यादापालको महाधीरश्च भविष्यति । विचित्रसिंहासन-दर्शनेन तस्य भगवतस्त्रिभुवनाधिपत्यं व्यज्यते । देवविमानकैतवेन स त्रिविष्टपं विहाय तवोदरे प्रविष्टो जातः । नागेन्द्र-भवनस्यापि फलमतीव मनोहरं यत् स रत्नत्रयमादायैव संसारेऽस्मिन् समवतरिष्यतीति । रत्नराशिस्तस्येश्वरस्य गुणवत्तां संसूचयति । जाज्वल्यमानेनानलेनेदमेव प्रबोध्यते यदसावेव तपस्याग्नौ वसुकर्मणां हवन विधास्यतीति । एतदस्ति ते स्वप्नानां फलम् । प्रसीद मुञ्च निराशाम् । हेमन्तकालो गतः, वसन्तसमयश्चागतप्रायः । साम्प्रतं गर्भोपयोग्यानि करणीयानि क्रियताम् । वीरप्रसविनीषु भवादर्शरूपा । मयापि सभा विसृज्यते । मन्दिरे-मन्दिरे सिद्धचक्रस्य पूजनं विधीयतेऽद्यारभ्य ।

आशातीतं स्वप्नफलमाकर्ण्य प्रफुल्लितवदना सम्राज्ञी विनम्रशिरसा प्राणनाथं प्रणम्य सखीभिः सहैव स्वान्तःपुरं जगाम । ततः षट्पञ्चाशद् दिक्कुमार्यस्तस्याः समाराधने दत्तावधानाः बभूवुः । काचित् कनक-कलश-निर्गत-जलधाराभिः स्नपयति ताम् । गुम्फति च वेणीबन्धे मणिरत्नानि काचित् । एका लोचनयोः कज्जलमलङ्कृत्य नीलकमलयोरुपहासपात्रतां प्रमाणयति । अपरा चिकुरजाले सिन्दूर-रेखा-रचनया सेन्द्रचापं जलधरपटलमुपहासयति । कयाचिल्लाक्षारागरञ्जिते चरणसरोजे प्रभातातपरक्तौ किसलयौ विडम्बयतः । कयाचिल्ललाटपट्टे विरचितेन सौभाग्यतिलकेन सा सबालारुणप्रभातवेलेव लक्ष्यमाणा प्रस्तूयते । सुकेशी तस्याश्चिबुके तरलं तिलं विलिखति । मञ्जुहासिनी करनखाग्रभागेषु नखरञ्जनिकां विरचयति । काचिच्छाटिकाञ्चलं चूर्णगन्धेन सुरभीकरोति । काचित् सितचूर्णेन मुखमण्डलं स्रवदमृतरसं सुधाकरबिम्बं विदधाति । एकया रत्नालङ्कारैरलङ्कृता सा जलधिवेलेव विलोक्यते । अपरया कुन्तलकलापे सुगुम्फितं पुष्पस्तवकं जलदपटले सुरपतिधनुरिव प्रतिभासते । कयाचित् परिचारिकया कर्णयुगले कुण्डले समारोपिते, येन सा समुद्यदिन्दुमण्डला प्रदोषवेलेव हृदयमावर्जयति स्म । कयाचित् सुलोचनया तस्यास्तिलकुसुमसुनासिका नासाऽभरणेन मण्डिता, येनास्याः मुखमण्डलं नक्षत्रानुगतं तुहिनांशुबिम्बमिव प्रतीयते । कयाचिदलङ्कृतेन हीरकहारेण गङ्गाऽप्यायित-हिमाद्रिशृङ्गमिव वक्षस्थलं शोभते तस्याः । काचिद् भुजलतयोर्भुजबन्धमलङ्करोति । सुमध्यमार्पितेन कङ्कणेन व्यालालिङ्गितश्चन्दनद्रुम इवाभाति भुजस्तस्याः । काचिदङ्गुलीषु स्वर्णाङ्गुरीयकं परिदधाति । कयाचित् नितम्बिन्या मेखलया तस्याः कटिकेसरी नियम्यते । काचित् तस्याश्चरण-सरोजे सहंसकीकुरुते । काचिद् अधरोष्ठौ रक्तौ विधाय बिम्बफलमधरयति । काचित् कर्पूरजलेन गन्ध-द्रव्य-पात्राणि वासयति तस्याः । एका पालितौ कलहंसकौ कमल-मधुतृप्तौ करोति । अन्या पञ्जरस्थां कोकिलां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सहकार-कोरकाङ्कुरं खादयति । केतकी-कुसुम-परागैर्वल्लरीः परितो रचयत्यालवालं काचित् । काचित् मधुरगीतेन, काचिद् वाद्यस्वरेण काचिच्च नृत्येन मनोरञ्जनं व्यदधीत् तस्याः ।

वियोगिनी-शून्याऽऽवास-गृह-प्रज्वलित-प्रदीपैरिव, चिर-प्रोषित-प्राणनाथ-समागमोत्कण्ठित-विभावरी-वधू-विकीर्ण-सुस्वागत-कुसुमैरिव, चिर-प्रतीक्षा-निरतानन्त-निर्निमेष-लोचनैरिव, रजनी-रमणी-कुन्तल-कलाप-ग्रथित-कुरवकैरिव, गगन-सरोवरावगाहन-निमग्नामर-कन्यका-जनैरिव, त्रियामा-वामा-कुच-पट-चित्रकैरिव, सुरति-श्रान्त-रजनी-तनु-लता-स्रुत-स्वेदकणैरिव प्रथम-समागम-खेद-खिन्न-रात्रि-नववधू-नयन-क्षरदश्रुजालैरिव, मदनान्ध-प्रियतम-विमर्दित-निशा-हृदय-त्रुट्यमाण-हीरक-हारैरिव, यामिनी-कपोल-सज्जिताभ्रक-कणैरिव, प्रियतम-चुम्बित-निशीथिनी-गण्डस्थल-दन्त-क्षत-चिह्नैरिव, नृत्यत्तिमिर-मयूरोत्तानित-शिखण्ड-मेचक-चयैरिव, निशाकर-शुभग्रन्थि-बन्धन-महोत्सव-हेतुक-गगन-मण्डप-विकीर्ण-लाजैरिव, नभो-नील कमल-पतित-हिमकणैरिव, व्योम-विटपि-शाखा-सञ्चय-पुष्पायमाण-पारिजात-प्रसूनैरिव विबुध-गङ्गा-प्रवाहोत्थित-बुद्बुदैरिव, अवगाहन-रतसुर-सुन्दरी-नितम्ब-जर्जरित-देवापगा-समु च्छलित-जल-बिन्दुभिरिव, गगन-पुष्कर-विकसित-कुमुदैरिव व्योम-वेदिका-विकीर्ण-पूजा-तण्डुल-पटलैरिव, विधुराऽऽकाश-दह्यमान-हृदय-समुत्थ-विस्फुलिङ्गैरिव नक्षत्रैः परिपूर्ण-गगन-मण्डला, प्रकृति-प्रमदा-हास्य-विलासेनेव, गगना-पसारित-वसुन्धरा-कण्ठाऽऽभरणेनेव, तपस्विनी-करकङ्कणेनेव, त्रियामा-कपोल-कृत-दंशन-चिह्नेनेव, कुसुम-गुम्फित-रात्रि-वधू-धम्मिल्ल-बन्धेनेव विभावरी-बाला-पद-पतित-नूपुरेणेव, नवबालिका-लेह्यमान-नवनीत-खण्डेनेव, तिमिर-मणिधर-मस्तक-मणिनेव, गगनाधिराज-ललाट-पट्ट-मुकुटेनेव, शैत्य-नैल्य-कपटसुख-दुःख-मिश्रितेन जगद्भाग्येनेव, सुरतान्त-श्रान्त-यामिनी-परिपीयमान-पीयूष-परिपूर्ण-चषकेणेव, गहनान्धकार-दानव-दल-दलनोद्यत-राहु-रिपु-चक्रेणेव, सौन्दर्य-प्रतियोगिता-प्रथम-चन्द्रिका-सुन्दरी-प्राप्त-नामाङ्कित-रजत-पदकेनेव, जगदवलोकन-कुतूहल-विकल-सुर-दम्पती-विमानेनेव, गगन-सागर-सक्रिय-जलयानेनेव, रजनी-रमणी-भाल-तिलकेनेव, रूप-माधुर्य-विलोकन-निरत-निशा-सुन्दरी-कर-गृहीत-मुकुरेणेव, पायस-परिपूरित-पात्रेणेव, गगन-रङ्गभवन-वितत-वितानेनेव, भ्रमर-भूषित-कमलेनेव, कज्जल-कलित-यामवती-मुख-मण्डलेनेव, सुधाकरेण संवर्धित-शोभा-विलासा, रोहिणी-वदन-दीप्ति-रेखयेव, रति-परिमृदित-मन्दार-मालिकयेव, पवन-प्रकम्पित-कल्प-मञ्जरी-पराग-तत्येव, नन्दन-वन-पतित-पुष्प-पङ्क्त्येव, चन्द्र-मौलि-वन्दित-चरण-कुण्डलिनी-गात-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शक्त्येव, द्विजराज-राज्य-रजत-जयन्त्येव, चन्द्र-कपाल-घृत-धूप-पूजित-मन्त्र-साधना-तत्पर-योगिन्येव, वल्लभ-विरह-व्यथित-यक्ष्येव, प्रियतम-हृदय-हरिणावलोकन-जनितेर्ष्या-कलुषित-विमानायमान-रोहिण्येव, त्रिनयनानिल-दग्ध-मनसिज-भस्म-पाण्डुर-वर्ण-रति-रमण्येव, स्वर्ग-ललना-गण्ड-सीधु-सेक-प्रवाहित-सुधा-धारयेव, प्लवमान-नक्षत्र-दैव-परिपूर्ण-त्रिदश-तरङ्गिणी-समुच्छलज्जल-मालयेव, वल्लभ-वियोग-पीड़ापनोदन-चन्दन-चर्चित-देवाङ्गनयेव, चन्द्रिकया समाचुम्बिता, विकचो-त्पलनयना, गलद्घन-वसना, हंसावतंसालङ्कृता, वासना-शालि-शालि-क्षेत्र-गोप-कन्यका-गीयमान-गीत-मनोहरा शरत्सुन्दरी वसुन्धरायामवततार।

सिद्धार्थोऽपि प्राणवल्लभां विलोकयितुमन्तःपुरं प्रतस्थे। तत्रायान्तं प्रियतमं विलोक्य परिहासतत्पराभिः सखीभिः परिवृता त्रिशला शिष्टाचारनिर्वाहार्थमासना-दुदतिष्ठत्। करपल्लवाभ्यां समुपवेशयन् प्रेयसीं सिद्धार्थोऽप्यासनैकदेशमलंकृत्या-ब्रवीत्—प्रेयसि ! मां प्रसादयितुं किमर्थं क्लेशयसि मृणालतुल्यान्यङ्गकानि ? भाग्य-शालिनि ! त्वं युगनिर्मातुर्जगतो भाग्यविधातुश्च भारं वहसि। जगदीशगर्भायाः जगद्वन्द्यायास्तव नोचितः प्रणामः। तव पुण्यसन्दोहैर्भागधेयैः प्रभावितोऽहं स्वयमेव ते धन्यवाद-प्रदानार्थं समागतोऽस्मि। नेदानीं ते समुदाचारो रोचतेऽस्मभ्यम्। नातिचिरेणैव लोकोऽयं भवदीयगर्भादवतीर्णं जिनेन्द्रं युगस्योपहाररूपेण प्राप्स्यति। त्वमद्य जगदाधारस्याप्याधारभूताऽसि। अतो न शोभन्ते ते विनया-दिकाः व्यवहाराः। मुक्तिलक्ष्मीर्यस्यालिङ्गनाय समुत्कण्ठिता वर्तते स स्वयमेव तव कुक्षौ प्रविष्टोऽस्ति। नूनं त्वया रवि-चन्द्रातिशायिनी कापि प्रभा समधिगता। भवती स्वयमेवानन्यसाधारणा। किमहन्ते ज्ञानमार्गमुपदिशेयम्। सर्वज्ञदेवस्य जननि ! विरम। प्रसीद सुन्दरि ! जानीहि मेऽवितथं वचनम्। ज्ञानिनो जन्मवेलायां महिलासमाजप्रधानभूतायास्ते कियानसौ शुभः क्षणो भविष्यति ? तस्मिन् समये पुलोमजासहिताः समस्ता देव्यो भवत्याः शुश्रूषायां तत्पराः भविष्यन्तीति मन्ये। अतश्चिन्तां जहि। षट्पञ्चाशद्भोगेषु षड्रसेषु यत्ते रोचते तत् समास्वाद्यताम्। विविधफलरसेषु यदभिमतं गृह्यतां तत्। चन्दनोद्वर्तनतैलादिपदार्थेषु सुकुमारतरं यत् तत् सेवनीयम्। जिघ्र घ्रातव्यानि वस्तूनि। तृप्तिप्रदं ताम्बूलं स्पृश्यताम्। यथेच्छं सङ्गीतप्रभृतिकार्यक्रमाय मनोरञ्जनसाधनाय निदेशकारिणः आज्ञा-प्यन्ताम्। भ्रमणाय वा यत्रकुत्राऽपि तेऽभिलाषः, समादिश, व्यवस्थां कुर्य्याम्। भूषणेषु परिधानेषु च यदपि तेऽभिमततरं विज्ञाप्यताम्। रुच्यनुसारं भोगान् भुङ्क्ताम्। किमधिकं समादिशतु भवती, स्वयमेवाहं प्रतिक्षणं तव सेवायां तत्परो भविष्यामीति।

२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रियवचनमुपश्रुत्य लज्जावनतमुखी त्रिशलाऽवोचत्—प्राणनाथ ! किमर्थं मे व्यर्थं मानं वर्धयसि ? अलमलीकप्रशंसया । व्रीडितास्मि संवृत्ता । भवतां प्रबलतर्काणां नाहमबला समुत्तरं दातुं प्रभवामि । वाञ्छामि भवादृशं वचन-प्रावीण्यम् । भवादृशीं वक्तृकलाञ्चोपलब्धुं प्रार्थयामि दैवम् । दासीयं भर्तुर्वचसां विरोधे स्थातुं न शक्नोति । किं कुर्याम् । स्वयमेव सन्तुष्टस्य प्राणवल्लभस्य किमहं प्रियं करवाणि ? कर्त्तव्यमूढास्मि । मदीयसौभाग्यस्य श्रेयःपात्रं भवानेव । भवच्चरणकमलाराधनयैव मया मन्दभागिन्या जगदाराध्यो देवः कुक्षिगतः कृतः । स्वर्णिमप्रभातं विना प्राची कथं सूर्यं प्रकटयिष्यति ? जलं विना सरसी कथं नाम सरसिजं समुल्लासयेत् । अतो मां सेवार्थमाज्ञापय । भवान् भावश्चेत्तदाहं भाषास्मि । भवान् दानी चेतदास्मि याचकस्याभिकामना । त्वं न्यायदेवोऽसि स्खलनास्म्यहम् । भवन्तः पूज्याः भवच्चरणरजोरेखास्मि चाहम् । त्वं काम-देवोऽसि भूषास्मि दासी तव । त्वं दिवाकरोऽसि मनोज्ञोषास्म्यहम् । भवन्तः राकेशकल्पाः इयमस्ति रोहिणी । त्वं देवोऽसि पूजास्मि चाहम् । मम सन्तप्त-वसुन्धरायाः भवानेव तापहरो जलधरः । नास्ति मेऽङ्गेषु पीड़ा क्लेशो वा । मुञ्च चिन्ताम् । सर्वदाहं भवच्चरणपङ्कजरजोऽनुकम्पामेव कामये इत्युक्त्वा सा भर्तुश्चरणयोः प्रणनाम । ततो, राज्ञी राजा च पृथक् पृथक् शय्यायां शयनं चक्रतुः । एवं प्रकारेण सिद्धार्थो दिवसे राजकार्यं विधाय रात्रौ चान्तःपुरमागत्य शेतेस्म ।

एकस्मिन् दिवसे छायाः इव सर्वदा त्रिशलासेवायां दत्तचित्ताः परिचारिका देव्यः पुरस्ताद् विविधा जिज्ञासा अकुर्वन् । सिद्धार्थप्रियतमापि यथायथं समाधानं चकार । तथाहि—

स्वामिनि ! केन कारणेनैते प्राणिनो दुर्भरं क्लेशं लभन्ते ?
वत्से ! ननु दुष्कृत्यपरिणामपापोदय एव कष्टावतारहेतुः ।
भर्तृदारिके ! दुःसहं दुःखमनुभूयापि कथमिव विवेको न जागर्ति ?
पुत्रि ! व्यामोहान्धकारपटलपरिव्याप्ते मस्तिष्के न जायते विवेकाविर्भावः ।
देवि ! कथं न लोकोऽयं व्यामोहतमःपटलं परिहरति ।
परिचारिके ! वैराग्यमन्तरेण न दृश्यते तमसावृतं स्वकीयं हितद्वारम् ।
कल्याणि ! कथय मे वैराग्यप्रभवम् ।
भीरु ! नेदं सम्भवं वास्तविकीमात्मिकानुभूतिं विना ।
सम्राज्ञि ! किमस्माभिरपि मुक्तिसुखोपलब्धिः कर्तुं शक्यते ?
वत्से ! शृणु, नात्र नारीणामधिकारः ।
जननि ! किमबला वस्तुतोऽबला मुक्तेरुपलब्धौ ?
ननु अबलानां मनसो दौर्बल्यमेव वर्तते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुभे ! तर्हि वयं शाश्वतं दुःखाम्बुधौ समालीनाः संवृत्ताः ।
हताशे ! न ह्ययं विचारणीयं कदाचित् । पुरुषपर्यायं लब्ध्वा भवतीभिरपि परमार्थः समुपलब्धुं शक्यः ।
सौभाग्यवति ! कथं न मनसोऽनुकूलः पर्यायो मिलति ?
मुग्धे ! न कण्टकेभ्यः पुष्पाणि लभ्यन्ते ।
ज्ञानवति ! ननु कथं तत्त्वानां परिचयः सम्भवति ?
विमले ! श्रद्धानमेव तत्त्वावगमहेतुः ।
श्रद्धामयि ! किं केवलया श्रद्धयापि परमार्थः साध्यो न वा ?
सरले ! संज्ञान-चारित्रभूषितया श्रद्धया साध्यते परमार्थः ।
तत्त्वज्ञे ! न किमपि तत्त्वं सन्देहास्पदम् ।
अयि ! सन्देहविहीनतैव जिनेशविवेचनस्य माहात्म्यम् ।
सत्यवादिनि ! कथं तेऽवितथवाचो भवन्ति ।
श्रूयताम्, केवलं ज्ञानं सर्वेषां विषयाणां परिचयं प्रददाति ।
मातः ! किमस्ति जिनवरो समताविहीनः ?
सुमुखि ! नैवम्, वीतरागस्यास्य सर्वेषु जीवेषु समाना समता ।
"कुलप्रतिष्ठे ! किन्न प्रभुतामदो मदयति तमीश्वरम् ?
सरले ! का प्रतिष्ठा का चाप्रतिष्ठेति नास्ति विचारगन्धोऽपि जितेन्द्रियाणाम् ?
भावार्द्रे ! किं भगवान् पूजकमपि न स्निह्यति ?
तरले ! नासौ पूजकं स्निह्यति न च निन्दकमभिद्रुह्यति ।
भाविनि ! न स क्षुत्पिपासाभ्यां परिपीड्यते ?
सुगात्रि ! वर्ततेऽसौ भूतविजयी कालजिच्च ।
देवि ! किं स देहं न स्निह्यति ?
बाले ! न केवलं वपुः प्रत्युत जीवनमपि नाकाङ्क्षति ।
भगवति ! कथं नासौ क्रोधेनाभिभूयते ?
नास्ति तस्य कश्चिद् विरोधी ।
भावयित्रि ! किन्न स कदापि किमपि च कामयते ?
विचारिके ! कृतकृत्यजीवनोऽसौ कं नवीनं पदार्थमभिलषेत् ।
इत्थं तीर्थङ्करजननि-देवीभ्यामनेकानि प्रश्नोत्तराणि सञ्जातानि ।

अथ विकसितसहकारमंजरीसौरभाकृष्टभ्रमरगणगीयमानमदनविजयमहोत्सवः, विचरत्कलहंसमिथुनपदचिह्नाङ्कितपवनवेगपतितपुष्परेणुपटलचित्रितवासन्तीदुकूल-संवर्धितवनसुन्दरीशोभाविलासः, पुष्पाण्यालिङ्ग्य मधुरमकरन्दपानमत्तमधुप-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वालानुभूयमान-लता-हिन्दोलदोलनसुखः, विजृम्भमाणनवनलिनमकरन्दपानरत-भ्रमरगणरवझंङ्कृतदिगन्तरः सुकोमलरसालकलिकाकलापवर्द्धितकामुकोत्कलिकः, मदमत्तयुवतिगण्डसीधुसेचनरोमाञ्चितवकुलविपिनः, सुरभितमलयसमीरजव-प्रज्वलितमदनानलदह्यमानपथिकवर्गः, रमणवसतिगमनरतकामान्धरमणीनूपुर-झङ्कारसहस्रमुखरः, सघनपुष्परेणुसैकतपुलिनधवलीकृतधरातलहृदयदेशः, कोमल-रसालमञ्जरीनिलीन-समुन्मदकोकिलालापरतकोकिलालोडितकुसुमरसबिन्दुनिकर-क्लिन्नपरागपङ्किलभूमण्डलः मन्मथास्फालितचापशरप्रहारविदीर्णमार्गगहृदय-स्रुतरुधिरार्द्रीकृतपलाशकाननः, अतिक्रान्ततटरतिरसपारावारप्लवप्लावितभूतलः, विकसितनवनलिनकुमुदकुवलयकह्लारकमनीयसरोवरः, मधुकरभारभुग्न-किञ्जल्कजर्जरपुष्पोपहाररमणीयलतामण्डपः, मदमत्तमयूरनिकरकेका-रवत्रस्तविषधरपरिमुक्तशिशिरचन्दनवीथिकः, रतिक्लान्तयुवतितनुलतास्रुतस्वेद-कणापहारकः विलुलितवालिकाकुञ्चितचिकुरसंहतिः जर्जरितदलत्कुवलयसरो-वरतरङ्गमालः, कुरवकस्तवकव्यतिषिक्तधवलितभ्रमरवृन्दः, कामाग्नि-भस्मकल्पपुष्परागसन्तप्तपथिकव्रजः, मन्मथप्रेषितक्रुद्धाङ्गनामानापनोदना-नुनयगीतरतभ्रमरीदूतीजनः, कोकिलोपदेशप्रतिबोधितनिर्मात्सर्यवल्लभार्पित-हृदयानन्दितप्रियजनः, मधुकरव्याधवाद्यमानवीणाश्रवणकुतूहलनिश्चलाध्वग-हरिणवर्गः, कमलभ्रान्तिभ्रमितागतभ्रमरदंशिताधरपल्लव-पीडासहरोदनशील-मुग्धानुनयनिरतवल्लभजनः, मधुपगणझङ्कारभयभीतप्रियतमालिङ्गितचिरप्रता-रितप्रणयिवर्गः, कामदेवसम्मोहनचूर्णसन्निभपुष्परेणुपटलोन्मत्तीकृतसकल-जीवलोकः, मानिनीनां मानमपनोदयन्, युवकेषु रागोत्कलिकां समुल्लासयन् पथिकजनान् सम्मूर्च्छयन्, वियोगिनीनां चेतांसि विदारयन्, विषधरफूत्कृतिजनित-गरलमिश्रितदक्षिणानिलेन विरहिणां हृदयदेशेषु विरहज्वालां प्रज्वालयन्, शम्ब-रारिबलिदीपिका इव चम्पककोरकावलीर्विकासयन्, कोकिलकूजितैर्मानिनीजनान् भर्त्सयन्, समीरलोलमुकुलनिलीनभ्रमररवव्याजेन वियोगिनो जनांस्तर्जयन्, कुसुमायुधाय वाणानर्पयन् विरहिजनदुरन्तो वसन्तो विरेजे ।

एवं कदाचिदुद्यानशोभादर्शनेन, कदाचिद्-धार्मिककथाप्रसङ्गविनोदेन, कदाचित् विविधधर्मग्रन्थावलोकनेन, कदाचित् चित्रावलोकनजनितहर्षातिरेकेण कालं यापयन्ती सम्राज्ञी विद्युद्गर्भा जलदमालेव रत्नाभ्यन्तरात्मा धरित्रीव, ससरसिजा सरसीव गर्भभारेण शुशुभे । नवमो मासोऽपि व्यतीतः । चैत्रमासस्य शुक्लपक्षे त्रयोदश्यामुत्तराफाल्गुनीगते सुधाकरे रोहिणीनक्षत्रे, सोमवासरे, सिंहलग्ने शुभे च मुहूर्त्ते विद्युत्प्रकाशमिव मेघमाला दिवाकरमिव प्राची, पूर्णचन्द्रमिव पूर्णिमा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिशला सुतमसूत । बालस्य तस्यानन्यसाधारणस्य जन्मसमये मन्दसुरभितशीतलः पवनः सञ्चचार । दिनकरोऽपि चन्द्र इव लोभनीयो जातः । सर्वे जीवाः विगतमात्सर्यभावा अभूवन् । सूर्योदये पद्मिनीव सकलापि जगती विकासमभजत् ।

चटुलनूपुररणितपादपद्मा, मधुरसमाचारविज्ञापनव्यग्रान्तःकरणा दासीजना महाराजान्तिकमभिगम्याब्रुवन्—महाराज ! त्वरयतु जन्ममहोत्सवाय । कृतकृत्या वयम्, फलितं चास्माकं भागधेयम् । पूर्णा नो मनोरथाः । राजापि दासीजनवाक्यमुपश्रुत्य पीयूषसरोवरे निमग्न इव संजातः । राजमुकुटं वर्जयित्वा सर्वाण्याभरणानि वस्त्राणि चापि दासीभ्यः प्रददौ । अथ समुत्सारिताशेषपरिजनः सिद्धार्थः पुत्रदर्शनार्थं प्रसूतिकागृहं प्राविशत् । तत्रासौ विकीर्णविविधकुसुमविहितपूजाकार्येण, शिखरदेशजाज्वल्यमानदीपकसहस्रेण, रसालपल्लवदूर्वाङ्कुरसनाथमुखमङ्गलकलशोपेतेन, मधुलोभागतभ्रमरभूषितवन्दनमालालंकृतेन द्वारदेशेन विराजमाने, हरिद्राद्रवमिश्रिततण्डुलपवित्रीकृतवेदिकापरभागे निर्दह्यमानागुरुधूमपटलसङ्कुले, चन्दनद्रवरचितविविधदेवमूर्त्तिस्वर्णफलके, बहुविधमङ्गलसामग्रीमण्डिताभ्यन्तरभागे, अनेकपुरन्ध्रीवर्गारब्धमधुरगीतमनोहरे, विहितशिशुरक्षाविधाने, ग्रथ्यमानधवलकुसुममाल्यसङ्कुले, अविच्छिन्नपठ्यमानर्षभदेवनामसहस्रे, निश्चलशिखैर्घृतदीपकैरुद्भासिते, गीयमानविविधस्तोत्रपाठे सूतिकागृहे, लम्बमानमौक्तिकमालालंकृतमणिदण्डस्य, पुण्यसिन्धुफेनपटलपाण्डुरकौशेयवितानस्याधस्तात् शशाङ्कखण्डघटितकोमलपर्यङ्के, प्रसवखेदखिन्नमूर्त्तेस्त्रिशलाया क्रोडगतम्, बालरविमिव स्वप्रभापाटलीक्रियमाणलोकम्, नवोदितचन्द्रमण्डलमिव निखिललोकनयनकुवलयाह्लादकरम्, हिमाचलमिव हिमशीतलशरीरम्, निद्राविकारमिव सकललोचनग्राहिणम्, नारायणमिव लक्ष्मीविभूषितवक्षःस्थलम्, शरत्समयमिव धवलीकृतराजहंसम्, निदाघकालमिव प्रचण्डप्रभावम्, वसन्तावतारमिव सुमनोविकासकरम्, प्रदोषकालमिव प्रस्फुरत्तारकरमणीयम्, विषयमिव मनोहरम्, प्रातःकालमिव नूतनोदितसूर्यप्रभावकमनीयम्, शीतकालमिव मन्दीकृतदिनकरप्रतापम्, स्रोतोवहाप्रवाहमिव चञ्चलदृक्तरङ्गम्, मानससरोवरमिव विकसितपुण्डरीकलोचनम्, विष्णुमिव शङ्खचक्रकलितकरम्, ब्रह्माणमिवाधःकृतराजहंसम्, शम्भुमिवार्धचन्द्ररमणीयललाटदेशम्, कामदेवमिव मकरकेतनकरम्बितकरम्, सुवर्णमप्यकाञ्चनशरीरम्, सुरवधूकरपतितमिव देवकुमारम्, साक्षात् सौन्दर्यमिव धृतशरीरम्, धर्मावतारमिव कलिकालपापविनाशोद्यतम्, मूर्त्तिमत् पुण्यमिव, देहधरं जगद्भाग्यमिव, अभिनवकोकनदपादयुगलम्, करिकलभशुण्डोरुभागम्, सिंहशावककटिभागमनोहरम्, वृषभशिशुककुदस्कन्धप्रदेशम्, पद्मरागमणिनिर्मिततगवाक्षकपाटमिव वक्षस्थलमादधानम्,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्मथमात्तङ्गबन्धनाय सुवर्णार्गलायमाणभुजयुगलम्, कम्बुकण्ठम्, ध्वज-रथ-तुरगातपत्रशङ्खचक्रमत्स्यकमलालङ्कृतकरतलम्, रक्तोत्पलकलिकाधररुचकम्, दुन्दुभिगम्भीरघोषम्, समुन्नतगरुड़नासिकम्, विघटमानरक्तकमलललित-मुखमण्डलमनोहरम्, विकसितपुण्डरीकनयन-निर्गच्छत्किरणजालधवलितवास-भवनम्, ऊर्णासनाथं ललाटदेशमुद्वहन्तम्, पाटलवर्णकेशराशिव्याप्तशिरोमण्डलतया बालरविकिरणाकुलितं जलजातमिव, सिन्दूरसमाजितकुम्भस्थलं करिकलभमिव, ईषदुत्पन्नसटाभारभूषितं सिंहकिशोरकमिव, सुरतरुपल्लवरसैरिव सन्ध्यातप-लोहितचन्द्रकिरणैरिव, सुरपतिचापच्छेदैरिव निर्मिताङ्गकन्दम्, अनेकजनप्रावा-रितमप्यनन्यम्, त्रिशलागर्भजमपि सद्वंशोत्पन्नम्, नदीनमप्यसागरम्, पद्मामोदक-रमप्यदिवाकरम्, अर्धचन्द्ररमणीयललाटमप्यशङ्करम्, ऊर्णासनाथमप्यमेषम्, विबुधप्रावृतमप्यनाकलोकम्, पाटलमपि कृष्णालोकम्, विलासमहिंसायाः, पोतं भवसागरस्य, वृक्षाधारमिव क्षमालतायाः, सागरमिव करुणानद्याः, सूर्यं मोहान्ध-कारस्य, स्थैर्येण गिरिराजमिव, गाम्भीर्येण सागरमिव, तेजसा सवितारमिव; आह्लादने सुधाकरमिव, नैर्मल्ये गगनमिवात्मजं ददर्श। निर्निमेषाभ्यां स्नेहाश्रु-परिप्लुततारकाभ्यां दूरविस्फारिताभ्यां नेत्राभ्यां चुम्बन्निव, आत्मसात्कुर्वन्निव पुत्राननं कृतार्थं मेने स्वात्मानम्।

इति मङ्गलायतने सिद्धार्थनृपतितनयवर्धमानसम्भवं
नाम प्रथमं सोपानम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वितीयं सोपानम्

सुधावलेप-धवल-भवन-प्रसृत-प्रभा-पयोधारा-धौत इव विविध-वन्दन-माल्य-मिष-सुरपति-चाप-शोभित-गगनदेश इव, जगत्त्रय-तृष्णां शमयितुं विधि-विनिहितामृतपात्र-सदृश-मङ्गल-कलश-परिपूर्णे, निर्दह्यमानागुरु-धूम-निकर-करम्बिततया नृत्य-विगलित-बन्ध-कुन्तल-कलाप-नगरी-नागरिके, मलयज-रस-सिक्त-सलिलाभिषेक-सुगन्धित-सकल-सरणि-जाले, भवन-शिखर-पवन-विचलित-ध्वजाङ्गुलि-निर्भर्त्सित-सुर-सदन-सौन्दर्ये, कल्पतरु-कुसुम-ग्रथित-माला-मण्डित-रङ्ग-शाले, प्रज्वलित-विविध-मङ्गल-दीप-दीप्ति-देदीप्यमाने, नगर-बालिका-व्याकीर्ण-लाजावलीढे, सीमन्तिनी कर-कमल-विकीर्यमाण-कुसुम-प्रकरे, सुसज्जित-नृपति-सदन-चतुष्पथ-पथोपवन-रमणीयेऽपर इव विबुधभुवने कुण्डपुरे, विमुक्त-विविध-वन्दीजन-रहित-कारागृहैः, शुक-सारिका-कोकिल-रिक्त-सकल-पञ्जरजालैः, ऋणमुक्ति-लाभ-मुदिताधमर्णमण्डलैः, कृषिकरानधिग्रहण-प्रमुदित-कृषक-कलापैः, अत्यल्पीकृत-मूल्य-सुलभ-वस्तु-भाण्डार-लाभाऽऽनन्दित-ग्राहक-गणैः, आशातीत-द्रविण-लब्धि-विस्मित-भिक्षु-प्रकरैः, समभिनन्दित-भट-पण्डित-कलाकार-कलापैः, पक्वान्न-प्रतिग्राहित-धेनु-महिष-वायस-कुक्कुट-प्रमुख-जीव-निकरैः, वितीर्ण-मधुराशन-क्षुधित-मकर-मण्डलैः, प्रचुराऽऽहार-वसन-धन-दान-परितोषित-समग्र-मानव-समुदायैः, जलधर-जलकण-गणित-सुवर्ण-राशि-दान-चकित-भुवनत्रितयैर्विकासकार्यैः, प्रदर्शित-महामहिमा; विविध-वादन-ध्वनि-ध्वन्यमान-दिगन्तरेण, पिक-भाषिणी-मधुर-गान-रवाऽऽकृष्ट-सकल-पथिक-पटलेन, स्वर-लहरी-सुस्पर्श-निस्तब्ध-रत्नाकरेण, नाद-माधुर्य-मोहितार्धावलीढ-शष्प-परिपूरित-निश्चल-वन्दन-हरिण-निवहेन, दशनाग्र-निहित-शुण्डादण्ड-निश्चल-श्रवण-ताल-कुञ्जर-कुलेन, विस्मृत-सलिल-ग्रहण-कटि-निहित-कलश-जल-हारिणी-मण्डलेन, नृत्य-निरत-नर्तकी-नूपुर-रव-कपट-मदन-दुन्दुभि-ध्वनि-ध्वनिताध्वगणहृदयेन, चपल-नयन-कटाक्ष-कुसुमशर-शर-क्षीर्ण-दर्शकवर्गेण, जलधर-गर्भ-चपला-विडम्बि-तन्वङ्गी-तनुलता-चाकचक्याऽऽहृत-सकल-सहृदय-दर्शनेन, उन्मद-कलहंस-सारस-शुक-सारिका-कलरव-विमिश्रेण सङ्गीतस्वरेणोपबृंहितः मल्ल-मल्लयुद्ध-प्रकम्पित-धरणिमण्डलैः, नृत्यद्भल्लूक-दर्शन-भीतबालिका-रोदन-कलकलैः, विदूषक-प्रहसन-जनित-हास्य-निमग्न-दर्शक-वर्गैः, नृत्य-परायण-वानर-दर्शन-प्रमुदितबालगणकलकल-मुखरितैः, विविच्यमान-विविध-धार्मिक-कथा-प्रसङ्गैः, अभिनीयमान-नाट्याङ्ग-दर्शन-जनित-रससमाहित-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सामाजिकैः, विविधैः सांस्कृतिक-कार्यक्रमैः समुपशोभितः, ग्रहगण इव कलिसम्मेलनामोदितः, नाटकप्रसङ्ग इव पताकाङ्कमोदितः, काव्यालाप इव विविधरीतिप्रवर्तितः, संगीतस्वर इव निषादाधिष्ठितः, व्याकरणविचार इव पुरुष-विभक्ति-कारकादेश-सम्प्रदान-क्रियाप्रपञ्चितः, संग्राम इवानेकशस्त्रास्त्रप्रयोगप्रदर्शनभीषणः राजहंसमण्डलाधिष्ठितोऽप्यमानससरोवरः, सरस्वतीमण्डितोऽप्यप्रयागः, चित्रालंकृतोऽपि न नक्षत्रसमूहः, शश-मृगाश्ववृषभविहीनोऽपि चतुष्पादरहितः, पद्मिनीमोदितोऽप्यपद्माकरो जातस्तत्र पुत्रजन्महोत्सवः।

न केवलं धरायां स्वर्गेऽपि महोत्सवस्यास्य महती चर्चा समभूत्। गन्धर्व-नर्तकी-रथ-गज-तुरगसहितः सुरपतिः समुत्सवस्यास्य शोभां विलोकयितुं कुण्डग्रामेऽवततार। तेन सार्धं रम्भोर्वशी-मेनकाप्रभृतयो देव्योऽपि समाययुः। दिव्यदेवीनां दर्शनं विधाय सर्वेऽपि हर्षनिमग्ना अभूवन्। सर्वेषां दृष्टि-भ्रमरास्तासां मुखपद्मेषु संसक्ता बभूवुः। ताभिः प्रारब्ध-नृत्य-गीत-वाद्य-कौशल-प्रभावेण प्रतारिताः इवापह्रियमाणचेतनाः इव पीताः इव स्नाताः इव, सुधाकुण्डनिमग्नाः इव, सामाजिकाः स्वकीयानि भाग्यानि प्रशशंसुः।

इन्द्राणी प्रभुदर्शनार्थं गुप्तरूपेणान्तःपुरं प्राविशत्। सा तत्र मातुः समीपे युगनिर्मातारं विलोक्य मुदिता जाता। तं लालयितुं च करतलं स्फुरितं तस्याः। अतो मायाबलेन तया साम्राज्ञी शायिता कृत्रिमश्च शिशुस्तस्याः समीपे समुपस्थापितः। ततः सा स्वयं करकमलाभ्यां सद्योजातं कुसुमसुकुमारं कुमारं समादाय लोचनचषकैस्तस्य रूपामृतं पिबन्ती बहिर्निजगाम। सुरपतिरपि बालकं विलोक्य विस्मितान्तःकरणः संवृत्तः। तस्याः सकाशात् प्रभुमादाय स प्रियतमयैव सह जिनवरस्याभिषेकार्थं सुमेरुपर्वताभिमुखं प्रतस्थे। देवसेनापि तावेवानुजगाम।

सर्वेऽपि निर्निमेषलोचनैर्जिनेश्वरस्य रूपामृतं पिबन्ति स्म। वीतरागं विलोक्यापि समेषां हृदयेषु रागाङ्कुराः समुद्भूवन्। सौधर्माधिपतिर्महावीरं समादाय द्रुतगत्याभिप्रयाति। ईशानस्वर्गाधीश्वरो बालकोपरि राजच्छत्रं विस्तारयति। सानत-माहेन्द्र-त्रिविष्टपयोर्देवाधिपौ चामराणि समुद्वीजयतः। किन्नर्यो नरीनृत्यन्ते, गन्धर्वगणाश्च गायन्ति। पुलोमजा मङ्गलगीताऽऽचारं समाचरति। त्रिदशगणानां जयोद्घोषैर्दिगन्तराः गुञ्जायमानाः बभूवुः।

एते सर्वे सुमेरुपर्वतान्तर्गतं पाण्डुनामकं विपुलं विपिनं विलोक्य विश्रामं व्यदधुः। अनेक-जिनेन्द्राभिषेक-परिपूतभूमौ, तद्वसरानुरूप-समग्र-साधन-मण्डिते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एते सर्वे सुमेरुपर्वतान्तर्गतं पाण्डुनामकं विपुलं विपिनं विलोक्य विश्रामं व्यदधुः। अनेक-जिनेन्द्राभिषेक-परिपूत-भूमौ, तदवसरानुरूप-समग्र-साधन-मण्डिते मणिमयसिंहासने राजकुमारं न्यवेशयन्। उभयतो विबुधवृन्दानि महाभिषेक-कार्यार्थं बद्धपरिकराणि सञ्जातानि। ध्वज-च्छत्र-चामर-कलश-दर्पण-व्यजन-प्रभृतिभिर्मङ्गलद्रव्यैः परिपूरिता सुमेरुभूमिः। पटह-दुन्दुभि-गम्भीर-घोष-मुखरित-दिङ्मण्डले, निर्दह्यमानागुरु-धूम-पटल-मलिन-गगनदेशे, नृत्य-परायण-सुराङ्गना-चरण-विघट्टन-नूपुर-रणित-रमणीये कमनीयसमये सकलैर्देवैर्देवीभिर्देवाधिराजैश्च मङ्गल-कलशाः सुगृहीताः। शुभाभिषेककार्यं प्रारब्धमभूत्। जलधर-विकीर्ण-विन्दु-निपातैर्महीधर इव, दिनकर-किरण-कलापैः कमलाकर इवासौ मङ्गल-कुम्भ-विनिर्गत-सलिल-प्रवाहैर्भूयसीं शोभां बभार।

पुनश्चन्दनदारुभिः पावकः प्रज्वलितः। तस्य पवित्रतमार्चिर्मालायां दह्यमान-सुरभि-द्रव्य-धूमैः सर्वत्र सौरभं प्रससार। तदनन्तरं विबुधाधिपतिरष्टद्रव्यैस्तस्या-भिषेकमकरोत्। वृन्दारक-वल्लभ-वल्लभा ललाटपट्टे कस्तूरिका-चूर्णेन तिलकं व्यरचयत्। ततो लोचनकञ्जयोः कज्जलं, कर्णयोः कर्णिकारं, कण्ठदेशे हीरक-हारं, मनोरममूर्ध्नि मणिमुकुटं न्यधत्त। शुभाभिषेकानन्तरं स्तुतिं कुर्वन्तस्ते कुण्डग्रामं प्रत्याजग्मुः। कुमारमेनं त्रिशलायाः समक्षं स्थापयाञ्चक्रुश्च।

अत्र सुरपतेर्नाटकं भविष्यतीति महतीं चर्चां समुपश्रुत्य द्विजाः ग्रन्थमाला-ध्ययनाध्यापन-सपर्याप्रभृतीनि कार्याणि, क्षत्रियाः विद्वद्-भास्वर-शस्त्रास्त्र-देदीप्य-मान-सङ्ग्रामाङ्गणानि, वैश्याः विस्मृत-लाभ-हानि-भाव-समस्त-पण्य-वस्तूनि, शूद्राः वहु-वृद्धिकर-सुवर्णमयसेवावसरान् समुपेक्ष्य राजभवनं लक्ष्यीकृत्य द्रुत-गत्याभ्यधावन्। अहमहमिकया जनाः महति जनसम्मर्दे स्थान-ग्रहणार्थं निर्जग्मुश्च। त्रुटित-कञ्चुकसन्धि-सन्दृश्यमान-कुच-कुड्मलाः, विश्रृङ्खल-चिकुर-राशि-निपतित-पुष्पचयाः, स्खलित-मेखला-निरुद्ध-चरण-सञ्चरणाः शृङ्खला-निगड़ित-पादाः करिण्य इव; उत्ताल-ताल-हस्तैर्गगन-सिन्धु-कमल-पङ्क्ति-शङ्कां जनयन्त्यः, निपतत्सुमनोभरैर्ज्योतिरिङ्गण-विचरण-भास्वर-रजन्य इव, ईष-त्स्मिति-रेखा-धवलित-पुरोभागैर्देदीप्यमान-मृदुल-विलास-लोभनीया ऊषादेव्य इव, परिधावन-परिश्रम-स्रुत-स्वेद-कणवत्यो जल-बिन्दु-निकर-प्रवर्षण-निमग्न-नीरद-माला इव; बिपरीतभूषण-परिग्रहाः, शिथिल-दुकूल-सज्जाः, भ्रान्त्या कज्जले-नैव ललाट-तिलक-रेखां धारयन्त्यः, दर्शनीयाभरण-परिधान-सन्निवेशाः, जघन-वसन-नियमित-कच-कलापाः, विश्रृङ्खल-नीवीबन्धाः, सुसज्जिताः युवतयः, रत्नाकरान् इव सरत्नभूषान् प्रभात-प्रभाकर-प्रभा-भास्वर-नगपति-शृङ्ग-भागान्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इव मुकुट-खचित-मणि-देदीप्यमान-भाल-प्रदेशान्, दिक्कुञ्जरान् इवानवरत-दानजलाभिषिक्त-करभागान्, चन्द्रोदयान् इव निखिल-दर्शक-गण-नयनानन्द-प्रदान्, दिनकरान् इव निज-प्रताप-ध्वस्ताराति-भटान्धकारान्, युवकगणान् चकर्षुः ।

चरण-निक्षेप-रणित-नूपुर-वाचालितदिगन्तराभिः, सवेगोत्थापितचञ्चल-रत्नकङ्कणमुखरित-भुजलताभिः, गिरिपति-शृङ्ग-प्रवहन्निर्झरानुकारित्रुट्यमान-हारलताशून्यस्तनतटाभिः, विलुलित-चिकुर-जालपतित-कुसुमैर्घरित्रीं छादयन्तीभिः नर्त्तकीभिरनुगम्यमानः; परस्परघर्षण-केयूर-कोटि-पाटितांशुकेन, स्वेद-जल-धौताङ्गराग-रञ्जितमार्गेण, मुकुटखचितविविध-मणिनिर्मित-सुरचापेन राज-चक्रेण परिवेष्टितः, नृत्यपरायण-मूक-कुब्ज-किरात-वामन-वधिर-जडविकलाङ्ग-जनगणः, उत्तरीयपरिधाना वद्धकण्ठावकर्षणव्याकुलवृद्धवृन्दः, वीणावेणुमुरज-मृदङ्ग-घोषगम्भीरः, विगतवाच्यावाच्यकृत्याकृत्यदृश्यादृश्यविवेकः, उन्मत्त इव महान् जनसंमर्दो राजभवनं प्रत्याययौ ।

समग्रराज्यप्राङ्गणं परिपूर्णं समभूत् । प्रतिक्षणं जनसंघट्टः संवर्धते, कति-पयेष्वेव क्षणेषु तत्र जगत्त्रयमपि समवेतं सञ्जातम् ।

निश्चितसमयानुसारेण समग्रदेवाधिभूतस्य, शतमखपुण्यप्रभावप्राप्त-सुरलोक-सिंहासनस्य, सुरपतेः सकलसामाजिक-हृदयसमावर्जकम्, अलोकसामान्यसौख्य-सन्दोहम्, सर्वाङ्गजीवनादर्शभूतं रमणीयं नाटकं प्रारब्धमभवत् ।

सर्वे सामाजिकाश्चित्रलिखिता इव खनिता इव उत्कीर्णा इव विस्मृतस्वकीय-परकीयपरिचया अविदित-समस्तवन्धुवर्गा नाटकं पश्यन्ति । प्रिया प्रियं, प्रियः प्रियां, माता पुत्रं, पुत्रो मातरं, सुहृद् सुहृदं सहचरश्च सहचरं विसस्मार । सर्वेऽपि निर्निमेष-दृष्ट्या देवा इव वभूवुः । अभूतपूर्वम् अभाविनं च नाटकं ज्ञात्वा मनसा, वचसा, कायेन च नान्यत्र कुत्राऽपि तैर्विचेष्टितम् । सर्वेभ्यः सांसारिकप्रपञ्चेभ्यो मनो निरुध्य ब्रह्मणीव नाटकदृश्ये सुस्थिरं कृत्वा योगिवृत्तिः समालम्बिता ।.........................सुरपति-कृतानि महाभिषेकोत्सव-दृश्यानि दरीदृश्यन्ते सर्वतः । प्रसूतिसदनात् वहिरानीतं सुरेन्द्रेण सर्वथोन्नतैरावत-पृष्ठारूढम्, तदनन्तरम् इन्द्राणीकृतशृङ्गार-समृद्धशोभाविलासं, कुण्डग्रामावतार-विधिकरं च जिनवरं ददृशुः ।

ततः सुरपतिना नाटके तस्य जिनपतेः पूर्वभवचरितानि प्रदर्शितानि । तथाहि-सर्वप्रथमं विविधवन्यपशुपक्षिविघातकम् पुरुरवाजन्मवृत्तान्तम्, मुनिसदुपदेश-प्रभावमद्यमांसपरित्याग-सौधर्मलब्धस्वर्गसौख्यम्, पश्चाद् भारतभूमिभूषणभूत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भरतात्मजरूपम्, मरीचिनामधेयं सांख्यप्रचारनिरतम्, पुनश्च ब्रह्माख्ये पञ्चमे स्वर्गे सुखमनुभवन्तम्, ततः कपिलनामधेयब्राह्मणसन्तानभूतम्, तस्मिन्नेव जन्मनि संन्यस्तसमस्तसंसारविषयप्रपञ्चम्, परिव्राजकम्, तदनन्तरं देवराज-भवनसमाने भरद्वाजभवने, पुत्रसम्बन्धं प्राप्तवन्तं सांख्य-यतिवरम्, पुनश्च सोधर्मस्वर्गे स्वच्छन्दं विहरन्तम्, तदनु चाग्निभूतेः पवित्रमन्दिरे पुत्ररूपेण शोभावर्धकम्, साधुतां समवलम्ब्य स्वर्गप्राङ्गणं विभूषयन्तम् पुनः गौतम-संज्ञकस्य ब्राह्मणस्य गृहे धृतावतारम्, कृतसांख्यप्रचारम्, सुरपुरभृङ्गारं च, ततः साङ्कलायनस्य गृहेऽतीव पावनं धाम शोभयन्तम्, त्रिदण्डि-दीक्षां चादाय ब्रह्माख्यस्वर्गानन्दनिमग्नम्, ततश्च्युत्वा बहुकालं यावत् निगोदादियोनिषु बहुदुःखं भजन्तम्, पश्चाद् राजगिरिनामधेयायां नगर्यां शाण्डलेर्विप्रकुमाररूपम्, ततो माहेन्द्रनाम्नि स्वर्गे देवकुमारतां समाश्रयन्तम्, तत्राऽपि शुभायुः प्रपूर्य विश्वभूति-नामकस्य राज्ञो राजकुमारतां समवलम्बमानं तपस्विनम्, तदनु·······पोदन-पुरस्य राज्ञो गृहे त्रिपृष्ठनारायणपदं लब्धवन्तम्, विषयाऽऽसक्ततया नरकगामिनं, समस्त-जीवहिंसा-संल्लग्नसिंहशरीरं, पुनश्च हिमगिरौ वनराजदेहवन्तम्, ततः सिंह-केतु-नामकस्य विहगेश्वरस्य ततः कनकोज्ज्वलं लावण्यशोभाधायकम् पुनश्चावधपुर्यां व्रजसेनात्मजतां स्वीकुर्वन्तम्, पुनः पुण्डरीकिन्या चक्रिपदं विभूषयन्तं, तपस्तप्त्वा लब्धद्वादशस्वर्गवाससौभाग्यम्, पश्चात् नन्दिवर्धनस्य नरपालस्य नन्दनाम्ना पुत्रेण प्रसन्नतां जनयन्तम्, ततः बद्धतीर्थङ्करं सुरधाम्नि तदच्युतपदं समाश्रयन्तम्, पुनश्चेह धरायां पवित्रितत्रिशलामन्दिरं महावीरवृत्तान्तं दर्शयामास ।

भगवतो महावीरस्य पूर्वभववृत्तान्तान् समवलोक्य सर्वेऽपि महाश्चर्यचकिताः सञ्जाताः ।

तदनन्तरं देवराजो विस्मित-समग्रदर्शकमण्डलम्, प्रतिक्षणनूतनाङ्गभङ्ग-जनिताकर्षणम्, नर्तित-सभासमस्तसभ्यम्, समग्रकलाकलितम् ताण्डवं प्रारेभे । यच्चावलोक्य कृतकृत्यमिव जीवनं मेने दर्शकवर्गः । सुरपतिरेकोऽपि सन् मणिमय-भित्तिबिम्बितप्रतिबिम्बच्छलेन बहुरूपः प्रतिभातितराम् ।

गन्धर्ववध्वश्चाऽपि निजाङ्गभङ्गापहृतचपलाशोभाः, विकीर्णकेशपाशपतित-कुसुमपिञ्जरितकुट्टिमभागाः, कम्पितकुचभरवेगस्फुटित-कञ्चुकिसन्धयः, रणितनूपुररणनव्याजविडम्बित--मरालीमानापनोदनचाटुकार-गीततत्परराजहंसाः, पवनविचलित--नीलकमल--कल्पनयन--कञ्जनिर्गतकटाक्षबाणप्रहारजर्जरित--तरुण-हृदया ननृतुः, काचिद् धरायां नृत्यन्ती सती गगनप्रदेशे नृत्यति, पुनश्च धरायामागत्य नृत्यं रचयति । काचित् तडिद्रूपेण नृत्यं विदधती दर्शकवृन्दनयनानि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समावर्जयति। काचिद् इन्द्रस्याङ्गुष्ठोपरि नाभि-सरोजं संस्थाप्य नृत्यति।

एवंविधं नृत्यं विलोक्य सर्वैरपि स्वर्गीयं सौख्यं समनुभूतम्। मानवयोनौ सद्भिरपि जनैर्देवसुखानामनुमानं कृतम्। बहुभिर्जनैर्देवयोनिप्राप्त्यर्थं मनोरथो विहितः। किन्तु सकलैरप्यस्य महोत्सवानन्दस्य कारणभूता राजदम्पत्येव भृशं प्रशंसिता। सिद्धार्थस्य त्रिशलायाश्च प्रमोदस्यापि सीमा नासीत्। उभावप्या-नन्दसागरे गूढं निमग्नौ बभूवतुः।

कलङ्कमिषमरकतमणिमण्डितधवलातपत्रेणेव, दानवनिपीयमानसुधापरिपूर्ण-शरावेणेव, व्यालास्वाद्यमानदुग्धपात्रेणेव, मृगमदर्चितप्रमदापयोधरमण्डलेनेव, मधुकरप्रावारितगगनजलाशयोन्मीलितपुण्डरीकेनेव, सुधाकरेण संवलिता; दनुज-निपीडित-धर्मपुरुषनयननीररेखयेव, द्विजराजराज्योत्सव-सञ्चिताभिषेकसुधाकलश-कलनयैव, भूमण्डलसुरतसमागमलालसाऽमरावतीहास्यविलासप्रकटदशनपङ्क्त्यैव, नक्षत्रमालयाऽलंकृता, रतिविमर्दित-मेदिनी-वक्षोज-हार-हीरकैरिव, कामकेलि-निलीन-प्रकृति-प्रमदा-तनुलतास्रुतस्वेदकणैरिव, निमज्जदुन्मदसुरबालाकुचाग्राघा-तोच्छलित-स्वर्गङ्गासीकरैरिव, सुस्नातसुरसुन्दरी-निष्ठ्यूतकवरीभारच्युतजल-बिन्दुभिरिव, वनिताविमलमुखकिरणजालचपेटा-प्रताडित-सुसमतेच्छुक-चन्द्रलोचन-जलैरिव, रोहिणीसङ्गसुप्तनिशाकरविलोकनजनितेर्ष्या-कलुषितरात्रि-सपत्नी-दृग्जलै-रिव, पवनप्रकम्पितनक्षत्रकुमुदानुस्यूतमकरन्द-कणैरिवाविरलपतितैर्हिमकणैः परिप्लुता।

निधुवनक्रीडाव्यासक्तविधुकिरणकरावकृष्टरात्रि-वधूकुचकञ्चुकेनेव, नक्षत्र-कुसुमग्रथितमहीसुन्दरीरतिविगलितबन्धकेशपाशेनेव, धरावधू-नीललज्जावगुण्ठने-नेव, नृत्यरततारिकाविलासकक्षवितानेनेव, रमणीनां मुखमण्डलोपमानार्थं विधि-करनिर्मलीक्रियमाणमृगाङ्क-कलङ्करसप्रवाहेनेव, उडुगणदीपककज्जलपुञ्जेनेव, स्वर्गसुन्दरी-विलासगृहनिर्दह्यमानागुरुधूमपटलेनेव, वियोगिनीकज्जलमिश्रित-दृग्-जल-प्रसरेणेव, विरहिणीवसुधासन्तप्तस्तनमण्डल-मृगमदलेपेनेव, प्रणयपत्र-लेखन-व्याकुलसन्ध्या-सुन्दरीकम्पित-कराघातावाङ्मुखपात्र-पतितमषीप्रवाहेणेव, विरहो-त्कण्ठितरात्रि-मुग्धा-प्रियतमपत्रपठन-जनित-स्नेहाश्रुधौतकज्जलराशिनेव, भावुका-ऽकाशकरग्रथित-मेदिनीकचकलापमयूरपिच्छपटलेनेव, चन्द्रपुण्डरीकरसलोभागत-मधुकरयूथेनेव, तारकगणचित्रक-चित्रितयवनिकापट्टेनेव, स्वर्गङ्गावगाहनरतामर-कन्यकाविततचिकुरजालेनैव, धराप्रगल्भवक्षोजसुप्तगगनमण्डलेनेव, उडुगणतक्षक-निर्मितनीलमणिभवनेनेव, भूतलकरावकृष्ट-नग्नतारिकावलिजघननीलवसनेव, -गगन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पर्यङ्कवल्लभ-हृदयसुषुप्त-रात्रिप्रमदाविकीर्णबालजालकेनेव, होलिकोत्सवोपलक्ष्ये समुन्मदतारकाभिवृष्यमाणनीलरागमिश्रितजलप्रवाहेणेव, रविवियोगव्याकुल-वसुधाकरगृहीतगरलेनेव, दयार्द्रदिग्वध्वा हृत्वा निक्षिप्यमाणेन, नक्षत्रतापस-परिवर्धितव्याप्त जटाजालकेनेव, धरित्रीयुवतिं लक्ष्यीकृत्य गगनकामिपातितनलिन-पर्णलिखितमदन-पत्र-पटलेनेव नक्षत्रजीवभुज्यमानभवयातनादृश्येनेव, प्रकृति-सुन्दरीभ्रुकुटिविलासेनेव द्विजराजं समुद्दिश्य कामान्धतारिकावलिवर्षितसकज्जल-कटाक्षप्रकरेणेव, तारा-गोपीनिरीक्ष्यमाण-श्यामलगोवृन्देनेव, दिग्गजकपोल गलन्मद-जलासारेणेव उडुगण-कण-मण्डितव्यालजालेनेव, नृत्यद्गगनमयूर-नक्षत्र-चन्द्रक-शिखण्डमण्डलेनेव तारिकाकलिकाकलितोर्ध्व-मूल-विश्ववृक्षपल्लवचयेनेव, तारिकाप्सरोगणालिङ्गनोद्यतदानवदलेनेव, कामान्धशशिकरविशीर्णरोहिणीनीवी-बन्धसूत्रसमूहेनेव, वसुधाधाचिकावितताञ्चलेनेव, प्रगाढान्धकारेणावलीढा विभावरी विभरांबभूव ।

पूर्वजलधिकल्लोलप्रक्षालितमध्यमागाद्, उदयाचलारूढसुधाकर-सुधाशीकरा-सारक्लिन्नमलयजपल्लवपटलात्, दिग्गजाहीनतुल्य-शुण्डादण्डावलूनविटपिशाखा-सञ्चयात्, पर्णपटलमध्यसञ्चरण-निरत-नक्षत्रमण्डलसहस्रगुणसंवर्धितकल्पतरु-प्रसूनात्, दिवसकरस्यन्दन नियुक्ततुरग-प्रखरखुराघातचूर्णितशाखासमूहाद् उदया-चलात्; लवणसिन्धुजलदेवताभिपूज्यमानभारतमातृचरणाद्, रावणभुजदण्डपरि-पालित-लङ्काकाञ्चनभवन-प्रभापिञ्जरात् अनवरतविविधदेशगमनागमनपरायण-व्यापारिमण्डलकलकलमुखरात् दशवदनापहृत-मैथिली-विरहपीडित-राघव-सहायक-नलनील-करतलाकलितपाषाणसहस्रसम्भूतसेतुबन्धात्, एलालतालिङ्गितलोध्र-लवलीलवङ्गपूगीनारिकेलकलापात्, जलनिधितरङ्गमालावलोकनभीत-पलायित-बालाविगलित-बन्धचिकुरजालपतित-कुसुमप्रकराकुलितमार्गाद्-दक्षिणप्रदेशात्,द्राक्षा-लतावेष्टिताक्षोटनारङ्गकदाडिमद्रुमवनाद्, उन्मद-पारस-रमणी-परिपीतो-च्छिष्टमधु-पानलोभागतमधुकरवृन्दाच्छादितशरावसङ्कुललतामण्डपात्, सन्ध्या-वक्षोजकुङ्कुमरागरञ्जित-दिनकरा-वगाहनलोहितसागरात्, सद्योमुण्डितमत्तहूण-मस्तकनारङ्गकजङ्गमवनप्रान्तात्, पवनातिशायितुरङ्गमप्रखरखुरप्रहारोत्थित-रेणुकणानवरतव्याप्तगगनमण्डलात्, क्षेत्रागतशुकगणोत्सारणशीलप्रौढकृषक-कन्योत्कटकुचाहतचूर्णितगोधूममञ्जरीकलापात् पश्चिमप्रान्तात्; जलधरपटल-यवनिकाच्छन्नद्वाराभ्यन्तररतिकेलि-निलीन--किन्नरमिथुनाङ्गरागसुगन्धितकन्दरात्, निहतगजगणगच्छन्मृगराज-नखजालपतितमौक्तिकपटलप्रपूरितवनप्रदेशात्, शार्दूल-गर्जनश्रवणभयभीतप्रलायमानचपलचमरी-बालव्यजन-व्रीजिताद्, विविधकुसुम-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मकरन्द--लिखितभूर्जपत्रमन्मथलेखार्पणानुकूलित--सुरकन्यकालिङ्गनाह्लादितत्रिदश-कुमारमण्डलाद्, उन्मद-मातङ्गकरावलूनसालद्रुमगन्ध-प्रसरसुरभितसमीरापहृत-रतिश्रमप्रमुदितयुवतिसमाजाद्, वायुवेगव्यथितकुङ्कुमप्रसरप्रस्तुतानवरतसन्ध्या-हृश्यरमणीयात्, हिमाच्छादितशिखरतया पुण्यप्रसूतादिव, धर्मक्षेत्रादिव, सरस्वत्याः विलासदेशादिव, चन्द्रलोकादिव सुधासागरादिव हिमालयाच्च समागतान् जनान् हुताशनदह्यमान-काञ्चन-धाराकारमाणिक्यकान्तिप्रवाहैः, प्रलयजलधरपटल-वर्षितशीकरसंख्याकहीरकहारैः गगनसरोवरविकचकुवलयकल्पनीलमणिभिः, विनिर्गत-कालिमकलाधरकलङ्ककालिमकलापैरिव वैदूर्यमणिभिः, नवोदित-दिवसकरकरनिकरविलासैरिव पद्मरागैः, अपरसन्ध्यारमणीयहृश्यमारोपयद्भि-र्विद्रुमवृन्दैः, दिनकरकरनिकररोधिमरकतप्रभानिर्झरैः अपारहर्षाम्बुधिकल्लोलजालै-रिवान्यान्यरत्नराशिभिरभिनन्दयन् स्फटिकमणिनिर्मितेषु पात्रेष्वर्पितैः षट्पञ्चाशत-प्रकारव्यञ्जनयुक्तैः, षड्रससमन्वितैराहारैः, मिष्टान्नैः, पक्वान्नैश्च परितोषयन् राजकुमारस्य नामकरणसंस्कारं प्रारेभे ।

'अस्मिन् राजनन्दने समुत्पन्ने सति मम कुलस्य भाग्यलक्ष्मीर्वृद्धिमापेदे । धन-धान्यपशुसौख्यादिभिश्च समृद्धमस्माकं साम्राज्यम् । अतोऽस्य राजकुमारस्य यथागुणस्तथा नामेति विचार्य वर्द्धमान इति नामधेयं रोचते मे । यदीदं नाम भवद्भ्योऽपि शोभते तर्हि स्वकीयानुमतिभिरनुगृहीतव्योऽहम्' इत्युक्त्वा स विरराम पार्थिवसत्तमः ।

'सुन्दरतमं नामेदं प्रतिभात्यस्माकं सर्वेषाम्' इत्युत्तरमुपश्रुत्य सिद्धार्थोऽतीव प्रमुदितोऽभवत् । जन्मकालिका सुषमा, मतिः, श्रुतिश्च प्रखरतामाययौ शिशोस्तस्य । जन्मजातमवधिज्ञानं वृद्धिमापद्यत । सुधांशुरिव, बालरविरिव, करिकलभ इव, सिंहकिशोरक इवासौ द्रुततरं प्रगतिं विकासं च प्रपेदे । तस्य सेवायां बहु-संङ्ख्याकाः परिचारिकाः नियुक्ता अभूवन् ।

वर्द्धमानः प्रत्यहं समानवयोविद्यागुणैर्गजशावकैरिव बालमित्रैः सार्धं क्रीडतिस्म । कदाचिद् भवनाङ्गणे जानुबलेन परिभ्रमन् धूलिधूसरितदेहः, कदाचिन् मणिकुट्टिम-प्रतिबिम्बितविहगवृन्दं गृहीतुमिच्छन् रमणीयाभरणरणित-शरीरः, भवन-मणि किरणजालाकुलीक्रियमाणदृष्टिः, स्खलितास्फुटमधुरवचनः, सततस्मिताननः, मुहुर्मुहुः परिजनैः क्रोडीक्रियमाणः कस्य मनसि विस्मयं नोत्पादयामास ?

स बाल्यकाले एव गम्भीरस्वभावः, प्रगूढविचारः सकलजन्तुशुभचिन्तकः, हिंसापराङ्मुखः, सर्वदासत्यभाषी, दयार्द्रचित्तः, समरसश्चासीत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकदा सञ्जयविजयनामकौ, जीवस्य पुनर्जन्मविषये सन्देहशीलौ, सर्वैरपि विद्वद्भिरनिराकृतशङ्कौ द्वौ मुनिनायकौ तत्राजग्मतुः। तौ महामतेर्वर्द्धमानस्य दर्शनेनैव निवृत्तशङ्कौ भूत्वा स्वगन्तव्यस्थानं निर्जग्मतुश्च।

मध्येसभमेकदा नृत्यव्यापृत-नर्तकीभिः परिवेष्टितः, चामर-वाहिनीभिः पर्यावृतः, देवैश्च स्तूयमानकीर्तिर्देवराजो विराजते स्म। सङ्गीत-सुधापानोत्सुका शचो, पाणि-पद्मावलम्बितप्रियतम-स्कन्धप्रदेशाः सुराङ्गनाश्चोपविष्टा आसन्। सङ्गीतान्ते पारस्परिक-वार्तालाप-मग्ना समग्रापि सभा मुखरिता बभूव। सुरपतिः सन्मतेर्मतिकौशलं, दिव्यशक्तिं, ज्ञानं च भृशं प्रशशंस।

एतच्छ्रुत्वा सङ्गमाभिधानो देवस्तस्य परीक्षार्थं कृतनिश्चयो बभूव। स सत्वरं कार्यसिद्ध्यर्थं कुण्ड-ग्रामं प्राविशत्। तत्र दिगन्तराल-विप्रकीर्णशाखा-सञ्चये, निलीनजलधर-पटलार्द्रीकृत-पल्लवे, शाखा-भुजालिङ्गित-वसुधा-वल्लभे, पत्रान्तर-विलीन-विहग-कुल-कलरव-वाचालिते वटवृक्षे, समान-विद्या-वयोभिर्देव-वालैरिवालोक-सामान्य-लावण्य-शालिभिः,कङ्कण-क्वणित-कर-कमलैर्गुञ्जद्-भ्रमर-मण्डित-पुण्डरीक-परिपूर्ण-पद्माकरैरिव, किसलय-प्रहारायास्यमानशरीर-कन्दलैः, वट-मेरु-शिखर-नक्षत्रायमाणैः, पुण्यावतारैरिव निखिलजनानन्दजननैः, सत्त्वगुण-सम्भूतैरिव, सत्याङ्कुरैरिव, धर्मप्रतिनिधिभिरिव बालकैः साकं स्वसौन्दर्यकान्ति-धवलीकृत-हरित-पत्र-पटलम्; शिखरारूढतया सुमेरुपर्वतोपरि परिभ्रमन्तं भास्करं विडम्बयन्तं, नगाधिराजमिव लब्धसर्वाधिकोन्नतिम्, अतितेजस्वितया निष्प्रभावी-कृत-मार्तण्ड-मण्डलं, मातङ्गपृष्ठारूढमिव केशरिणम्, गहनान्धकार-विनाशोद्यत-मिव प्रभाकरं, क्रीडन्तं महावीरं लक्ष्यीकृत्य फूत्कार-जनित-ज्वालावलीढलता-वितपिगणः, दर्शनेनैव सन्त्रास-सम्भूत-मूर्च्छापहृत-प्राण-पथिक-पटलः, स्रवद्गरल-क्लिन्न-मार्ग-रेणु-निकरः, लाङ्गूल-प्रहार-पातित-वल्मीक-वृन्दः, विकरालकाल-कर्बुरितावयव-गात्रः, वसुधा-निपतित-सुरपतिसायक इव लक्ष्मी-रत्न-यानमिव स सर्पः समुपसृत्य पादपस्य मूलभागं चाश्लिष्य, फण-पटलं प्रसार्य भीषणफूत्कारै-र्निशश्वास।

साक्षाद् विकराल-काल-करभमिव यमराज-रसना-रासमिव, पापराशिमिव मूर्तिमन्तम्, तमोगुण-निकरमिव दिनकर-किरण-विकल-पलायमान-तिमिरपटल-मिव, अनिष्ट-तन्त्र-प्रयोगमिव, फलिताभिशापमिव, विषधरं विलोक्य सर्वे बालकाः मलिन-मुख-मण्डला व्यपगतचेतनाः विस्मृत-क्रीडारसाश्च बभूवुः।

व्यालोऽपि रोमाञ्चित-शरीरान्, खेदखिन्नान् शिशून् लक्ष्यीकृत्य सत्वरगत्यो-पचक्राम। बालकाः परिक्षीण जीवनाऽऽशाः, मन्दीभूत-श्वास-गतयः कथं कथमपि निजात्मरक्षार्थं तरोरवतीर्य द्रुतगत्याभ्यधावन्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ईषद्धास्य-विकसित-वदन-चन्द्रः; द्विगुण-संवर्धितोत्साहः, उपहासपात्रीकृत-भीरु-सहचरमण्डलो महावीरो भुजङ्गम-पराजयमभिलषन् वृक्षादवततार। समवतीर्यं च फणधरस्य फणमधिकृत्य तस्थौ। पुनश्च भय-पलायितान् सहचरान् आजुहाव। भो सुहृन्मण्डल ! कथं मयि जीवति सर्पादस्मात् त्रासं सम्प्राप्य पलायिता भवन्तः ? विलोक्यताम्—पराजितोऽयं मया। नेदानीं फूत्कारं करोति न च फणं प्रकम्पयति। क्रोध-विहीनोऽसौ मदधीनो जातः। अतो भवन्तः सर्वेऽपि परावर्तन्ताम्। नास्ति भयस्यावकाशलेशोऽपि। तच्छ्रुत्वा समग्राः क्रीड़ा-सङ्ग-विधायिनः प्रत्यागच्छन्।

नागरूपधरः सङ्गमसुरोऽपि सम्यग् ज्ञातवान् यदयं न केवलं नाम्नैव महावीरः प्रत्युत कर्मणापि महावीरोऽस्ति। स विनम्र-शिरसा भारवहने शक्तिहीनतां द्योतयामास। वर्धमानोऽपि तं मद-विहीनं दृष्ट्वा समवतीर्योवाच। भो विषधर ! यत्र रोचते तत्र गम्यताम्। एतदाकर्ण्य परित्यक्त-सर्पशरीरः, धृत-सुदर्शन-देव-देहस्तस्य धवलकीर्तिम् अगायत्। भगवन् ! वीरशिरोमणेरपि भवतः परीक्षार्थं दुर्जनोऽयमत्रागतः। किन्तु सुरराजवर्णितां भवदीयदिव्यशक्ति साक्षादनुभूय मदहीनोऽस्मि संवृत्तः। क्षन्तव्यो मे गरीयान् अपराधः। एवं संस्तुत्यासौ देवोऽप्यन्तर्दधौ।

घटनयानया सर्वेऽपि महावीर-पराक्रमेण सुपरिचिताः सञ्जाताः। सन्ध्यापि समायाता। क्रीडासक्ताः सर्वे बाला नगरीं लक्ष्यीकृत्य चेलुः। मित्रैर्वर्णितं वीरपौरुषं श्रवणातिथीकृत्य सिद्धार्थः पुत्रं समालिलिङ्ग परिचुचुम्ब च। जनतापि तं समाचारं समाकर्ण्य हर्ष-निर्भर-मानसा संबभूव।

एकस्मिन् दिवसे सन्ध्यायाम् एको गजेन्द्रः स्वाधीनो जातः। चरण-तल-विदलित-जनवर्गः, शुण्डादण्डविदीर्ण-विविध-देहि-गात्रः, सन्त्रासित-निखिल-नगर-जनवृन्दः, चीत्कार-वाचालित-दिङ्मण्डलो भीषणोत्पातभयातुरीकृत-नागरिकः स सम्पूर्णं नगरं व्यलोडयत्। न कोऽपि तं स्प्रष्टुमपि साहसं विदधाति। विपणि-मार्गेषु बहवो निष्प्राणाः समजायन्त।

नागरिकाणां करुण-क्रन्दनं समाकर्ण्य करुणार्द्रहृदयो महावीरो मदान्धं मातङ्गं नियन्त्रयितुं जनानां क्लेशं निवारयितुं च ससंरम्भो बभूव। सर्वैर्जनैर्मुहुर्मुहुः प्रतिषिध्यमानोऽपि निर्भयोऽसौ सैनिक-विहीन एकाक्येव बहिर्निर्जगाम।

कुञ्जरोऽपि वीरमेनं निरीक्ष्य नितरां क्रुद्धो जातः। समक्षं समागच्छन्तं तं विलोक्य चकितोऽप्यभूत्। स वेगतस्तमाक्रान्तं कर्तुम् ऐच्छत्। कुमारोऽपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुण्डा-दण्डं समवलम्ब्य कुञ्जरकुम्भं समारुरोह। दर्शकानां जयजयकारैं देश-दिशो गुञ्जिताः बभूवुः। पेतुश्चास्योपरि गगनतो गगन-चुम्बिभवनतरश्च पुष्प-वृष्टयः शत्रुरपि व्यवहारेण क्रूरोऽपि च करी करुणा-परिप्लुतहृदयः संवृत्तः। दृष्ट्वेदं राजदम्पती परमानन्दभरेण चेतसा तनयं समाश्लिष्यताम्।

यस्माद् दिवसात् तस्यातिवीर एतच्छलाघनीयं नाम प्रख्यातमभूत्। ज्ञान-विषयेऽपि सोऽप्रतिम एवासीत्। सकल-वेद-पुराणेतिहास-काव्य-दर्शनेषु तस्य-तन्य साधारण-वैदुष्यं नाविदितं केषाञ्चिदपि। शास्त्रार्थसमराङ्गणे तार्किकैस्तस्य एवमधीतसर्वशास्त्रस्य तस्य कुमारस्य सूर्योदय इव जलजातस्य, सकललोक-हृदयाह्लादकश्चन्द्रोदय इवाकाशमण्डलस्य, सुरपतिचापविलासा इव प्रावृट्कालस्य, निखिलजननयनानन्दकरः पूर्णिमाहास इव सागरस्य, मधुमास इव काननस्य, विविधरागरमणीये पिच्छभार इव मयूरस्य, वर्षाजलप्रवाह इव धान्यस्य, कल्प-प्रसूनविकास इव नन्दनवनस्य, ग्रीष्मकाल इव दिवसस्य, शीतसमय इव हिमाल-यस्य, ललनाजनलोभनीये यौवनविभ्रमें समागते सति, विविधगजतुरग-ग्राहावलीढ-रिपुसैन्यजलधि-मन्थन-लक्ष्मी-ग्रहण-योग्य-मन्दराचलमिव, अनेकसन्तप्तजनताप-हरणक्षममन्दाकिनीयमुनाप्रवाहद्वयमिवाऽऽजानुलम्बं, सकलसंसारसञ्चरणश्रम-शिथिललक्ष्मीविश्रामशयनोपधानमिव भुजयुगलम्; उन्मद-मन्मथ-मातङ्गनियन्त्रणा-लानस्तम्भमिव, अहितझंझानिलाप्रकम्पित-महीधरशिखरमिव, विपुलबलशालि, दृढतरमास्तीर्णमूरुयुग्मम्; क्षोणीनौकूपखण्डमिव, ब्रह्माण्डातपत्रदण्डमिव, विश्व-कमलपण्डमिव, निखिलमहीभारवहनसमर्थशेषनागयुगलमिव, विविध-विकारद्विषद्-विलोडनपराक्रमगजशुण्डमिव, दृढतरं जङ्घाद्वयम्; नागेन्द्रकुम्भभागमिव, नगपति-प्रस्तरखण्डमिव, वज्रमिव, गदाग्रदेशमिव जानुद्वन्द्वम्; प्रस्रवन्मकरन्दं रक्तकमल-मिव, बद्धकवचं वीरसैनिकमिव, बाल-रवि-किरणारुणी क्रियमाणं किसलयमिव, विलसन्नखकिरणजालं पादयुग्मम्; गोपुरस्फुरत्कवाटमिव, साम्राज्य-दुर्ग-भित्ति-भागमिव, उन्मदलक्ष्मीविलासशयनमिव भवसागर-तरणिलौहफलकमिव, समग्र-जीवाधारभूतं धरातलमिव वक्षःस्थलम्; विजयशङ्खमिव, मुखकमलनालदण्डमिव, सुधाकलशमिव, सरस्वत्याः वीणावाद्यमिव कण्ठनालम्; वृषभस्कन्धमिव शत्रु-वाहिनीकूलभेदनदक्षम्, भुज-देवदारुवितितमूलदेशमिव बाहुशिखरम्; नाभिसरोवर-तरङ्गमालामिव, यौवनसञ्चरणयोग्यमरकत-निर्मितसोपानपरम्परामिव रोम-राजिम्, निहतसकलान्धकारं बालदिवाकरमिव, सौन्दर्यसिन्धुमन्थनोत्थं पूर्ण-सुधाकरमिव, पीयूषसरोवरभुवं जलजातमिव गलल्लावण्यं मुखमण्डलम्, सरस्वती-हीरकहारैरिव, सत्याङ्कुरैरिव धर्मोद्यानविकसितकुड्मलैरिव, सुधाहिमखण्डैरिव,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रतिशिथिललक्ष्मीस्वेदकणैरिव, पुण्य-दाडिम-बीजैरिव दन्तैर्भास्वरं पुष्पोपशोभितं पल्लवमिव, मुक्तामण्डितं विद्रुममिवाधरोष्ठयुगलं दधतस्तस्य गरुडनासिका, पवनपीडितपुण्डरीकलोचने, कुसुम-शायकमौर्वी-समानोर्णासनाथोऽर्धचन्द्रशकलाकारललाटदेशः, लावण्य-सिन्धुशैवालपुञ्जमिव, रसस्निग्धजलधरपटलमिव, मुख-चन्द्रोत्सारिततिमिरनिकरमिव कुन्तलजालम्, पटहगम्भीरघोषश्चैते कस्य हृदयं विस्मयाम्बुधौ न निमज्जयामासुः। का माता पुत्रवध्वाश्रयनाय समुत्कण्ठिता न भवति? त्रिशलायाः हृदयेऽपि वर्धमानविवाहार्थम् औत्सुक्यमजागरीत्। सा प्रत्यहं सञ्चरन्तीः राजनन्दिनीः समवलोक्येमामहं पुत्रवधूपदेऽभिषेक्ष्यामीत्येवं विचारयन्ती तस्थौ।

बहवो राजानस्तत्रागत्य वीरेण सहैव निजकन्यकानां विवाहार्थं सम्राज्ञीं प्रार्थितवन्तः। राजकुमारीणां नित्यनवीनानि सुचित्राणि समुपस्थापितानि भवन्ति स्म पुरस्तात्। विविधेभ्यो देशेभ्यो वर्धमानस्योद्वाहार्थं नरपतीनां सन्देशाः श्रूयन्तेस्म। अहमहमिकया भूपालास्तेन द्वितीयमन्मथेन साकं निज-निज-नन्दिनीनां पाणि-ग्रहण-प्रबन्धाय व्यस्ता इव समभूवन्।

न केवलं राजानः प्रत्युत तेषां राजकुमार्योऽपि तेनैव सार्धं प्रणय-सम्बन्धार्थं समुत्कण्ठिताः सञ्जाताः। काचित् भावुकतया नित्यं वर-मालिकां गुम्फन्ती लक्ष्मीरिव प्रतिपालयति भगवन्तम्। काचित् पूर्णेन्दुमुख-मण्डला पूर्णिमेव स्मितज्योत्स्नया वीर-हृदय-सागरं समुल्लासयितुं समीहते। काचिद् दिशि-दिशि तमेव पश्यन्ती सती गुरुजनानां पुरतश्चैव "प्रियतम! क्व यासि? स्थीयताम्। देहि मे सान्त्वनाम्" इति मुक्तकण्ठं प्रलपति। काचिन् मुग्धा प्रतिदिवसं द्वारि स्थित्वा पथिकान् महावीरविषये पृच्छति। काचित् प्रणयपत्रं लिखित्वा दूतीद्वारा प्रेषयति। अजस्र-भावना-बलादेनं निमीलनेष्वपि विलोकयन्ती काचिन् निमेषनिर्मितं विघ्नलेशमपि नालभत्। काचिद् राजकुमारवरणानुरूपं रूपराशिमपश्यन्ती सती करधृतदर्पणं श्वासमलीमसं प्रकरोति। काचिज्जनक-समाराधन-वेलासु वैतालिकैर्वर्णितं महावीर-सौन्दर्यगुणं समाकर्ण्य विनिद्ररोमावलिरभूत्। काचित् स्वप्न-वेलायां स्वपतीकृतं वर्धमानं समालिङ्ग्य सुचिरं निद्राति। अध्ययन-तत्पर-सखीजन-मुखाद् 'वीर' इति कस्यचिद् विशेषणञ्चापि श्रोत्रपेयं विधाय प्रमोद-बाष्पावृतनेत्रकमला काचिच्चिराय विमनायमाना सन्तिष्ठते।

विजित-मदन-कमनीयतामदेऽपि लावण्यामृत-रस-लुब्ध-ललना-लोभ्यमानेऽपि, विपुलैश्वर्यमण्डितेऽपि तस्मिन् मन्मथविकाराः नाजायन्त। किं प्रवातेऽपि महीधरः प्रकम्पते? रजःकणप्रक्षेपैरपि सागरः क्षुभितो भवति किम्?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वीरस्य वीतरागतया परिम्लानाशाकुड्मला सम्राज्ञी त्रिशलैकवारं नन्दनं समाहूयावोचत्—पुत्र ! अल्पावशिष्टो मे जीवनकालः। हृदयसुकुमारतया मनोगतम् अपलपितुं न प्रभवामि। चेतोऽभिलषितं कथयितुं नेच्छामि तथापि व्यामोहो न मन्यते। ममान्तःकरणं मातृहृदयं वर्त्तते न तु लौहशकलम्। जानामि यदस्मिन्नेव जन्मनि त्वं मोक्षं लप्स्यसे। ज्ञानत्रयधारकोऽसि। नाविदितं ते किमपि। अत एव कारणाद् इदानीं यावत् निहितभावया मया नायं प्रसङ्गः समुद्घाटितः। नाद्य मेऽनुरागो मौनमवलम्बते। बन्धनं विहाय मुखरितो मे स्नेहः। अकथनीयकथनप्रवृत्तं लालनम्। पुत्रवधूदर्शनलोभो न मे हृदयं जहाति। विश्वसिमि यत्त्वाहं प्रियवरा जननी। अल्पज्ञाऽपि ते मातैवाऽस्मि। प्रस्तावमेकं प्रस्तौमि। अनेनैव तव मातृभक्तिर्नूनं प्रकटिता भविष्यति। आदिनाथप्रवर्तित-मार्गविपरीतं न किञ्चित् निवेदयामि। अगणिताः राजानस्तुभ्यं स्वकन्यकाः प्रदातुमभिलषन्ति। वह्वयो राजकुमार्यस्थापि तव महिषीपद-प्राप्तये ह्येकतानहृदया दरोदृश्यन्ते। अत इदानीं परिणयानुमतिं दत्वा पूरयतु मे मनोरथम्। विकासय मे चिरात् मुकुलिताम् आशाकलिकाम्। यामपि सुन्दरीं वाञ्छसि तयैव साकं ते पाणिग्रहणं सम्पत्स्यते। तथापि मयैका सर्वाङ्गसुन्दरी कन्यका तव परिणयार्थं मनस्यङ्गीकृता। चम्पकदलरचितावयवरमणीया, पुण्य-सागरोद्भूतनिर्मलसुधाकर-मुखमण्डला, वनशरणीकृत-मृग-निकरनयनमनोहरा, मृणाल-तन्तु-सुकुमार-भुज-लतिका, जलनिमज्जित-तर्जितपद्मसम्पदनुपमसुषमास्यन्दि-पाणिपल्लवा, तर्क-जालोपम-कुन्तल-कलापमण्डितमूर्धभागा अनवरतस्मितज्योत्स्नापान-परायण-चकितचकोरपर्यावृता, पुण्यमन्थाचलमथितसौन्दर्य-सिन्धु-सम्भूत-लक्ष्मीरिव सा मृदुलस्वभावा, नारीसुलभगुणगुम्फिता, कुलीना, कलावती, विदुषी, कलिङ्गाधि-राजस्य राजकुमारी यशोदेति नाम। सा कतिपयैरेव दिवसैः स्वकीयैरुदार-गुणैस्त्वामप्युत्तरलीकरिष्यति। अतस्त्वं सत्वरं स्वीकुरु मे प्रस्तावम्। नगरोऽयं नववन्दनमालाभिः सुरपतिचापचर्चितजलधरवृन्दं विडम्बयतु। सुसज्जित-वरयात्राशोभाविलासं पश्यन्तीनां नगरवधूनां नयनकुवलयश्रेणीभिर्मण्डितं भवेत् प्रतिद्वारम्।

वीरोऽसौ ध्यानपूर्वकं मातुर्वचनं श्रुत्वाऽपि न प्रभावितोऽभूत्। पूर्वमिवैव सः गम्भीर एवासीद्। मातुर्ममतायाः समक्षं तस्य कुमारस्य विवेको न पराजितः। किं झंझानिलो नगाधिराजं प्रकम्पयितुं प्रभवति। तस्या अनेकेषु तर्केष्वेकोऽपि न रुरुचे तस्मै। ध्रुवनक्षत्रमिवासीद् दृढतरं तस्य चेतः। दयार्द्रहृदय एष समताजलेन जननीज्वालां शमयितुमियेष। मम वैराग्येणैव क्षुभितेयं ग्रन्थिबन्धनाय प्रवृत्तेति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्ये। अतोऽद्य मया तथाऽऽचरणीयं यथास्याः भावनाऽपि कुण्ठिता न भवेत् न च मे वैराग्यकार्ये काऽपि बाधा समापतेत्। एवं विचिन्तयन् सोऽब्रवीत्—मातस्त्वया प्रेम्णा परिणयप्रस्तावः प्रस्तावितः। कुशलवध्वाश्चयने त्वया किमपि कौशलं प्रदर्शितम्। भगवतश्चादिनाथस्य मार्गोऽपि श्लाघनीयतमः। नाहमधिकारी ते तर्कान् खण्डयितुम्। तथापि विचार्यतां सम्प्रति संसारोऽयं परिवर्तितोऽस्ति। नाधुना साऽवस्थितिर्न च दीर्घं जीवनम्। पुराकाले सर्वेऽहिंसकाः, सत्यवादिनो, धर्मपरायणाश्चासन्। इदानीं स्वार्थिनः, पापिष्ठाः रुधिरैकरक्तरसनाश्च मानवरूपेण दानवाः विचरन्ति वसुधायां भारभूताः। पशवो हन्यन्ते। शूद्रास्ताडयन्ते। जातिवादो मुक्तं विहसति। धर्मः क्रन्दति। साम्यवादो विलपति। नरसुखसाधनैकोपकरणी-भूताः पराधीनाः नार्यो नयनधाराभिर्मुखं प्रतिपलं प्रक्षालयन्ति। अतः सर्वप्रथमं मया संसारस्य समुद्धारो विधेयोऽस्ति परमपुनीतकर्त्तव्यतया। अलं परिणयप्रसङ्गेन। क्षम्यतां मातः। यज्ञानुष्ठानेषु होमीक्रियमाणानां जीवानां धूम्रजालेन कलुषीक्रियते मेदिनीयम्। पुण्यमपि पण्यं सञ्जातम्। रोदितीयं कातरभावेन मानवता। पुत्रः पितरं, भ्राता भ्रातरं, शिष्यश्च गुरुं तर्जयति। भर्त्सयति क्लेपयति च। धर्मान्तराले बहवो भ्रष्टाचाराः सम्भवन्ति। न कोऽपि धरित्रीमस्मात् पापान्निवारयितुं प्रभवति। यत्र जीवनस्य हत्या भवति तत्र कथमिव तस्य क्षेमम्। नरमेधयज्ञव्यग्रे देशे कुतो नरेषु प्रेमभावः। निखिलजीवकल्याणमहिंसामन्तरेण न विधातुं शक्यते। शूद्राः न सन्ति शिक्षाधिकारिणः। न च तैः सामाजिकसम्मानं समुपलभ्यते। तेषाम् ईषत्-स्पर्शोऽपि महापातककारणम्। नद-नदी-पाषाण-प्रभृतयः पूज्यन्ते तिरस्क्रियन्ते च मनुष्याः समादरणीयदेव्योऽपि स्वातन्त्र्यं नार्हन्ति। श्वमार्जारविहङ्गमा इव ताः समस्ताः नरस्य दास्यमेव समाचरन्ति। कथमेतस्य देशस्य मानवाः परस्परप्रेमशालिनो भविष्यन्तीति महान् मे वितर्कः। व्यर्थमेवाहं राजभवने जीवनस्य बहुमूल्यक्षणान् यापयामि। काललहरी चेयं मां मृत्युजलनिधिं प्रति कर्षति। सकलकर्मविजयं विना वीरपदप्राप्तिरपि निष्फला। कैवल्यमप्राप्य नरजन्मोपलब्धिश्चापि तथैव मुधा। आहार-शयन-भय-मदन-वासना-व्यस्ताः पशवोऽपि विद्यन्ते किन्तु न ते मुक्तिपदाधिकारिणः। सौभाग्यवशात् नरयोनौ पवित्रवंशे च सुजन्म लब्ध्वापि मया किं कृतम्? श्रीमानहं कथं न धीमान् जातः नाहं हीरकहारजालपञ्जरे, न च साम्राज्याधिकारकारागृहे स्वात्मानं बद्धुमिच्छामि। अतोऽहं मुनिमुद्रां समवलम्ब्य जीवानां दुःखान्यपोहिष्यामि। मातस्त्वां भूयो भूयः प्रार्थये, यदाज्ञापय मां समाजसेवार्थं निजात्मोद्धारार्थं चेत्युक्त्वाऽसौ विरराम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्धमानस्यैवं विचारं परिज्ञाय त्रिशलातीव दुःखिताऽभवत्। सा तेनैव पदेन महाराजभवनं समाससाद। तत्र सिद्धार्थं महावीरस्य वैराग्यविषयकं सकलमपि वृत्तान्तं व्यजिज्ञपत्। भूपतिरप्यतिचिन्ताव्याकुलो बभूव। विचारयन्नसौ नृत्यसंगीतकामकलाविचक्षणां चित्रसेनानामधेयां राजनर्तकीं नवनिर्मित-प्रमोदभवने शृङ्गाररसस्य साङ्गोपाङ्गकलाकलापैर्महावीरं विषयोन्मुखं विधातुं समादिदेश।

भ्रुकुटि-विक्षेपमात्रेण निखिलविश्वमपि नर्तयन्ती चित्रसेना सकलकलाकमनीयैः उद्दाम-शृङ्गाररसस्यन्दिमिश्चापि नृत्यैर्नाकर्षितुं शशाक वीरम्। तं कुमार-मनुकूलयितुं न कोऽपि सफलो बभूव न काचिदपि सुन्दरी स्वकीयभुजपाशे निबद्धु-मेनं शशाक। कैर्न विज्ञातमस्य शीलमखण्डितं लोकोत्तरं च ब्रह्मचर्यम्। वीरोऽसौ विश्वविजयिनं कामदेवमपि विजिग्ये। न केनापि परिणयप्रसङ्गः समुत्थापितः। निखिलो जनो मनसोऽभिलाषं मनस्येव गोपायाञ्चकार। न कश्चित् सुहृत्तेन सार्धं परिहासं विदधाति। श्रावणी होलिका च विलासलीलामप्रदर्श्यैव गते। नापि रसालशाखाऽवलम्बितहिन्दोललीलासुखं हृदयमान्दोलयति तस्य। नापि वसन्तमदमत्तः सन् कस्याश्चित् कामिन्याः कुसुमसुकुमारं कपोलप्रदेशं रञ्जयितु-मियेष। डिण्डिमघोषणेव प्रसृतस्तस्य संयमप्रकारः। मधु, मधुं, मधुबालां चासौ स्वप्नेऽपि न संस्मरति। किन्नर्यस्तं बाहु-मृणालैर्निबद्धुं न प्रबभूवुः। नाप्यप्सरसो नितम्बालसमन्दगमनेन चकर्षुस्तस्य मानस-मरालम्। नृत्यन्त्यो गणिकाः विविधैर्मदनविकारजनकैरङ्गभङ्गैस्तं विमोयितुं प्रयतन्ते परं लज्जिताः सत्यो विनिवर्त्तन्ते। परिधानानि भारभूतानि जातानि। दिगम्बररूपेऽभिरुचि-र्वर्धतेतराम्। रत्नत्रयं विहाय सर्वाणि रत्नानि निस्साराणि दरीदृश्यन्ते। कदाऽहं राजभवनं त्यक्ष्यामीत्येवाचिन्तयदहोरात्रं त्रिभुवनाभिनन्दितचरणकमलो वर्धमानकः।

एकस्मिन् दिवसे सिद्धार्थो महावीरमाहूयाब्रवीत्—पुत्र! पलित-पाण्डुरशिरस्को-ऽहं जातः। यमराजनिमन्त्रणार्थं वृद्धावस्थाद्य पत्रिकां विलिखति। नाऽहं विधिवद् राज्यकार्यं द्रष्टुं शक्नोमि। क्षीण-दृष्टितया च नाऽहं शासन-पत्रं पठितुं प्रभवामि अतएव राज्यसंचालनयोग्यं नास्ति मे शरीरम्। त्वञ्च शासन-परिचालनाय समर्थो जातः। विलोक्येदं तव भालस्थले मुकुटं स्थापयितुं इच्छामि। राज्य-सिंहासने च समुपवेशयितुं कामये। शीघ्रमेव त्वां कुण्डग्रामनगरस्य भाग्यविधातृ-रूपेण द्रष्टुम् अभिलषामि। स्वीक्रियताम्। अविलम्बेनाऽहं राज्याभिषेक-महोत्सवस्य विधानं कुर्याम्। सर्वेषां सचिव-सामन्त-सुभटानां समक्षं साम्राज्य-प्रदानं विधा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यामि। सर्वाऽपि प्रजा वाञ्छति यत् त्वमेव लोकस्याऽधारो भव। राज्यलक्ष्मीरपि-कथयति यत् त्वमेव तस्याः शृङ्गारो भव। त्वां सम्राजमन्तरेण नास्ति शासनस्य समुद्धारः। स्वोक्रियतां पदमिदं सहर्षम्। बहुभ्यो दिनेभ्यश्चित्तमस्माकं कथयितुमिदं चञ्चलमासीत्। मा च विलम्बो भूत्। सत्वरं मुकुटं स्वीकृत्य देहि मे तपसेऽवकाशम्। त्वां भूपतित्वेन सम्प्राप्य सकलापि प्रजाऽपारप्रमोद-निर्भरा भविष्यतीति तर्कयामि।

पितुर्वचनामृतं निपीयाप्यसौ वीरो राज्यलाभार्थं लुब्धो नाभूत्। अब्रवीच्च—तात! नास्ति मे राज्यभोगेषु लिप्सा। क्षणिकायां विद्युद्-भास्वरायां च नास्ति मेऽनुरागलेशोऽपि। नाहं राज्यसङ्घर्षेषु शक्तेरपव्ययं विधास्यामि। निजसञ्चित-कर्मणां विनाशं विधाय परमार्थपदं लप्स्ये। अतो न राज्यलक्ष्मीं प्रत्युत मुक्ति-लक्ष्मीं वाञ्छाम्यहम्। तत्रैव चास्मदीयं शाश्वतिकं कल्याणं प्रतिभाति। सर्वेऽपि राज्यभोगाः प्राणान्तकाः रोगाः वर्तन्ते। राजभवनमिदं कारागारसमानं प्रतीयते मे। नर-पशुप्रभृतीनां जीवानां क्रन्दनं श्रोतुं न प्रभवामि। यज्ञेषु हन्यमाना जीवाः क्रन्दन्तो माम् आमन्त्रयन्तीव। मानवता क्रन्दति। अहिंसाऽवसीदति। हिंसा च संवर्धते। अनेनैव कारणेन राजमुकुटं, साम्राज्यं, भोगविलासाश्च मह्यं न रोचन्ते। नाहं भवनेऽस्मिन् चिरकालपर्यन्तं स्थास्यामि, साम्राज्यं तु दूरापेतम्। राजा भूत्वा न कोऽपि जनो जनतायाः वास्तविकं कल्याणं कर्तुं समर्थः। राज्यमिदं वस्तुतो मधुलिप्तं खड्गमुखं वर्तते। राज्यं प्राप्य न कोऽपि राजाद्यावधि तृप्तो जातः। राज्येनैव प्रजासु संक्षोभः समुत्पद्यते। भीषणानि युद्धानि प्रचलन्ति। कपट-प्रपञ्चाः संवर्धन्ते। दानवता च सोत्साहा सञ्जायते। भ्राता भ्रातरं, पुत्रः पितरं, पत्नी पतिं हन्ति। जीवनं दुर्व्यसनैर्व्यग्रं विनष्टं च भवति। स्वकीय-हृदय-पातकस्य प्रक्षालनं नितान्तमनिवार्यमस्ति। नाहं स्वयमेव स्वकीयनयनयोर्धूलिप्रक्षेपं विधास्यामीतीत्युक्त्वासौ विरराम, राजगेहस्य च परित्यागाय कृतनिश्चयो बभूव।

एकान्तचिन्तनैकतानहृदयो नासाग्रस्थितदृष्टिः कुमारो ध्यानबलेन लब्धचेतन इव पूर्ववृत्तानि सर्वाण्यपि च प्राक्तन-जन्मानि सस्मार। दिव्याङ्गना-मधुकरी-लोभनीय-लावण्यं, सर्वसत्त्वभयङ्करविकरालरीरवोच्चितशरीरं, सततसन्निहित-वसन्तमदमत्तयुवतिजनप्रकटितोद्दाम-सौन्दर्यनन्दनवनं, शाश्वतसुखैककेन्द्रं निगोद-स्वर्गं विहाय विविधजनविसर्जित-थूत्कारमलमूत्रपूरितप्रणालीलीनं कीटजन्म, षष्टि-लक्ष-परिमितासु योनिषु जन्ममरणचक्रं च विलोक्य, पुनर्नारायणपदप्राप्ति-मनुभूय य विस्मयाम्बुधौ निममज्ज। मृगपतिभूत्वा हन्यमान-सचीत्कार-पलायन-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रतवनचररक्तमापीतम् । चक्रिपदं लब्ध्वा चक्राग्र-तीक्ष्ण-धार-निर्मंमप्रहार-खण्डित-देहो विहितो जयः। पुनः क्षेमङ्करनाम्नो मुनेः सकाशात् मयोपलब्धमिदं चन्द्रानल-तपनाभेद्यान्धकारहरणक्षमं रत्नत्रयम् । निखिल-लोक-तापनिवारणैक-दत्तचित्तं तीर्थङ्करत्वमुपलब्धम्, पुनः सकलस्वर्गाधिपतिभूतेराधिपत्यं षोडशे स्वर्गे गतोऽहम् । तत्र चाऽनेककामिनीकरकमल-धूयमानचामरोपवीज्यमानदेहः सुरपतिर्जातः । पुनश्चेदानीं हन्यमान-मखपशुक्रन्दनाहूत इव तीर्थङ्करपदं प्रापितोऽस्मि ।

अमृतसञ्जीवपीयूषं, हृदयविदारकं कल्मषगरलमपि निपीतम् । निरन्तर-परिभ्रमणाधिष्ठितभुवनत्रयं सुरपुरविमानमपि दृष्टिपथं नीतम् । अनुभूतं च विविधयातनापीड्यमानजीव-निकर-क्रन्दन-कोलाहलायमानदिगन्तरं महानरक-दुःखम् । कदाचिद् यातायात-निरतजन-चरणघर्षणपीडामन्वभूवम् । साक्षात्कृतं सुख-दुःख-शीतोष्णता-जाड्य-चैतन्य-रागद्वेषादिकं द्वन्द्वम् । गवेषितमगणित-ग्रहग्रसितमिदं भूगोलं खगोलं च सुर-पशु-नर-नरक-गतिषु परिभ्रमन्नहो अहं विक्लान्तोऽस्मि संवृत्तः । नावशिष्यते किञ्चित् ज्ञानाविषयः । एवमधिज्ञानेन स स्वकीयसकलमप्युदन्तम् अजानात् ।

पुनश्चाचिन्तयत् । मया जगतो नाटयशालायां किं नाचरितम् । इदानीं यावद् अष्टानां कर्मणां दृढतरबन्धने एवाबद्धोऽभूवम् । देवाः अमराः सन्तोऽपि नामराः । सुरेश्वर-चक्रिप्रभृतयोऽपि प्रलयानलसमविकरालकालमुखे पतङ्गा निष्पतन्ति । नास्ति कोऽपि मम जन्म-स्पर्श-दूषण-रहितो देशः । नाहं कदाऽपि शाश्वतदिव्य-सुखासक्तान्तःकरणः सुरपतिः, नापि वार-विलासिनीकटाक्षदुग्धधाराऽभिषिक्तो नरेशो बहुकालपर्यन्तमभवम् । दुर्लभसुषमाकेन्द्रभूतमपि मे शरीरं न चिरं स्थास्याति । न सुन्दरोसङ्गीतध्वनिध्वन्यमानगगनचुम्बिशिखरमन्दिरं नाऽपि च विविधवीर-कलकण्ठ-रक्तरञ्जितमिदं राज्यं चिरं सुखं प्रदास्यति । सांसारिक-सुखलिप्ता मधुलिप्ता खड्गधारेव कष्टप्रदा मृगतृष्णिकेव प्रवञ्चिका च वर्त्तते । यथा विषधरः कदाचिदपि सुधादानाय न प्रभवति तथैव संसारोऽयं न वास्तविकं शाश्वतिकं कल्याणं सम्पादयितुं समर्थः । मूढजनोऽयं हीरकरत्नं विस्मृत्य काचमन्विष्यति । करकवलं पातयित्वा रिक्तहस्तं विलेढि । अनेनैव व्यामोहेन जीवश्चतसृषु गतिषु बम्भ्रमीति ।

बुद्बुदपंक्तिरिव क्षणभङ्गुरोऽयं पुरजन-परिजनयोः सम्बन्धः । जीव एकाक्येवागच्छति गच्छति च । एकाक्येव सुख-दुःखमनुभवति । विरहमेलनयोश्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतं गायति। एकाक्येव पुण्य-पापात्मकौ ग्रन्थौ पठति। शुभाशुभकर्मणोर्मूर्त्ति निर्माति। पुष्पेषु स्वतन्त्रं सौरभमिव पृथग्भूतमपि देहात्मकमेवात्मानं जानात्ययं भ्रान्तबुद्धिः। चेतनतत्त्वं निर्विकारं केवलं शरीरमेव परिवर्त्तनशीलम्। गात्र-विकारैरात्मानमपि विकृतिमन्तं विजानाति मूढः। शरीरमपि न स्वकीयं, तदालं तस्य चिन्तया। परिधानपरिवर्त्तनमिवास्ति देह-परिवर्त्तनम्। मिथ्यात्व-मद्यपाने-नोन्मत्तो जीवो भवाम्बुधौ पतितः सन् संल्लुठति। वृथैवान्यान् शत्रून् मित्राणि वा मन्यतेऽयम्। आश्रव एव परो वास्तविकश्च शत्रुः, परं नायं चेतयते कदाचिदपि। अतः आश्रवं निरुध्य, कर्मपाशं छित्वा, भवसागरं समुल्लङ्घ्य, मुक्तिवेलां प्राप्स्य'मीति मे दृढतरो निश्चयः।

निर्मोहः सन् न केनचित् सार्धं स्नेहं, न वा द्रोहं विधास्यामि। समिति, महाव्रतं, निखिलेन्द्रियजयम्, मनो-वचन-गात्राणां संयमेन कर्मणामास्रवस्य संवरं च प्रास्यामि। अनुप्रेक्षा, धर्मः, परीषहजयश्चानवरतं धारणीयो मया। एते मां कर्मबन्धनाद् विमोचयिष्यन्ति नूनम्। भूयः कदाचिदपि संवरेण नवकर्मणां समुदयो न भविष्यति। वहूनि शुभाशुभ-जन्मानि लब्ध्वापि रत्नत्रयं नार्जितं मया। नामृत-पान-लाभेन सांसारिकदुखज्वालोपशमिता मम। इदानीमहं धर्मकवचं धृत्वा श्रीमद्-ऋषभ-सरणिमनुसृत्य, दिगम्बरो भूत्वा च क्षमाप्रभृतिभिर्दशभिर्बलशालिभिर्भटैः कर्मशत्रून् जेष्यामि। कैवल्यप्राप्त्यर्थं च तपांसि तप्त्वा परम ज्योतिषः प्रभया स्वात्मानमपि प्रकाशरूपं विधास्यामीति।

एवं विचार्य महावीरो वनप्रदेश-गमनार्थं पित्रोराज्ञामादातुं निर्जगाम। प्रविश्यावादीच्च—पितरौ! अद्याहं जगतो भोग-विलासेभ्यः सर्वथा निर्विण्णो जातः। मया चैतावान् कालो व्यर्थमेव यापितः। निपातितं च जीवनं महान्धकारे। न मुनिवेषः स्वीकृतः; न परिधानानि निराकृतानि, नोत्पाटिताश्च केशाः। न यावदहं कठिन-तपस्यां करोमि नास्ति मे कुशलं तावत्। अतो मदीया मनःकामना वृथा न विधातव्या भवद्भ्याम्। दीक्षार्थं चानुमन्येतां माम्। अहिंसया, सत्येन, तपसा च जीवनमादर्शीकरणार्थं स्वकीयमादेशं ददेतां भवन्तौ। तपसो ज्वालायां काञ्चनमिवात्मानं प्रकाशयितुं बलं दीयमानमभ्यर्थये।

वीरस्य वैराग्य-भावं विज्ञाय भूपतिरवादीत्—नन्दन! यत्त्वं वदसि तत्सर्वं सत्यमेव। परन्तु त्वद्वियोगजनित-वेदनां विसोढुं न प्रभवामि। क्रियता-मस्मिन्नेव राजभवने निर्मलतया व्रत-नियमानां निर्वाहः। किमर्थं व्यर्थं त्वरयसि। निश्चयेन त्वस्मिन्नेव जन्मनि मुक्ति-मुग्धां प्राप्स्यसि त्वम्। न त्वया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्म-विपाक-विनाशस्य चिन्तापि कर्त्तव्या। अतः सङ्कोचं विहाय प्राज्यं राज्यं स्वीक्रियतामिदम्।

पितुर्वचनं श्रुत्वा महावीरोऽब्रवीत्—तात ! कथं भवता पुनः स एव प्राचीन-प्रसङ्गः समुपस्थाप्यते। साम्राज्यमिदं मां कथमपि लोभयितुं न शक्नोति। क्षणभङ्गुरोऽयं संसारः। विश्वसम्राड् भरतः क्व गतः। क्व गतः कैलास पर्वतो-त्तोलनभुजबलगर्वितो रावणः। तस्यापि दशकन्धरस्य प्राणान्तको रामचन्द्रः क्वास्ते ? वसुन्धरायां बहवो राजानोऽभिषिक्ताः भूताः भविष्यन्ति च। परं पृथ्वीयं नास्ति कस्यापि प्रिया। कस्य राज्यं स्थिरम्। कश्च राजातिचिरंजीवी कालचक्रं सर्वानपि कवलयति अतोऽहं नोडुपेन भवसागरस्य पारं प्रयामि।

वर्द्धमानस्य वाक्यमुपश्रुत्य झटिति त्रिशला व्याजहार। सुत ! मा स्वीकुरु राज्यमिदम्। किन्तु मदीयं वाक्यं ध्यानेन गृहाण। यदि त्वं वनं गच्छसि तदाऽ-विरल-पतितैरश्रुभिः ममाञ्चलं निरन्तरं क्लिन्नं भविष्यति। वृद्धावस्थायां त्वां विहाय किमस्ति मे सम्बलम्। रुदतीं मातरं तिरस्कृत्य न त्वया वनं गन्तव्यम्। नाहं पीड़िता नासाहाया च कर्त्तव्या। इत्युक्त्वा तस्याः नेत्रकमलयो-रश्रूणामजस्रधारा धरायां निपपात।

मातुर्दशां विलोक्य सन्मतिरुवाच—मातः ! गाम्भीर्येण विचार्यताम्। निवार्यतां च मोहावगुण्ठनम्। सर्वेऽपि सांसारिकाः सम्बन्धाः भ्रमपूर्णाः, भङ्गुराश्च वर्तन्ते। मया बहूनि जन्मानि धृतानि। बह्वीनां मातॄणां पुत्रोऽहं जातः। परं किं ते सम्बन्धाः साम्प्रतमपि वर्तन्ते। नाहं सिंहव्याघ्रप्रभृतिभ्यो भयानक-जीवेभ्यो, विषाक्तजन्तुभ्यश्च बिभेमि। अत आज्ञापय मां सोऽहं सोऽहं जपार्थम्।

प्ररूढ़वैराग्यभावस्य, परिसमाप्तसकल-विषय-मृगतृष्णा-विडम्बनस्य, परि-क्षीणराग-द्वेष-लोभ-मात्सर्यासूयामदविकारस्य, ममताकुहू-सघन-तिमिर-जालनाशकरज्ञानचन्द्रोदयधवलहृदयपटलस्य, समतासरिज्जलाभिषेकाङ्कुरित-तपस्तरुमण्डितमनःक्षेत्रस्य, बुद्धिप्रग्रहनियन्त्रितेन्द्रियपुरङ्गमसन्मार्गप्रवर्तित-शरीरस्यन्दनस्य, नानाक्लेशतरङ्गितसंसार-सिन्धु-सन्तरणसेतोः, शान्ति-द्रुम-मूल-भागस्य, विषयभोग लिप्सावल्लरी-काननकुठारस्य, सततसन्तोष-पीयूष-परिपूर्ण-सागरस्य साधारणजनदुर्गम-मोक्षमार्गोपदेशकस्य, पारङ्गतसकलविद्यानदीपारा-वारस्य जीवमात्रकल्याणकर-धर्मध्वजप्रासादस्य, द्रविणाभिलाष-विपुल-जलधिवड-वानलस्य, विषयानुराग-पल्लव-पटल-दावानलस्य, व्यामोहान्धकारविनाशकप्रचण्ड-मार्त्तण्डस्य, सततहितकरसत्यैकमित्रस्य, सुखानभिमुखस्य शकुनिवधविरुद्धस्यापि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुर्योधनस्य, परित्यक्तभोगस्याप्यविषधरस्य महात्मनो वर्धमानस्य वनगमननिश्चय-समाचारं समाकर्ण्यं मुक्तकण्ठं रुदन्त्यः, करकमलगृहीतनीराजनपात्राः, चरण-विघट्टनरणितनूपुरमुखरमार्गाः लज्जावगुण्ठितदेदीप्यमानमुखमण्डलाः, जलधर-पटलाच्छन्नसुधाकरराका इव नगरनववध्वः, लाजवृष्टिव्यापारितपाणिपद्माः, गलत्कुसुम-प्रकरा लता इव, परिधृत-धवलकौशेयदुकूलाः शरत्कालिकजल-धरान्तरितविद्युल्लता इव, मङ्गलगीतमुखरितकण्ठभागाः, मन्मथकलाकार-वाद्यमानवीणा इव, वाष्पं सृजन्त्यः पौरकन्यकाः, रजतकलशकराः परिपूर्ण-सुधाकरज्योत्स्नाप्रवाहधवलराका इव, काञ्चनकलशहस्ताः बालारुण-किरणजालपिञ्जरितप्रभातवेला इव, नीलमणिकलशकान्ति-विच्छुरितदेहा मधुकरकुलकरम्बिताः कमलिन्य इव, विविधकुसुममालालङ्कृतभुजलता मधुमासदेवता इव, काश्चित् क्रोड़निहितबालाः पुष्पस्तबकयुता वल्लर्य इव प्रौढाङ्गनाः, शुभाशीर्वचःप्रदानकुशला वृद्धाः, विविधदेवस्तोत्रपाठवाचालित-दिगन्तराः, मङ्गलमन्त्रपाठैकतानहृदयाः, सर्वविधकुशलोपचारमण्डिताः पण्डिताः, महावीरमनुकूलयितुं विविधमन्त्रणाविचारमग्नाः, को नु गतेऽस्मिन् महामेधाविनि शासनकार्यं सञ्चालयिष्यति, को न प्रजामनुरञ्जयिष्यतीति चिन्ताग्निदह्यमान-हृदया मन्त्रिणः, उच्चैः क्रन्दन्तो बालक्रीडासहचराः, को न्वस्मान् पालयिष्यति साम्प्रतम् 'भो मित्र ! गच्छ त्वम्' स तव मित्रम्, तमनुनय, प्रार्थय च सर्वेषां प्रार्थनाभिस्तं राजकुमारम् । न त्वयास्मान् विहाय गन्तव्यमुचितं प्रतिभाति । हे युवक ! स त्वां बहु मन्यते, गच्छ, अपनय तस्य वनगमनदुराग्रहम्, हे भाग्यशालिन् ! सोऽस्ति तव क्रोड़ासहचरः, किन्न तं रुणत्सि ? त्वरय गच्छति कालः इत्येवं परस्परमालपन्तः पौरजनाश्च तं पर्यावृणुन् ।

तस्मिन्नेव समये तत्र कुमारस्य वनगमनवृत्तान्तं समाकर्ण्य धृतच्छद्मवेष-परिग्रहा लौकान्तिका देवास्तत्राजग्मुः । भगवतो महावीरस्य समक्षं च बद्धाञ्जलयः सन्तश्चिरं तुष्टुवुः । प्रभो ! भवतः सत्तया राजभवनमिदं देदीप्यमान-मासीत्, इदानीं काननमपि तव पादपद्माभ्यां दिवाकरेण गगनमण्डलमिव शोभां प्राप्स्यति । अधुना तु क्षयशीलान्यम्बराण्येव वर्त्तन्ते, अतः परमविनश्वरमम्बरमेव तेऽम्बरं भविष्यति । यस्मिन् समये भवन्तो जन्मभूमिं त्यक्ष्यन्ति, न कोऽपि जनोऽत्र निरोद्धुं समर्थो भविष्यति । प्रायो विषयोन्मुखः भाविनि यौवने वयसि निर्ग्रन्थवेषं धारयिष्यसि । आश्चर्यमिदं यत् कुसुम-सुकुमारेण शरीरेण दुर्धरं तपःकार्यं सम्पादयिष्यसि । न केवलं कुण्डग्रामस्य प्रत्युत त्रिभुवनस्याधिनाथतां लप्स्यसे त्वम् । न केवलं मर्त्यलोक-निवासिनो जनाः प्रत्युत दिवौकसोऽपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुकुट-मण्डित-मौलिभिस्तेऽभिनन्दनं विधास्यन्ति। जिन-मुनिवरस्य मुद्रां धृत्वा मुनीशतां प्राप्स्यसि, तथैवात्मयोग-साधनेन योगीशतां च। युगस्यास्य महत्सौभाग्यं यद् भवादृशो लोकनायकः समुपलब्धोऽस्माभिः। स्वयमेव सिंहासनं त्यक्तवतः कामविजेतुश्च ते वैराग्यं धन्यतास्पदम्। यत् साम्राज्येन विषयभोगेन च नात्ररुध्यते। हे ज्ञान-तप्त-रश्मे! त्वदीय-दर्शनेन नष्टमोहान्धकारा वयं नितरां प्रसन्नाः स्मः।

निश्चयेन तव धर्मप्रचारेण सकलापि जगती सुखमयी भविष्यति। हिंसायाः हेमन्तकालो गमिष्यति, हसिष्यति च करुणायाः मधुमासवेला। जनगणोऽयं मिथ्यात्वं विहाय सम्यग् ज्ञानं प्राप्स्यति। सर्वेऽपि क्षीणपापाः, छिन्नकर्मपाशाश्च सम्भूय परमार्थपदं प्राप्स्यन्ति।

एवं संस्तुत्य देवास्तस्य पित्रोः समक्षं गत्वा प्रोचुः—राजन्! भवतोः सौभाग्यमतीव प्रशंसनीयम्, यद् भवत्तनयो बाल्यावस्थायामेव स्वतो वैराग्यं समालम्बत। कस्यचित् शिक्षां विनैव वीतरागतां प्राप्तोऽयं महाभाग्यशाली वर्त्तते ते कुमारः। देवैरपि काम्यमाना विभूतिरुपलब्धा भवदीयनन्दनेन।

अत एव मधुमयेऽस्मिन् समये ममतां त्यजतु। व्यवहरतु च समत्वदृष्ट्या। वयममराः सन्तोऽपि नामराः। अयमेव वास्तविकोऽमरः। सिद्धिमन्तोऽपि वयं न सिद्धाः, अयमेव प्रसिद्धो महात्मा। अनिर्वचनीय-शक्ति-सम्पन्नोऽयं शस्त्रं विनैवाष्टौ कर्मारातीन् जेष्यति। सुपथ-निर्मातुरस्य जननी भवती भृशं प्रशंसनीया। भवत्याश्चरणयोर्भूयोभूयः प्रणामोऽस्तु नः। अस्माकं वाणी भवदीयां गौरवगाथां गायति। तस्य पितरौ देवानां वचनानि श्रुत्वाऽतीव प्रसन्नौ सञ्जातौ। तनयं च वनगमनार्थं समादिदिशतुः।

संतापहरण-निमग्नीकृत-निखिल-वाङ्मयाम्बुधि-पारगामिलङ्काधिपः, मत्स्यपाल-जामातृ-पद-प्रापित-भीष्मपितामहः, वनवासि-भिल्ल-सुतासक्तीकृतोपश्रेणिकः, नृत्यरत-मेनका-कटाक्ष-विद्धमर्मोपहसित-विश्वामित्रो मन्मथस्तं महावीरं क्षोभयितुं समर्थो न प्रबभूव। किं तृणप्रहारेण गम्भीरतमो रत्नाकरः क्षुभ्यति?

यस्य साम्राज्यस्य कृते भरतो बाहुबलिनामधेयेन भ्रात्रा सार्धं सङ्ग्राममकरोत्, रावणश्छलमयं व्यवहारं व्यालम्बत, कैकेयी निखिल-जन-नयनाभिरामं रामं विपिनं प्रेषितवती, कुत्सितकंसो भागिनेयहत्यासु संल्लग्नोऽभवत्, दुर्योधनो युद्धं समवलम्ब्य भ्रातृशतं स्वर्गलोकं प्रापयामास, वीरदमनो भ्रातृव्येन श्रीपालनाम्ना सहापि समरकर्मणि लज्जितो न जातस्तत् साम्राज्यं महावीरेण नरकमिव परित्यक्तम्। राजलक्ष्मीस्तं समाकृष्टं कर्तुं नाशक्नोत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेन कुण्डग्रामस्य सिंहासनं तथैव परित्यक्तं यथा कश्चित् कुलीनः परोच्छिष्टं ग्रासं जहाति। परिग्रहपरित्यागावसरे नासीत् क्षोभो लोभश्च तस्य। इदानीं यावत् स भाग्यवानासीद्। अद्यारभ्य भगवत्पदं सम्प्राप्तुमभिललाष, तपस्यार्थं समुद्यता तेन न त्रिशूलं गृहीतं, न वाहनं, न कौपीनं, न मृगचर्म, न च कमण्डलुः। समतासमालिङ्गितः, राग-द्वेष-प्रभृति-विकार-रहित-हृदयः, परमार्थपद-प्राप्तिलक्ष्यैकतान-मनोयोगः, एकोनत्रिंशद्वर्षदेशीयश्चासौ मार्गशीर्षमासस्य कृष्णपक्षे दशम्यां तिथौ शुभे मुहूर्त्ते चन्द्रप्रभाख्यां शिविकां समारुह्य विपिनं प्रति प्रतस्थे।

गच्छन्तं महावीरं विलोक्यानुगच्छतां सहचराणां वाष्पाणि विसृजतां मित्र! न स्मरसि बालक्रीडासौहार्दम्? सखे! वटवृक्षलीलावसरे कालजिह्वाकारं फूत्कुर्वन्तं व्यालराजं विलोक्य पलायनतत्परानस्मान् त्वमब्रवीः—भो भोः सखायः, मा भूद् भयं भवताम् न पलायन्तां मयि जीवति धृतमित्रमण्डलप्राणरक्षाव्रते, एवंविधास्मासु ते पक्षपातभावनाद्य क्वास्ते? दशत्ययं शोकविषधरोऽस्मान्, रक्ष रक्ष शरणागतान्नः, कथं मौनमवलम्बसे? स्वकीयसान्त्वनावचोऽमृतैः शमय नः सन्तापम्। अस्माभिर्विना न त्वया कदापि जलमपि गृहीतम्, न मुहूर्त्तमप्यास्थितम्, भोजने, शयने क्रीडायां छाया इव सदासन्निहितपार्श्वभागाः वयं मन्दभाग्याः अद्य कथं नृशंसेनेव भवता विस्मृतिपथं नीताः? क्रीडाभूमौ नित्यं ते पदचिह्नानि दृष्ट्वा शतधा न विदीर्यिष्यन्तेऽस्माकं हृदयानि? देवताचंनार्थं तव कररुहैर्विलून-कुसुमान् लताग्रभागान् पश्यन्तो वयं केन प्रकारेण शोकावेगं निरोत्स्यामः, इत्येवंविधैर्हृदयविदारकैः करुणक्रन्दनैः।

प्राणनाथ! अभिनवसरसिजैर्गुम्फितां मालामद्य कस्य कण्ठे समर्पयिष्यामि, हा! हा! जीवन! त्वया विना मत्स्यवत् नाहं क्षणमपि प्राणान् धारयितुं शक्नोमि, लतेवेयमभाग्यवती कमवलम्बताम्, हे प्रियतम! तव मुखचन्द्रज्योत्स्नाभावे कथमहं मोहान्धकारे स्थास्यामि, वल्लभ! धिगिदं मे यौवनम्, यच्चन्द्रमण्डलमिव तव हृदयसागरं न समुत्तरलीकर्तुं प्राभवत्, हे स्वप्न-प्रियतम! सौभाग्यहीनाहं स्वप्नालिङ्गनेनापि प्रतारिता त्वया किं कुर्याम्? क्व गच्छेयम्, जीवनाधार! तव संगमाशोन्मत्तया मया किमपि नावगणितम्। कथमिदानीं मुखं प्रदर्शयिष्यामि गुरुजनान्? अशरणास्मि। देहि मे सान्त्वनाम्। कान्त! त्वमेव हृद्गतोऽसि, बहिर्गतः, प्राणायितश्चासि, संकल्पसोपानततौ विद्यमानं त्वां समुपलब्धुं धावमानाऽहं श्वासाकुलास्मि संवृत्ता। हे जीवनसर्वस्व! त्वत्प्रापकाद् एनसोऽपि न त्रस्यामि। त्वदीयदास्येऽपि न लज्जेऽहम्। पश्य! नदी सागरम्,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लता विटपिनम्, चन्द्रिका चन्द्रं च लब्ध्वा चिरं मोदते। एका मन्दभाग्याऽहं त्वद्वियोगजनितमूर्च्छामयद्वीपमहान्ध्यपङ्के निश्शरण्या सती निमज्जामि, हे स्वामिन् ! त्वमेव मया श्रुतः, दृष्टः, नीरन्ध्रितबुद्धिधारं ध्यातश्च; शरणदानं प्राणान्तो वा द्वयमेव तवैव हस्ते विद्यते, यदिच्छसि विधेहि। हे परमात्मन् ! त्वदेकलुब्धे मे हृदये स्वर्गसौख्यस्यापि चिन्ता नास्ति, त्वमेव मे जीवनलतायाः करपल्लवितः, स्मित-कोरकितः, अङ्गलावण्यकुसुमितश्चाधारवृक्षोऽसि। मां विरह-निदाघतप्तरजःकणायां धरायां पातयित्वा क्व प्रयासि? इत्येवं विलपन्तीनां राजकुमारीणां मर्मवेधकैर्विलापैः; युवराज ! त्वयि गते सति को न्वस्मान् परिपालयिष्यति, कस्य हस्ते समर्प्यास्मान् त्वं प्रयासि, बाल-तरुण-वृद्धसमालोडन-तत्परे सति मदोन्मत्तमातङ्गे भोः भोः नागरिकाः सर्वेऽपि स्वकीयगृहेषु सुरक्षिताः भवत, पलायध्वं पलायध्वमहमेकाक्येव समदं गजमिमं प्रकृतिस्थं विधास्या-मीत्युक्त्वा स्वप्राणान् अविगणयता यः स्नेहः प्रदर्शितः, कुतोऽद्यापि सः। कथं न तस्मिन्नेव दिने गजशुण्डपात्रीकृता वयम् ! सिद्धार्थेऽपि शासनसञ्चालनासमर्थे सतीदानीं शत्रुभिर्नूनं निश्शेषिताः वयम्। युवराजस्य शासनकाले राज्येऽस्मिन् एवंविधानि परिवर्त्तनानि परियोजनानि च प्रयोक्ष्यन्ते इत्येवंप्रकाराणि चास्माकं स्वप्नकुसुमानि विमर्द्य कथं निर्मम इव गन्तुमुद्यतोऽसि, एवंविधैः प्रजानां हाहाकार-मिश्रैः स्वरैर्मुखरिताः दश दिशोऽपि विलापं चक्रुः।

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri .

तृतीयं सोपानम्

प्रफुल्लद्रसाल-मञ्जरी-निषण्ण-कोकिलाऽऽलाप-गीतस्वरैः, विविध-कुसुम-मकरन्द-पानोन्मद-मधुकरी-पटल-गुञ्जित-वीणा-वादनैः, मृदुल-मलयानिलदोलित-लताङ्गार्पित-ललित-लास्योपहारैः, भक्ति-रस-भर-विनत-विटपि-विटप-भुज-वर्षित-कुसुम-घृतमरन्द-वरणोदकैः, रसावलीढ-तटिनी-करानुवर्तित-फेन-चामरचयैः, मृदु-सुरभित-शीतल-मलय-समीरण-व्यजन-वीजनैः, पवन-परिपूरित-रन्ध्र-वेणु-जेगीयमान-गुण-गान-विशेषैश्चाभिनन्दन-पात्रीकृतः, नक्षत्र-निकर-दीपकापसारित-सकलाभ्यन्तर-तिमिर-जाले, उन्मद-दिग्गज-गण्डस्थल-च्युत-मद रेखा-चित्रित-दिग्भित्तिके. वितत-गगन-मण्डल-वितान-कलित-हर्म्यस्थले, विविध-भुवन-कक्ष-कमनीये, कलाधर-धवलाऽऽतपत्र-निवारिताऽऽतपे, निषण्ण-हरिण-नाभि-मद-मोदित-तृण-विष्टर-रमणीये, विचरन्मधुकर-कोकिलकलापाऽऽलाप-वाचालिते, आस्तीर्ण-पुष्प-पटल-पट-प्रावृत-शयन-शोभिते, नृत्य निरत-रमणी-स्मित-मुकुलित-लता-मण्डपान्तःपुरे, मद-मत्त-मातङ्ग-शुण्डा-जल-पूरिताऽऽलवालजाले, सतत-सन्निहित-फल-कुसुम-भरावनम्रैः, ताल-तमाल-तिलक-वकुल-बहुलैः, कण्टकित-लताङ्ग-नालिङ्गित-विटपि-पटलैः, विहग-कुल-कलाऽऽलाप-कोलाहलिभिः, काननैरुपशोभिते, करि-कलभ-कर-मर्दित-तमाल-किसलयाऽऽमोदिते, मदकल-कुरङ्ग-कुल-लूयमान-पल्लवचये;शुक-वृन्द-विदारित-दाडिम-रसार्द्रैः, अनवरत-पतित-कुसुम-रेणु-रञ्जितैः, वन-देवता-विरचित-किसलय-निचय-निधुवनशयनैः सहकार-केतकी-करीर-वकुला-शोक-पनसामलकी-परिगत-प्रान्तैर्लतामण्डपैर्विराजिते,-शबरानुगम्यमान-केशरि-शत-नख-मुख-पतित-करि-कुम्भ-मुक्ताफल निकर-निचिते, प्रावृट् समय इव जलधर-श्यामले, गगन-देश इव ऋक्ष-मण्डिते, सुधाकर इव हरिणाव्यासिते, विरहो-त्कण्ठित इव मलयज-मृणाल-सौरभ-वाहिनि, साम्राज्य-प्रबन्ध इव सतत-चमर-मृग-बाल-व्यजनोपवीज्यमाने, जलधर इव विविधशतह्रदालङ्कृते, समराङ्गण इव परिस्फुरत्खड्गकुल-पीड़ित-सकल-जीवे, पावनाश्रमे समाधिस्थितो बभूव ।

रसालपल्लवनिषण्णाः पिकवध्वः सहर्षं वीरविजयं जगुः । तत्र प्राकृत-जीवनस्य मूर्त्तिमान् आदर्शः परिदृश्यते स्म । विकसितकुसुमानां छलैः समग्रं काननं हसतीव प्रतीयते । नास्ति किञ्चिदपि कृत्रिमम्, सर्वं वास्तविकं वातावरणं हृदयमावर्जयति । कणे-कणे शान्तिरेव विहरति सर्वत्र । अनेन विपिनमधिकतरं शोभते स्म । मौनगिरा च सर्वेभ्योऽपि दर्शकेभ्यो मङ्गलघोषणां चकार । अत्रैव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुरम्यभूमौ सन्मतिः निर्ग्रन्थदीक्षां धारयिष्यतीति । अत एवास्य काननस्य एकैकं कोणं निजनिजभाग्यं प्रशशंस । शिविकां विलोक्यैव विहङ्गमाः मधुरस्वरागतगीतमगायम् । स्वान्त करणस्योत्कण्ठापि कुरङ्गैः संसूचिता । किन्तु न कोऽपि वनचरस्तत्र चुक्षोभ । दीक्षोत्सवस्य दर्शनार्थं प्रत्येकं पशुः, पक्षी च कुतूहली जातः । यतो हि तैरद्य प्राणिमात्रस्य परित्रातापि सम्प्राप्तः । अत एव सर्वैरपि स्वकीयं सौभाग्यं प्रकाशितम् । यस्य दर्शनार्थं देवाः देवलोकं विहाय धरायामवातरन् । स्वयमिन्द्रोऽपि यस्य पादपद्मरजसा स्वात्मानं कृतकृत्यं मेने । ते सर्वेऽद्य तस्यैव सहवासितालाभमालभन्त । अतः सर्वे वनवासिनः प्रफुल्लिताः सञ्जाताः । सर्वैरपि निजभालस्थलानि नामितानि तस्य पुरतः । विटपिशाखाभिर्नम्रीभूय श्रद्धया पुष्पाण्यर्पितानि । झात्रिखण्डस्य प्रत्येकं कणो भगवतः सुस्वागतं व्याजहार । यथाशक्ति सर्वैरपि सत्कारः कृतस्तस्य । समीरणः प्रशान्तः, आकाशं शुभ्रं मलरहितं च जातम् । एवं विचार्य तत्राकारणमेव शुभशकुनं समजनि । यदा हि एकस्मिन् शिलातले वीरकुमारः समारुरोह तदैव सर्वासु दिक्षु जयकाराः गुञ्जिताः बभूवुः । उत्तराभिमुखीभूय क्रमशः सर्वा अपि राजभूषाः परित्यक्तास्तेन मुनिना । क्षिप्तानि च सर्वाणि परिधानानि । मुक्ताहाराश्चापि निराकृताः । न चरणपादुकाऽवलम्बिता न चातपत्रं धृतम् ।

इत्येवमसौ निर्ग्रन्थदीक्षां दधौ । एवं प्रकारेण चतुर्दशान्तरङ्गाः बहिरङ्गाश्च दशपरिग्रहास्तेन परित्यक्ताः । सिद्धाश्च सर्वे नमस्कृताः । अन्तर्मुखोसम्भूयासौ स्वकीयमान्तरिकं वृत्तान्तं व्यजानत् । शरीरस्य व्यामोहं विहाय मनस्यात्मनोऽविनश्वरं वैभवमङ्कितमेतेन । महामुनिना सत्वरमेव पञ्चमुष्टिभिः सर्वेऽपि मूर्धजाः विपाटिताः ।

यः कश्चनापि पदार्थः परकीयतयानुभूतस्तेन स सर्वोऽपि परित्यक्तः ।
अष्टाविंशति मूलगुणैश्चैतन्यं व्यभूषयदसौ ।
मनोवचनकायशुद्धिं विधाय निश्चलोऽभूत् ।

दर्शकाः संस्मृत्य संस्मृत्य तस्योज्ज्वलं चरित्रं प्रत्याजग्मुः । अचलभावेन समाधिस्थितोऽसौ ध्रुवनक्षत्रमिव शुशुभे । दिनपतिर्नित्यं तस्य प्रदक्षिणां चकार रजनीशश्च नीराजनं प्रदर्शयामास ।

शान्तभावेन ध्याननिरतोऽसौ विश्वशान्त्यै स्वयमेव परमार्थ-सिद्ध्यर्थं तत्परोऽभवत् ।

आत्मनैवाऽऽत्मनि स्वात्माराधनं प्रारेभे । दिवारात्रं ध्यानं दुर्धरं तपश्च तताप । ध्यान-निरतेन तेन योगिना सप्तोलब्धयः प्राप्ताः । तपसः प्रारम्भ एव मनःपर्याय-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञानं लेभे मुनिः। पुनश्चाप्रमत्तनामकं गुणस्थानं लब्ध्वा धन्यो जातः शुभ सामायिकं चारित्रं व्यक्तमभूत्। एवं विविधा गुणास्तस्मिन् तपस्विनि संमविष्ठिताः। एकाकी सन्नपि वीरोऽधीरतां न यातः॥

कणमात्रमपि भोजनं न भुक्तम्। बिन्दुमात्रमपि जलं न पीतम्। किन्तु क्षुत्पिपासयोर्मुखखमण्डले चिह्नं न दृश्यतेस्म। राजभवनतोऽपि वने भृशं प्रसन्नो दृश्यतेऽद्य महावीरः। वृष्टयो वर्षन्ति; रविर्दहति, शीतलः पवनः प्रवहति, परं कदापि सः विचलितो न बभूव। भोगेषु संवर्धितं कायमसौ योगकर्मसु नियोजयामास। रात्रौ मृगपतयो गर्जन्ति, किन्तु वीरस्य दृष्टिर्नासाग्रतो न विचलति। समक्षं व्याघ्राः युध्यन्ते परं चासौ न कदापि चकम्पे। एवं प्रकारेण ध्यानदशायामेव बह्वयो रात्रयः, बहूनि दिनानि च व्यतीतानि। किन्त्वाहारं विना न कदापि विकलो जातः। तरुतलतोऽपि फलानि न संगृहीतानि। स्रोतसोऽपि जलं न पीतम्। वृक्षपल्लवैरपि शरीरं नाच्छादितम्। समक्षं विकीर्णैर्द्रुमपत्रैर्वह्निरपि न तप्तः। एतस्य दृढ़तां दृष्ट्वा शीतकालिकरात्रिरपि चकिता जाता। निर्वसनं वीरं विलोक्य शीतपवनोऽपि महाश्चर्यं प्रपेदे। प्रतिक्षणं ध्यान-निरतमेनं निरीक्ष्य दश दिक्पालाः विस्मयाम्बुधौ निमग्ना बभूवुः।

प्रथमप्रयासेऽपि तेन तपस्विना ध्यानकर्मणि नूनमभूतपूर्वं साफल्यमुपलब्धम्। विजये प्राप्तेऽप्यसौ हर्षोन्मत्तो न जातः। न च वीतरागतां विसस्मार। सः महावीर आसीत्। अतो दौर्बल्यं किञ्चिदपि तं स्प्रष्टुं न शशाक। साधनायामपि विचलता नासीत् अल्पीयस्येव समये गृहद्वारं विस्मृतं जातम्। पित्रोरपि स्मरणं न भवति। एवंविधायां ध्यानदशायां दिनत्रयं व्यतीतम्।

तत्र बहवो हिंसकाः जीवाः आजग्मुः। न कोऽपि वीरं पीडितवान्। सर्वैर्जन्तुभिरपि तस्य करुणार्द्रं हृदयं परीक्षितम्। आत्मध्यानमूर्तेस्तस्य स्वभानमनवरतं जायते स्म।

ततः सः पारणार्थं कुलग्रामं प्रतस्थे। अमुं विलोक्य कूलनृपतिस्तस्य स्वागतं व्याजहार। पुनश्च प्रदक्षिणां विधाय मधुराऽऽहारदानार्थं प्रयत्नं प्रारब्धवान्। चरणयोर्मस्तकं नमयित्वा, नवधा भक्त्या च स्नेहार्द्रहृदयः परमानन्दाश्रुपरिप्लुतविलोचनश्च भूत्वा समपूजयत्तम्। योगिपदस्य यद्-यद् अनुकूलं तत् तत् सर्वमपि सम्पादितं तेन नृपतिना। योगानुकूलं च सात्त्विकं भोजनं समर्पितम्।

अमुं समाचारं ज्ञात्वा सर्वेऽपि भक्तास्तत्र समवेताः सञ्जाताः। नृपतिप्राङ्गणमाकर्षणस्य केन्द्रस्थलं संवृत्तम्। नरेशो महोत्तुङ्गासनं समर्प्य तस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरण-कमले प्रक्षालयामास। पुनश्च पादार्घ्यादिभिर्यथाविधि पूजां विधाय स्वकीयं जीवनं कृतकृत्यं मेने। शुभेऽस्मिन् क्षणे सोऽतीव हर्षनिर्भरोऽजायत। यतो हि परमसुखदाता साक्षात्स्वयमातिथ्यं गृह्णाति। एवं विचार्यासौ वारं-वारं मस्तकं नमयाम्बभूव पुरतस्तस्य। विचारयति चाद्य कूलनाथस्य गृहे त्रैलोक्यनाथः स्वयमेव समागच्छत्। दुर्लभं लाभं लब्ध्वापि स उन्मत्तो न न जातः। न च हर्षातिरेकेण प्रमत्तो बभूव।

महावीरोऽपि तस्य दिव्यं स्वागतं विलोक्य विमुग्धो नाभवत्। समताव्रत-शीलाय दुग्धं मिलेत्, जलं वा। नास्ति कश्चिदपि विशेषः, यावद् आहारकार्यं न परिसमाप्तं तावत् न किंचिदप्यूचे। संकेतमपि न कृतवान्। याञ्चा तु दूरापेता। किं कटुतरम्, किं मधुरम्, किं सुस्वाद्यम्, किं कुरुचिकरम्, किं नीरसम्, किञ्च सरसम् न किंचिदपि ज्ञातुमियेष। आहारमादायासौ वनं गन्तुं समुद्यतो बभूव। आसीत्तस्य जिनपतेर्जीवनमतीव संयतम्। यावद्धि स भवनाद् बहिर्निर्जगाम, तावद्धि नृपतिः पञ्चाश्चर्याणि ददर्श। आहारदानस्य फलं विलोक्य नयने अतीव प्रफुल्लिते जातेऽस्य, तस्माद्दिनात् तस्य पुण्यकथने कवयोऽप्यसमर्थाः बभूवुः। प्रभोर्मनसि ग्रामं प्रति न घृणाभावः, न च नगरं प्रति स्नेह-व्याकुलता। न भर्त्सना कटुतरा प्रतीयते, न च सत्कारो लोभनीयतयानुभूतस्तेन। साम्यभावेनैव सर्वमपि तेन सोढं सुख-दुःखादिकम्। स न सुखेषु हसति, न च दुःखेषु रोदिति। सर्वदा धीरेण चैवंविधाः प्रयासाः कृताः यैर्न कश्चनापि पीड्यते। नर-पशु-खग-कृमि-तरु-घास-प्रभृतयः सर्वेऽपि पदार्थास्तस्य करुणाभाजनतां प्राप्ताः। तनुपोषणार्थं न तेन कापि युक्तिरुचितानुचिता वावलम्बिता, तस्य वीतरागतां विलोक्य रसविह्वला मुक्तिरमणी तस्मिन् समासक्ता सञ्जाता।

क्रमशः स कर्मारग्राममाजगाम। तत्र तेन पावनयोगो धृतः। तत्रैव च रात्रिरपि व्यतीता। एकस्मिन् समये तत्रैको गोपः समागत्याब्रवीत्—शृणु, भोस्तपस्विन्! अमूर्मे गावस्तव पुरस्ताद् विद्यन्ते, अहं तावद् किञ्चिदनिवार्य-कार्यार्थं ग्रामं गच्छन्नस्मि, यावन्नाहं परावर्ते, न तावत् त्वया कुत्रापि गन्तव्यम् इत्युक्त्वा स सकलाः गाः विहाय कुत्रापि निर्जगाम। अत्र जिनवरः समाराधन-तत्परोऽभूत्। यावद् गोपः कार्यं साधयित्वा प्रत्याजगाम। तस्मिन् समये स समाधिस्थित एवासीत्। निर्धारितस्थाने धेनूरनवलोक्यासौ क्रुद्धोऽभवत्। वारम्वारं मुनिवरं पप्रच्छ, किन्तु नोत्तरं प्राप्नोत्। वीरस्य मौनं विलोक्य गोपः क्रोधान्धो जातः। रात्रिपर्यन्तं गाश्चान्वेषयामास। परं न कुत्रापि तासामुप-लब्धिर्जाता। प्रभातं समजनि। पुनश्च स सन्मतेः समक्षमागत्य ता लब्धवान्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रुद्धो भूत्वा वीरमतर्जयत्, यद् गोमण्डलं जानताऽपि त्वया निष्कारणतया प्रतारितोऽहं, व्यर्थं परिभ्रामितश्च इत्युक्त्वा स मुनिवरं हन्तुमभिजगाम। त्रिशलानन्दनो न किमपि तमब्रवीद्द्विषम्। तस्य मौनं विलोक्याभूद् गोपालस्य हृदय-परिवर्तनम्। हिंसायाः बलवती भावना चाप्यवकुण्ठिताऽभवत्। विनोपदेशश्च समाविर्बभूव तस्य चेतसि करुणाप्रवाहः। पश्चात्तापं च चकार। व्यर्थं मया कटुवचनैः क्लेशितोऽयं तपस्वी। भक्त्या चरणौ प्रणम्य गोमण्डलं चादाय स स्वकीयं गन्तव्यस्थानं प्रपेदे।

एवंप्रकारेण समतयाऽसौ विविधानुपसर्गान् सहतेस्म। शत्रुं मित्रञ्च समानदृष्ट्याऽपश्यत्। सदैव पदयात्रां करोति। न कदाचिदपि वाहनमारोहति, न चाश्रयते कदाप्यट्टालिकाम्। कर्मारग्रामतः कोल्लागग्रामं प्राप्य वासो विहितस्तेन। ततः स मोराकं प्रति प्रतस्थे। प्रावृट्काले पञ्चदशदिनानि यावद् उपवासमकरोत्। प्रथमञ्च चातुर्मास्यं प्रपूर्णं तत्र। अथ स अस्थिग्रामं जगाम। विषमेणैव मार्गेण निर्भीकभावेन च चचाल सः। नासीत् तस्य महासाहसिनो हृदये भयलेशोऽपि। समक्षं विपत्सु सतीष्वपि न त्रस्तो जातः कदाचन। प्रतिद्वन्द्विभिः कृतेऽपि प्रहारे न भवति क्रोधाविष्टः। स्वयमेव सकलान् क्लेशान् सोढुं प्रयतते। न कञ्चिदपि प्राणिनं विदधौ दुःखान्वितम्। न यावद् तेन विशुद्धं कैवल्यं समुपलभ्यते, तावत् स्वघातिकर्मभिर्युद्धमनिवार्यमासीत्। अत एवासौ निरन्तरं तपस्तप्त्वात्मपरिशोधनं विदधाति। करोति च परमार्थप्राप्त्यर्थं निरन्तरं विविधान् संवरप्रयोगान्।

सर्वदैव स प्रत्येकं विषमतायाः स्वागतार्थं समुद्यत आसीत्। हृदये पथ-दुर्गमतायाः नाभूद् भयम्। न कदाचिदपि तेन क्रोधादिकाश्चतुःकषायाश्चोत्पादिताः। निर्जरां प्राप्तुं बहवः सदुपायाः समवलम्बितास्तेन। यश्चाप्युपसर्गः समागच्छति, स साम्य-भावेन सहते तम्। न भवति धैर्याच्च्युतोऽसौ। एकदा गोपैर्मुहुर्मुहुः निषेधो विहितः—भोस्तपस्विन्! नानेन विषमेण मार्गेण गन्तव्यं भवता। अत्रैको वसति दृष्टिविषो नाम विकरालविषधरः। न कश्चन पुरुषो गन्तुं शक्नोत्यस्मात् स्थानादन्यत्र। न कश्चिदपि तस्योरगस्य गरलज्वालां सोढुं समर्थः। यः कश्चनापि तत्र गच्छति स सर्पस्तं नूनं दशति। अतो हेतोर्भूयो भूयः प्रार्थ्यते यत् त्याज्योऽयं विषमः पन्थाः भवद्भिः।

इमां सूचनां प्राप्यापि वीरो हतोत्साहो न जातः। दृष्टिविष-भुजङ्गमस्य भयेन न मार्गः परिवर्तितस्तेन। तस्मिन्नेवाध्वनि गच्छन्नसौ तदबिलसमीपं ययौ। तत्र चाभवद् ध्यानावस्थितः, विषधरोऽपि तमदृष्टपूर्वम्, ध्यानावस्थितं वीर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समवलोक्य चकितो जातः। नायं साधारणः पुरुषः इति ज्ञात्वाऽपि पराजयो न स्वीकृतस्तेन। विषाक्तदृष्ट्या समवलोक्य फूत्कारं चकार। अद्य तस्य सकलोऽपि प्रयासः विफलो जातः। मुहुर्मुहुः प्रहरति परं सफलतां न लभतेऽसौ। तेन साहसं न परित्यक्तम्। झटिति तदङ्गुष्ठभागं दंशितवान्। वीरो न क्षणमपि चचाल, न च नेत्रमुन्मील्य व्यालं व्यलोकत्। तस्य धीरतां दृष्ट्वा फणधरोऽतीव क्रोधान्धः संवृत्तः। पुनश्चाकरोद् बहुबारं फणप्रहारम्। दंशयित्वा च व्रणे विषं पुपूर। हिंसया सर्पस्तं महामुनिं जेतुं न शशाक। महामुनिस्त्वहिंसाबलेन व्यालं पराजितं कृतवान्। स्वकीयं पराजयमनुभूय भुजगोऽचिन्तयत्—कोऽयं महापुरुषः, यो मदीयैः फणप्रहारैर्विचलितो न जातः। मम त्रासेन सन्त्रस्तैर्विहङ्गमैरत्र निवासप्रीतिरुज्झिता। मृगैर्वनविहरणं परित्यक्तम्। परिहृतश्च सर्वैरपि पथिकैर्मार्गोऽयं सर्वथा। अयं तु मम प्रहारस्य स्वागतं कुर्वन् नगाधिराज इव तिष्ठन्नास्ते। किमस्य स्वकीयेऽपि शरीरे ममता नास्ति? प्राणान् प्रति व्यामोहो, जीवनं प्रत्यासक्तिश्च नास्ति किमिति महान् मे संशयो जातः? तथा ह्यस्य मुखमण्डले काप्यलौकिकी छटा विच्छुरति क्षणे क्षणे।

महावीरस्य क्षमां विलोक्य स स्वपराजयं स्वीकृतवान् पादवन्दनं विहाय न कोऽपि सत्कारविधिर्मतोऽमुना। तेन विश्वबन्धोस्तस्य हृदये विश्वसमभावः समवलोकितः साक्षात्।

सन्मतेर्भाषणं विनैव मौनसंकेतेन विषधरोऽसौ संबोधनं परिज्ञाय सर्वानपि स्वकीयानपराधान् सस्मार, क्षमां च ययाचे। एवंप्रकारेण पश्चात्तापं विधाय तेन पूर्वक्रमः परित्यक्तः। पञ्चदश दिनानि यावद् अन्नपानं चापि विहाय महोपवासं कृतवानसौ। शरीरं त्यक्त्वा च पुनः स्वर्गं जगाम।

पश्चात् स वाचालां नगरीं गतवान्। ततः श्वेताम्बीं नगरीं समवाप। तत्र 'प्रदेशि' नामकेन नरपतिना तस्य स्वागतं सम्पादितम्। ततः स थूणाकं प्रापत्। तत्र तत्पथचिह्नं दृष्ट्वा पुष्यनामधेयेन सामुद्रिकेन तस्यानुसन्धानं प्रारब्धम्। गवेषयन्नसौ सन्मतेः समाधिस्थानमाजगाम।

यावद्धि स वीरस्य निर्ग्रन्थं दिगम्बरञ्च शरीरं पश्यति तावदेव स निराशो जातः समस्याभिश्चावबद्धः। जीवने प्रथमबारमेतेन तदौदासीन्यमनुभूतम्। तेन सामुद्रिक-शास्त्रमुद्घाट्य पठनं प्रारब्धम्। तत्राङ्किताभिः सर्वाभिः रेखाभिर्वीरचरणयोः रेखाः मेलितवांश्च।

तेन विचारितं यद् एवंविधाभिः रेखाभिरलंकृतो मानवो निश्चयेन चक्रवर्तिपदं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लभते। किन्त्वस्य शरीरे कौपीनमपि न दृश्यते, मुकुटादिकं तु दूरापेतम्। मिथ्येदं शास्त्रं प्रतीयते। एवं विचार्य स ग्रन्थं विपाटयितुं तत्परो जातः। एतस्मिन्नेव समये तत्र प्रभोर्दर्शनार्थम् आगताः जनास्तं पप्रच्छुः—भोः पण्डितवर! किमर्थं शास्त्रं विनाशयसि। सामुद्रिकेन यथाक्रमं सर्वं निवेदितम्। पथिकैश्चोत्तरितम्—सामुद्रिक! त्वं न जानासि यदयं कुण्डग्रामस्याधिपतेः सिद्धार्थस्यात्मजो महावीरोऽस्ति। एतच्छ्रुत्वा सामुद्रिकोऽसौ तस्य चरणयोर्ननाम। प्रणम्य शास्त्रे च विश्वासं दृढ़ीविधाय निज-वासभूमिं ययौ।

थूणाकग्रामतोऽसौ राजगृहीनामकं स्थानमाससाद। ततस्तस्मात् स्थलात् नालन्दां जगाम। चातुर्मास्यं चात्रैव कृतं तेन। तत्रैव च जातो भिक्षुगोशाल-केनापि साकं तस्य प्रथमः सङ्गमः। यो मौनमुद्रया प्रत्यहं महावीरस्य दिनचर्यां व्यलोकयत्। वीरस्य सत्यतायाः प्राकृतिकसरलतायाः निर्मलतायाश्च प्रतिच्छायास्य जीवनोपरि निपपात। स्थित्वात्र तेन मासपर्यन्तमुपवासो गृहीतः। मासक्षपणा-नन्तरमेव स पारणां गृहीतवान्। कस्यापि निजेन्द्रियस्य कृतेऽपि व्यग्रता न दृश्यतेऽस्य हृदये। प्रत्येकं जीवेन सह सर्वदैव मैत्रीभावं प्रदर्शयति। हितैषिणीं शान्तां चैव मुद्रां प्रकटयति सततम्। जगतः प्रदर्शनार्थं नानेनात्माराधनं कृतम्। न च प्रतिष्ठां प्राप्तुं तपःकार्यं करोति सः। अतस्तस्याऽऽसीद् गोशाल-कोपरि महान् प्रभावः। फलतोऽमुना वीरस्य शिष्यत्वमङ्गीकृतम्। प्रतिबिम्बवत् न कदापि महावीरस्य सङ्गस्त्यक्तस्तेन।

यत्र कुत्रापि सन्मतिः प्रविशति तत्रैव तस्य यशोडिण्डिमा श्रूयते। पञ्च-महाव्रतपालने तेनाऽतीवावधानता प्रदर्शिता। न कदाचिदपि तेन स्वकीयं शीलं परित्यक्तम्। न कुत्रापि चिरकालपर्यन्तं च तिष्ठतिस्म सः। प्रायो विजने तपोवने एव सोऽहं सोऽहं जपति सर्वदा। पारणायां विघ्ने महति समागतेऽपि न सन्तप्तो जायतेऽसौ। दुष्टैर्मुहुर्मुहुः पीडितोऽपि नाभिशशाप कमपि। बहवो दुर्जनास्तत्रागत्य तं तपसो विचालयितुं प्रयतन्ते, किन्तु न कोऽपि भवति सफलः। न कदापि कस्य-चिदुपरि क्रोधं करोति सः। न च निकटे शिथिलाचारमाह्वयति। न तस्मिंश्च कश्चिदपि प्रमादलेशो दृश्यते। क्षणमात्रमपि तस्यासंयमेन व्यतीतं न भवति। निरन्तरं पदयात्रयैव गच्छति सर्वत्र। मार्गस्य कण्टकान्यपि नावरोधकतया प्रतीयन्ते तस्मै।

ततोऽसौ ब्राह्मणग्राम-चम्पा-कालायस-पत्रकालय-कुमाराक-चौराक-कयंगला-श्रावस्तीप्रभृतिषु स्थानेषु परिभ्रमन् हल्वदयग्राममाजगाम। तत्रैकस्य पादपस्या-धस्ताद् एव तस्थौ। तत्रान्येऽपि यात्रिणः समाजग्मुः। तैः परिशुष्कतरुपत्रराशि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्निरग्निः प्रज्वालितः। प्रातःकाले ते मूढाः हुताशनमशमयित्वैव कुत्रचिन्निर्गताः। कतिपयेषु क्षणेष्वेवाग्निस्तत्र सर्वत्र वने प्रससार। प्रसृतश्चासौ ध्यानस्थितस्य वीरस्यान्तिकमाजगाम। ज्ञात्वेदं प्रभुरसौ शरीरं मेरुसमं दृढीचकार। अग्निज्वालाजनितक्लेशं सोढुं मनोदेशः सागर इव गम्भीरो जातस्तस्य। तस्यासमसहनशीलतां विलोक्य बभूव वरुणोऽप्याश्चर्यचकितः। गोशालकः समुत्थाय कुत्रापि पलायितवान्। वीरस्य रोमापि च न चकम्पे। दृष्ट्वा तु तस्य साहसं धरित्री व्योमापि च कम्पाते। कतिपयेषु क्षणेष्वेव हुताशनः शान्तो जातः। घासः, लताः, द्रुमाश्च भस्मीभूताः अभूवन्। परं वर्धमानस्य नाभूत् काचिदपि क्षतिः।

ततोऽसौ नंगला-आवत्ता-कलम्बुका-राढ़भूमि-मलय-मद्दिलपुर-लोहार्गलापुरिमताल-प्रभृतिषु विविध-प्रदेशेषु पर्यटनं विदधौ। तत्र तस्य प्रगाढं ध्यानं दृष्ट्वा सुरपतिरपि स्पर्धां चकार। जगौ चैतस्यैव कीर्तिगानम्। स सर्वेषां देवानां पुरस्ताद् इदमब्रवीत्- नास्ति कोऽपि महावीरसमानो ध्यानी, ज्ञानी, योगी चेदानीम्। शतजिह्वाभिरपि तस्य ध्यान-महिमा विवेचयितुं न शक्यते। एतच्छ्रुत्वा कश्चन देवो विश्वासं नाकरोत्। विबुधेन्द्रं पृष्ट्वाऽसौ तं प्रत्यक्षमवलोकयितुं समवततार वसुन्धरायाम्। विकरालदन्तावलीं निष्कास्य, दृग्युगलं लोहितं विधाय, भालस्थले च शृङ्गं निर्माय, भीषणं रूपं प्रदर्शयामास सः। क्षणे-क्षणे घोरगर्जनाभिः सर्वा अपि दिशो वाचालिताः बभूवुः। अनेके चोत्पाता अजायन्त। विकटमाययाभूत् समग्रमपि काननमातङ्कितम्। परं वीरोऽसौ न चकम्पे। यदा सः स्वकीयं प्रयत्नं विफलमपश्यत्, तदा तेनोपायान्तरैस्तस्य तपःस्खलनार्थं प्रयासः प्रारब्धः। देवेन मायया किरातानां महती सेना विनिर्मिता। तया च तं त्रासयितुमियेष। किन्तु वीरस्य ध्यानं भग्नं नाभवत्। स देवः पुनरचिन्तयत्- मया बह्वो विषमाः प्रयत्ना विहिताः परं नायं बिभेति न च कम्पते। किं कायं प्रति मनुष्यस्यास्य ममता नास्ति? निश्चयेनायं न भविष्यति पथभ्रष्टः। मदीयं च देवत्वं विफलमेव सम्भाव्यते। एवं विचार्य सिंह-व्याघ्राणां महती तेन वाहिनी सङ्घटिता। सर्वेऽपि जीवाः भयभीताः सन्तः, क्रन्दन्तश्च दिग्दिगन्तरं पलायितवन्तः। परमनेन भीषणवातावरणेन महातपस्वी प्रभावितो नाऽभूत्। न च तस्य मुक्तिमार्गे समुपस्थिता काचिदपि बाधा।

पुनः स धूलिराशिमादाय तस्योपरि चिक्षेप। तपस्विनः कण्ठपर्यन्तं समग्रं शरीरं रेणुभिरावृतं जातम्। भूयो-भूयो जलं ववर्ष वाहिनी तस्य। पौनःपुन्येन भुजंग-वृश्चिक-प्रभृतीन् विषाक्तजन्तून् उत्पादयामास। एतैरपि विघ्नैः स भयभीतो नाभवत्। देवस्तस्य धीरतां शान्तिं, वीरतां च समवलोक्य स्वयमेवाभूत्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रशान्तः। अस्यां कठिनपरीक्षाग्निज्वालायां तप्त्वा महातेजाः संवृत्तोऽसौ। तस्य चरणयोर्वारंवारं प्रणम्य सपदि सुरलोकं जगाम सः।

ततोऽसौ वीरो नालुकां प्रापत्। विविधेषु स्थानेषु परिभ्रमन्नेषः सिद्धार्थपुरीं प्रपेदे। तत्र सुरः पुनराविर्भूय तुष्टाव तस्य महामहिमानम्—'भगवन्! षण्मासपर्यन्तं स्थित्वात्र बहवो विघ्नाः समुत्पादिता मया। देवराजस्य वचनानुसारं श्रीमतां धीरतां विलोक्य नतमस्तकोऽस्मि। क्षन्तव्यो मेऽपराधः' इत्युक्त्वा चरणयोश्च प्रणम्य स्वस्थानमगच्छत्। तत्र गत्वा सुरपतिं निवेदितवान्—देव! कैः शब्दैरहं महात्मनस्तस्य यशोगानं कुर्याम्। तस्य धैर्यमनिर्वचनीयम्। विविधं भयं समुत्पादितम्। परमसौ भग्नध्यानो नाभूत्। तस्य वृत्तान्तं श्रुत्वाऽभूवन् सर्वेऽपि देवाश्चकितचकिताः।

देव्यः परमेवं जगदुर्यद् 'यतीशाः शरीरं प्रति सदानासक्ताः, निर्मोहाश्च वर्तन्ते। अतस्तेषां पुरस्ताद् भयोत्पादनमकिञ्चित्करमेवास्ति। केवलं वासनयैव ते विचालयितुं शक्यन्ते। इदानीं वयमपि गत्वा स्वकीयं चमत्कारं प्रदर्शयामस्तत्र' इत्युक्त्वा ताः सर्वा अपि सुराङ्गनाः सम्भूय दिव्याऽऽभरणवत्यः, सुरम्यवसनावृततनुलताश्च, महर्षेः समक्षमवातरन्। तत्रागत्य विविधैर्हावभावैः स्वकीयं छविवैशिष्ट्यं प्रदर्शितं ताभिरमराङ्गनाभिः।

एकदा दिवसरात्रिसन्धिसूत्रधार इव भूयोजलनिधिमन्थनोद्यतमन्दराचल इव, विहङ्गमीमङ्गलगीतोपशोभित-जलधि-तीर-मण्डपविराजमान-रक्तचन्दनार्द्रवर इव, वरुणबालिकाकरकमलप्रक्षिप्तकुङ्कुमरञ्जितकन्दुक इव परस्परनिक्षिप्त-विविधरागमिश्रितजलधारोपशोभितहोलिकोत्सव इव, क्रोडगतरविवल्लभालिङ्गित-प्रतीचीवधूविलास इव, सुरतकक्षगतदिनकरकररञ्जितदिवाप्रमदाधरपल्लव इव, मानिनीपश्चिमदिग्वधूचरणालक्तकरागराजितदिनपतिललाटम् इव, पश्चिमजलनिधिगतसूर्यसङ्गविहङ्गमशोकाकुलदह्यमानप्रियव्रताप्रतीचीचिताग्निपुञ्ज इव, प्रियतमपतनावलोकनव्युत्थित-दिवावधू-दृग्जलधौताङ्गराग इव, प्रियकरमृदित-सन्ध्यारक्तकपोल इव, रविकिरणापसारितवसनकुङ्कुमार्द्रवसुधावक्षोजमण्डल इव, पश्चिमजलधितटस्थितसद्यःस्नातदिवानितम्बयुगलम् इव, दत्तसङ्केतवञ्चित-लोहितलोचनप्रतीचीकरोन्मज्जितरविप्रियरागरक्तरत्नाकर इव, जलनिधिदृश्या-वलोकननिमग्नधवलद्वीपकन्यकाविशृङ्खलारुणकेशपाश इव, जगत्सगरोद्भूत-विद्रुमजाल इव, सङ्केतस्थानगमनतत्परस्वर्गाभिसारिकारुणाम्बरछायाव्यति-कर इव, गवाक्षं समुद्घाट्य जगच्चित्रावलोकनदत्तचित्तप्रकृतिसुन्दरीशोभा-विलास इव, विधुरपथिकरचितप्रेयसीरक्तचित्र इव, गगनसरोवरविकसितारुण-सरसिजच्छटासमूह इव, प्रियतमरविकिरणकरापनोदितदिवामुग्धाशाटिका-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसनम् इव, पद्मरागमणिनिर्मितमदननगर इव, गमनोड्डयनरतसुरपतिगोपपटल इव, देशहितबलीभूतजनगणशोणितलिखितेतिहास इव, रतिकक्षरतसुरदम्पतीलज्जावरोधकपट इव, घोरतपोविलीनतापसजटासमूह इव, विदीर्ण-दाडिमफलोद्यान इव, कश्मीरवधूपरिक्रियमाणकुङ्कुमपुंज इव, विरहपीडितदिवास्तनमण्डलारुणचन्दनलेप इव, मातृ-क्रोडगत बालक इव, क्रतुमण्डपस्थितरक्तवसनाच्छादितनारिकेलफल इव, वरुणवालिकाक्रीड्यमानकरकन्दुक इव, महीसुन्दरीसङ्गमलोलुपसागरसमर्पितपद्मरागरत्न इव, पश्चिमदिक्ललनाललाटसौभाग्यबिन्दाविव, सुरजलहारिणीसागरोन्मज्ज्यमानकलश इव, मेदिनीमानिनीपीतावशिष्टमदिरापात्र इव, विश्वविजयोच्चलितमन्मथमकरकेतन इव, शृङ्गारसज्जावलोकनपराङ्गनाकरगृहीतमुकुर इव, प्रियविरहोत्कण्ठितप्रतीचीवधूलिखितप्रणयपत्र इव, गगनपात्रस्थितापूप इव भास्करेऽप्यस्तं गते रात्रेः प्रथम-प्रहरे सुरङ्गनास्तत्र समवेताः बभूवुः ।

रम्भाप्रभृतयः सर्वा अपि देव्यः पुष्पाञ्जलिमादाय नृत्यं प्रारेभिरे । कुसुमवर्षानन्तरं मयूरीनृत्येन ताः मनोरमवृष्टि-वेलाया आह्वानं चक्रुः । ततश्च प्रादर्शयन् कपोतीनृत्येन मधुरमानभञ्जनदृश्यम् । पुनश्च प्रत्येकर्तोरनुकूलं नवलनर्त्तनं प्रकटयामासुः । उमानृत्येनानुकुर्वन् शङ्करस्य समाधिभङ्गरङ्गम् । मन्मथवियोगपीडिताया रतिदेव्या विलापदृश्यं प्रदर्शितं ताभिः । ततस्तासां कण्ठप्रदेशेभ्यो राधाकृष्ण-सङ्ग-सङ्गीतलहरीं प्रसुस्राव । तथेमाः राधानृत्यं रचयन्त्यो नूपुरझङ्कृतिमिषेण रमणार्थमाहूतवत्यो महावीरम् । ततस्ताभिश्च रतिमदनयोः यावन्तो विलासास्ते सर्वेऽपि प्रदर्शिताः । सर्व-विधानि मदनोद्दीपकान्यङ्गसञ्चालनान्यपि विहितानि । यौवनमदगर्वितैः, माधुर्याभिषिक्तैः, कुङ्कुमकस्तूरिकागुरुचन्दनकमलगन्धराजकेतकीशेफालिकागन्धद्रव्याभिसुगन्धिताङ्गकैः व्यामोहयितुं वीरं कं कं प्रयत्नं नाकुर्वन् ? महावीरः सर्वा अपि स्वर्ग-सुन्दरीः काष्ठयष्टिवदेव मेने । तस्य महामुनेरौदासीन्यं समवलोक्य सुन्दरीभिर्मानव हृदये रागानुत्पादकं रूपं विफलमेव मतम् । परिधानानि भारभूतानि, भूषणानि दूषणानि, दुकूलानि च शूलानि समभूवन् । पुनश्चाचिन्तयन्—किमर्थं व्यर्थं वयमत्रागताः । ताभिरधुना कोकिलकलकण्ठैर्गानं प्रारब्धम् ।

तासां मधुरगीतैरपि हृदयं नापहृतं तस्य । पुनरपि नृत्यं समुपस्थापितम् । रमणीय-नूपुर-झङ्कृतिं संश्रुत्य वन्यद्रुमाः अपि ननृतुः ।

भग्न मनोरथाः सत्यः सर्वा अपि सुन्दर्यस्तस्य पार्श्वे गत्वा चैवम् ऊचुः-भगवन् ! श्रूयताम्, वयं स्वागमनस्य कारणं श्रावयामः । भवतस्तपस्यया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रमुदितेन देवराजेन फलरूपतया श्रीमतां सेवार्थं प्रेषिताः वयं सर्वाः। यासाम् अभिलाषैर्मुनयस्तपस्तपन्ति, योगपरायणाश्च भवन्ति योगिनः। यासाम् आलिङ्गनार्थं वीराः समरभूमौ प्राणान् परित्यजन्ति। यासां च सुख-भोगार्थं पूजका विविधानि समाचरन्ति व्रतानुष्ठानानि। ताः स्वर्गस्य फलीभूताः स्वयमेव वयं भवतः पुरस्तात् समुपस्थिता स्मः।

एतच्छ्रुत्वाऽपि महामुनिर्मुग्धो न जातः। सुरभामिनीनां भ्रूभङ्गैस्तस्य न विद्धं हृदयम्। मदनदेवस्य सर्वेऽपि बाणास्तु व्यर्था एव गताः। तत्र वर्त्तमानाः द्रुमलताः पशु-पक्षिणश्चापि रागवन्तो भूत्वा मन्मथ-व्यापारे व्यापृताः बभूवुः, किन्तु तपस्विनस्तस्य हृदये वैराग्यमेव विभ्राजते स्म।

कुमारो राजभोगाभावेऽपि तस्मिन् कानने दिव्य-सम्पदं प्रापत्। तत्र निसर्गस्य रमणीय-रूप-मन्दिरं, रवि-चन्द्र-नक्षत्र-प्रभृतिभिर्भ्राजमानम्, अष्टौ दिश एव सुभित्तयः, गगनस्य हर्म्यस्थलम्, शुष्क-घासोपरि मनोरम-विष्टरम्, विटपस्थिताः कोकिलाः सङ्गीतोपस्थापकाः, मधुर-जलभराश्च नद्यस्तस्य पुरस्तात् स्वर्गीयं सुखम् उत्पादयामासुः। मनुष्यस्त्वेकान्तनिवासे प्रकृति-वधूं वाञ्छति प्रायः। तदैव सापि सङ्गम-काले वैखरी-गिरा तं सम्मोहयतितमाम्। या प्रकृतिः पत्रपुष्पेषु सौरभं जनयति, चित्रयति च कुरङ्गेषु विचित्र-वर्णम्, कोकिलान् पञ्चमरागैर्विभूषयति, परिपालयति च सर्वान् जन्तून् वनेचरान् लताद्रुमांश्च शान्तिभावेन। तस्याः गुप्तग्रन्थो यैरपि पठितस्ते एव महर्षयो भवन्ति नान्ये।

न वयं रत्नराशिं न च सुन्दरीं साम्राज्यभोगं वा वाञ्छामः, वाञ्छामस्तु केवलं कैवल्यभावम्। एवं विचारयन् स जनपदाद् जनपदम्; ग्रामाद् ग्रामम्, नगरात् नगरम्, वनाद् वनान्तरम्, मार्गे निरन्तरं मन्थरगत्या प्रचलतिस्म। रात्रौ स्थित्वा दिवसेसु सदैव निर्भीक-भावेन विचचार सर्वत्र। श्मशानेषु, निर्जनभूमिषु, पर्वतेषु च भ्रमन्नपि न भीतः। कदाचित् कल्लोलिनी-कूल-रेणुषु मध्याह्नकाले निदाघस्य, कदाचित् प्रचण्डपवने प्रवहत्यपि महोच्चैरचलशृङ्गे, कदाचिच्च भीषण-शैत्ये समानरूपेणैवासौ तपस्तताप।

बहवो राजानो मधुराहारदानार्थं प्रार्थनामपि पुरतश्चक्रुः। परं सोऽन्नपानम् उपेक्ष्य स्वात्म-चिन्तन एवाभवत् तत्परः। मासत्रयं व्यतीतं कृताशनस्य तस्य। कश्चित् श्रेष्ठी चतुर्भ्यो मासेभ्यः शुद्धाहारसमर्पणार्थमासीत्तत्परस्तत्र। प्रायो नित्यं स तस्मै शुद्धान्नं पाचयतिस्म। स आशावानेवावर्तत यत् प्रभुरस्मदीय-सदने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भोजनं कृत्वा मां कृतार्थं विधास्यतीति, परं मुनिवरेण त्वन्यत्रैव पारणा गृहीता। नासीत्तस्य केनापि सह रागः न वा विरोधश्च। श्रेष्ठी तदाहार-दातुरुपरि क्रुद्धो नाभवत्; प्रत्युत तस्य सौभाग्यं प्रशशंस, निनिन्द च स्वकीयमेव दुर्भाग्यम्। महामुनिर्विभिन्नेषु प्रदेशेषु विचरन् कौसाम्बी-नगर्यां समागतः। तत्र स पौष-कृष्ण-प्रतिपत्तिथौ घोरम् अभिग्रहं जग्राह—'अहं तस्मादेव जनाद् भोजनं ग्रहीष्यामि या कन्यका स्यात्, सापि केशविहीना दासवृत्तिं प्राप्ताऽपि, शृङ्खलाबद्धापि च सती कुलीनैव भवेत्। यया च दिनत्रयानन्तरं कोद्रवनामकमेव खाद्यं समुपलभ्येत। तत्रापि सा कन्यका मह्यं तदाहारदानार्थं भवेत् व्याकुला।'

एवंविधां प्रतिज्ञां मनसि निधाय स नगरीं प्रति निरन्तरं गच्छतिस्म। किन्तु कुत्रापि तस्य प्रतिज्ञा पूर्णा न जाता। चत्वारो मासा व्यतीताः। नान्नं गृहीत-मद्यावधि। सर्वेऽपि श्रावकाः आहारदानार्थं व्याकुलाः आसन्। परं न कस्याऽपि तदन्नं स्वीकृतमेतेन। ध्रुवनक्षत्रमिव तस्य धैर्यं विलोक्य सर्वेऽपि चिन्तिताः बभूवुः।

सम्राज्ञी मृगावती राजानम् अब्रवीत्—यदसौ मुनिः पारणां न गृह्णाति। न च स्फुटतया प्रतिज्ञापि ज्ञायते तस्य। निश्चयेन नास्त्यस्माकं भाग्यम् अनुकूलम्। धर्मपरायणासु प्रजासु सतीस्वपि किमपि दुष्कृतं वर्ततेऽस्मदीये शासने। यदि तेनात्र पारणा न गृहीता, तदा त्वस्माकं प्राज्यमपि राज्यं व्यर्थमेव। जीवनं चाऽपि निष्फलमिति मन्ये। अतो भवद्भिः सपरिकरैः सत्वरं तत्र गत्वा तस्य प्रतिज्ञायाः परिज्ञानं कर्त्तव्यम्। ततस्तदनुसारमस्माभिस्तदर्थं भोजनादिकं सम्पादनीयं सुमधुरम्।

राजाप्यब्रवीत्—प्रेयसि, सर्वथाहमेवंविधमेव प्रयत्नं विधास्यामि, येन महामुनिरस्माकं भवनेऽपि भोजनं विदध्यात्। किञ्चिद् अवलम्बस्व धैर्यम्। ततस्तेन नरपतिना बहवः प्रयासाः कृताः, परं लेशमात्रमपि साफल्यं नोपलब्धममुना।

तत्रैव वृषभसेनस्य गर्हितगृहे चन्दना नाम दासी निवसतिस्म। सा चेटकनृपस्य नन्दिनी, रमा रमणीयरूपा चासीत्। परं दुर्दैववशात् पित्रोः सङ्गाद् वञ्चिता सती सा तस्य श्रेष्ठिनो दास्ये नियन्त्रिता बभूव। श्रेष्ठिन्याश्चापेक्षया सावर्ततातीव सुन्दरी। अतएव स्वामिनी नित्यम् ईर्ष्याविशात् मुहुर्मुहुः क्लेशयति ताम्। अकारणमेव परुषवचनानि प्रयुङ्क्ते ताडयति च। विवृद्धे चेर्ष्यानले तया तस्याः कमनीयकचकलापोऽपि कर्तितः। शृङ्खलाभिश्च पादौ निगृह्यासौ कुसुमसुकुमारी कुमारी कठोरकारागारे निबद्धा रोषरूक्षया तया।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंविधां दुरवस्थां प्राप्य सा नितरां दुखिता जाता। दिनत्रयानन्तरमेव कोद्रवनामकम् अन्नम् उपलब्धमेनया। तस्मिन्नेव समये महावीरस्वामी तत्रागतवान् पारणार्थम्। सापि तदन्नम् आदाय द्वारदेशं चागत्य तस्थौ प्रतीक्षार्थम्।

कदाचिद् भ्रमन्नसौ सन्मतिरत्युज्ज्वलकान्ति-धवलशरीरतया क्षीरसागरतरङ्गजालाभिलोढां लक्ष्मीमिव, पतत्पुष्परेणुपटलपाण्डुरां वनस्थलीमिव, शरत्कालिकजलधरान्तरितां विद्युन्मालामिव, मानसकल्लोलकलितां कमलिनीमिव, विकसितपुष्पचितां वल्लरीमिव, निर्झरधाराधौतां हिमगिरितटीमिव, प्रलयपयोधिप्रवाहाच्छादितां पृथिवीमिव, स्वच्छस्फटिकमणिभवनमध्यनिषण्णामिव, दुग्धमग्नामिव, दर्पणप्रतिबिम्बितामिव, चन्द्रिकामिव पूर्णसुधाकरमुखीम्, कुन्तलकलापविहीनशिरोमण्डलतया चम्पामिवानिषण्णमधुकरवृन्दाम्, राकामिव चन्द्रमुखनष्टान्धकाराम्, दुर्भिक्षप्रावृट्वेलामिव जलधरपटलप्रवञ्चिताम्, कमलिनीमिव गजकरावलूनपल्लवचयाम्, वनस्थलीमिव शिशिरप्रकोपनष्टपर्णपुञ्जाम् सस्यश्यामलताविहीनां मरुभूमिमिव, तर्कजालरहितां बुधवाणीमिव, निदाघप्रचण्डकिरणशुष्कसलिलां तरङ्गिणीमिव, भक्तिरसोत्थितदृग्जलमालापरिप्लुततया सुधांशुकलामिव पीयूषवर्षिणीम्, नदीमिव बुदबुदभूषिताम्, जलनिधिलहरीमिव रत्नप्रवाहिणीम्, हिमकणकलितां प्रभातवेलामिव, नक्षत्रमण्डलमण्डितां विभावरीमिव, मकरन्दविन्दुस्यन्दिनीं वल्लरीमिव, वह्निदेवीमिव विस्फुलिङ्गजालमुद्गिरन्तीम्, भवभूतिकवितामिव करुणरसस्राविणीम्, विकीर्णकुसुमकलापाकुलितवनस्थलीमिव, सन्मतियशोगानपरिस्पन्दिताधरपल्लववशात् वदनपुण्डरीकस्रुतमकरन्दकणैरिव, हृदयशुद्धतासूचकजाज्ज्वल्यमानार्चिर्गणैरिव, मुखसुधांशुवर्णितसुधासीकरैरिव, देहधारिभिः गीतगुणैरिव, संगीतस्वरैरिव, सत्याङ्कुरैरिव, पुण्यकुसुमकुड्मलैरिव दन्तकिरणैर्धवलितपुरोभागाम्, निगडितचरणयुगलतया लतापाशबद्धपदपुटां मरालीमिव, राहुग्रस्तां ज्योत्स्नामिव, कण्टकाकीर्णां लतिकामिव पापपीडितां धर्ममूर्त्तिमिव, सेतुनियन्त्रितां जाह्नवीमिव, मानसिकक्लेशानभिव्यज्यमानां दीनकविकवितामिव, अभिशापम्लानां विद्यामिव, जलधराच्छन्नामुषावेलामिव, तिमिरव्याकुलां कमलिनीमिव, गजशुण्डाप्रावृतां शल्लकीशाखामिव, स्तनजघनयोः जीर्णवसने दधानाम्, करधृतकोद्रवान्नां चन्दनां नवधाभक्तिसमेतां व्यलोकयत्। दृष्ट्वा चासौ भक्तिविनम्रायास्तस्याः करकमलात् मुनियोग्यमन्नं गृहीत्वा ऋजुकूलतीरदेशं जगाम। विलोक्येदं दृश्यं सर्वैरपि प्रशंसिता सा सौभाग्यवती दासी। बन्धनमुक्ता च जाता तत्क्षणे वीरप्रभोरहारदानप्रभावात्सा।

तत्रैकस्य सालवृक्षस्याधस्तात् निश्चेष्टशरीरोऽसौ समुपविवेश। नासाग्र-दृष्टिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुद्ध-परिणामः, क्षपक-श्रेण्यामारूढश्चायं शुक्लध्याने एव समग्रां ध्यान-शक्ति समायोजयत् । घाति-कर्माणि नष्टानि । बैशाख-शुक्लदशम्यां निर्मल-ज्ञानमुपलब्धवानयं महामनीषी । विकृतिर्दूरापेता । प्रकृतिश्चानुकूला जाता । युग-युग-पर्यन्तं भूमिरसौ वन्दनीया बभूव । ऋजुकूला नाम नदी एवास्ति तस्याः घटनायाः साक्षीभूता । कैवल्यज्ञानं लब्ध्वा ह्येष निखिल-भुवन-बोधस्य कोषोऽप्यभूत् । विलोक्येदं विबुध-लोकेऽपि समघुष्यत जयोद्घोषस्तस्य । वीरस्यास्य दर्शन-ज्ञानमभजच्चरम-सीमानम् । सर्वज्ञः सर्वदर्शीति जातः सः । अत एवासौ निजयुगस्य प्रखर-विद्वन्मुकुट-मणिरभूत् । जानाति पश्यत्येष त्रिभुवनं कालत्रितयं चाधुना । भूतलादिकं त्वस्य करतल-गताऽऽमलकफलमिवाऽऽभाति । अनेनानुपम-लाभेन नासौ गर्वितोऽभवत् । कैवल्य-प्राप्ति-दिवसः समग्र-जगतो मङ्गलदिनं मन्यतेऽद्यापि । सर्वैरपि सोल्लासैर्मतोऽयं कैवल्यदिवसः । तत्रैव ज्योतिर्विद्भिर्विबुधैर्धरातले विरचितः समवशरणः, यमवलोक्य मन्ये स्वर्गोऽवतारितः । तस्मिन् भूपालाः, अकिञ्चनाः, ब्राह्मणाः, चाण्डालाश्च सर्वेऽपि प्रवेशमर्हन्ति । पापिनो, निर्धनाः, निर्गुणाश्च तत्रागच्छन्ति प्रत्यहम् । नरगणा इव च तत्रान्ये पशु-पक्षि-प्रभृतयोऽपि जन्तवो निवसन्ति निश्चिन्तचेतसः ।

एवं कैवल्यज्ञानं प्राप्य क्षमायां भूमितुल्यः, प्रसन्नतायां चाऽऽसीत् स नीरसमानः । कुकर्म-कानन-प्रदाहे सुकर्मजाल-जाज्वल्यमान-वह्नितुल्यं प्रतिभातिस्म । देहस्य शीतोष्णताक्षुत्पिपासा-प्रभृतीन् दोषान् दूरीकृत्य यथाख्यातस्य चारित्रस्य पालनं कुर्वन् स्वनिर्दिष्टे कठोरमार्गे प्रवृत्तो बभूव । सुधीभिः पालनीया गुणावलिस्तं धर्मधुरन्धरं विधाय सर्वार्थसिद्धिसम्पदं ससर्ज । न भयं तस्करस्य, न खलस्य, न चौरस्य, न सर्पस्य, न व्याघ्रप्रभृतीनां जन्तूनामासीत्तत्र । न च नद्याः समुद्राच्च क्वापि शङ्का । दिवसरात्रि-प्रभृतीनि सर्वाणि द्वन्द्वानि न प्रधानरूपेण प्रतिभान्ति । न कुत्रापि वैषम्यविभावनाऽसीत् ।

इति मङ्गलायतने वर्धमानतीर्थंकरस्य कैवल्योपलब्धिनामकं
तृतीयं सोपानम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुर्थं सोपानम्

लोहितोष्णीष-वेष्टित-मूर्धभागैर्बाल-रवि-किरण-कलाप-विच्छुरित--नगपतिशिखरदेशैरिव; रक्तचन्दन-र्चाचत-भुज-हृदय-ललाटैर्मलयाचलभूमि-खण्डैरिव, वेद-मन्त्र-पठन-चपल-कर-कमलैः पवन-विलोडित-जलज-शोभित-सरोवरैरिव, अंसावलम्बित-धवल-यज्ञोपवीतसूत्रैर्भगीरथ-धारा-धौत-भरत-भूमि-भागैरिव, आवद्धचूड़ा-चुम्बित-शिरोमध्य-देशैर्मधुप-कुल-वलित-क्षौद्रिक-मण्डित-पादपैरिव, धवलवेष-परिग्रहैर्हिम-गिरिश्रृङ्गैरिव, सरस्वती-हास्य-विलासैरिव, विद्या-कल्पलताप्रसूनैरिव, सत्य-प्ररोहैरिव, निर्मलात्म-प्रकाश-लवैरिव दशन-मयूखैर्धवलितपुरोभागैः, सङ्ख्यातीत-शिष्य-गण-परिवेष्टितैः, अलोक-सामान्य-प्रतिभा-मण्डितैः, अपार-वाङ्मय-जलधि-तरङ्ग-माला-विगाहमानैः, परमार्थ-ज्ञान-मानस-मरालायमानैः, मख-मण्डप-गगन-नक्षत्रायमाणैः, लोकोत्तर-वैदुष्य-वैलक्षण्य-चमत्कृतवसुन्धरैःर्भास्वर-भूसुरैः संवर्धित-सौभाग्यः; हवन-सम्भूत-धूम-निकर-मृगमद-रेखाङ्कित-दिग्वधू-कपोल-भागः, अनवरताज्याहुति-देदीप्यमान-हुताशनार्चि-र्मालः, अनल-कर्मार्द्ध-दग्ध-सिमसिमायमान-कुश-समित्कुसुम-वासना-सुवासित-दिक्चक्रवालः, बालारुणातप-रक्त-वितान-मण्डित-मण्डपः, विविध-तीर्थ-जल-धारा-धौत-पावन-भूमिकः, रक्त-चन्दनोपलिप्त-सर्वतोभद्र-प्रभृति-मण्डल-निहित-तण्डुल-करवीर-कुसुमः, प्रारब्धामृत-चरु-चारु-गन्धः, अर्ध-पक्व-पुरोडाश-पुण्य-परिमलामोदितः, रसाल-पल्लवाच्छन्न-मुख-कलशाधिष्ठित-कोण-देशः, अविच्छिन्नाज्य-धारा-हुतिहुतभुग्हुङ्कार-मुखरितः, उपचर्यमाणातिथिवर्गः, पूज्यमान-पितृ-दैवतः, मन्त्रध्वनिध्वन्यमान-धरातलः सोमिलाचार्यानुष्ठितयज्ञो विश्व-विश्रुतिमापद्यत।

तस्मिश्चाध्वरे समवेतेषु विद्वत्सु स इन्द्रभूतिरेव सर्वाधिको विद्वानासीत्। वैदुष्य-गर्व-पारवश्यात् न कमपि जनं पण्डितं मन्यतेऽसौ। तस्य हि कृते विलक्षण-तर्कप्रभावेणैव यागेषु महत्त्वपूर्णं स्थानं सुरक्षितं भवतिस्म सर्वत्र। सरस्वत्या निर्मलधारेव, बृहस्पतेः प्रज्ञाप्रसूतिरिव तस्य वाणी महाप्रसारं लेभे। बहवो विप्रास्तादृशीं योग्यतां लब्धुं लुब्धाः सन्तस्तस्य शिष्यतां प्रपेदिरे। अनेनापि कारणेन सोऽतीव गर्वान्धोऽभवत्। गोपुरात्तत्रागतं तं पञ्चशत-सङ्ख्याकाः शिष्याः प्रत्यहं पूजयन्ति। तत्रैवासीत्तस्याग्निभूतिनामा भ्रातापि। वायुभूति-व्यक्त-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुधर्म-मण्डिकम्पिकाचल-मेतार्य-प्रभास-प्रभृतयो दिगन्तविश्रान्तकीर्त्तयो विद्वांसस्तत्रैवातिष्ठन् ।

'सर्वेऽप्यमी गणधरयोग्याः' परिज्ञायेदं सम्यगवबद्धशिखः, चन्दनालङ्कृत-ललाट-देशः, अंसावलम्बित-यज्ञोपवीत-सूत्रः, धवल-चीनांशुकावेष्टित-सकल-शरीरः, विप्रवटुवेषः सुरेशस्तत्राजगाम । पुरतः प्रविश्याब्रवीच्च—गुरुदेव ! जिज्ञासुरस्मि कञ्चिच्छ्लोकार्थम् । कृपया मामपि छात्र-बुद्धया बोधयन्तु भवन्तः । मदीया गुरुचरणाः सम्प्रति समाधिष्ठाः सञ्जाताः । नास्ति च कोऽप्यन्यो वदान्यो भवन्तं विहाय वक्ष्यमाणाभिमतपद्यार्थं ज्ञापयितुम् । श्रुता च मया विश्व-विश्रुता भवतां कलाधर-कलावदात-कीर्तिः । श्लोकोऽयमस्ति न चासाधारणः । आशास्महे यदनुग्रहं विधाय भवन्तः श्लोकार्थं निश्चयेन कथयिष्यन्तीत्यभिधायासौ विरराम ।

इन्द्रभूतिस्तस्य स्वागतं व्याहृत्य श्लोकार्थनिर्वचने प्रतिबन्धं निर्जगाद—नाहं कदापि शिष्यं नैराश्यं प्रापयामि । किन्तु नास्त्यवकाशलेशोऽपि सम्प्रति । यदि त्वं समग्र-जीवनपर्यन्तं मच्छिष्यतां स्वीकरोषि तदैवाहं श्लोकार्थं कथयिष्यामि नान्यथेति । सुरन्द्रोऽपि तच्छ्रुत्वा निजोत्तरं प्रददौ—विद्वन् ! मदीयोऽप्यस्त्येकस्तावद् आग्रहः । यदि पद्य-प्रसूनस्यास्य तात्पर्यं भवद्भिः सम्यग् न व्याख्यातम्, भ्रान्तं वा व्याख्यातम्, तदा श्रीमद्भिरपि सपरिकरैरस्मदीयगुरोश्चरणकमलयोः शिष्यता स्वीकर्त्तव्या भविष्यतीति ।

गौतमोऽपि गुरुता-गौरव-लोभ-परवशतया प्रतिबन्धं समुपेक्ष्यावोचत्—जिज्ञासो ! स्वीकरोमि ते प्रतिबन्धम् । श्रावय तावच्छ्लोकम् । इदानीमेव जिज्ञासाया निराकरणं विधीयते ।

इन्द्रभूतेर्वचने विश्वासं विधाय विबुधेश्वरो मन्दिरस्वरेण पद्यमिदं पपाठ—

'त्रैकाल्यं द्रव्यषट्कं नवपदसहितं जीव-षट्-काय-लेश्याः
पञ्चान्ये चास्तिकाया व्रत-समिति-गति-ज्ञान-चारित्र-भेदाः ।
इत्येतन्मोक्षमूलं त्रिभुवनमहितैः प्रोक्तमर्हद्भिरीशैः
प्रत्येति श्रद्दधाति, स्पृशति च मतिमान् यः स वै शुद्धदृष्टिः' ॥

गौतमस्तच्छ्लोकं समाकर्ण्य महाश्चर्यचकितो जातः । छात्रेण क्रियमाणमनादरं दुस्सहं चामन्यत । यस्तु शिष्यतां गमनीय आसीत् तस्मादेवास्मदीयोऽयमभूतपूर्वः पराजयः । नाहं तस्मै श्लोकार्थं समुद्घाटयामि चेत्तदा भविष्यति मे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महान् उपहासः। विचार्येदं सोऽब्रवीत्—आर्य ! प्रापय मां, सत्वरं स्वकीय-गुरु-चरण-सकाशम्। ततस्तेन सुरपतिना सार्द्धं सशिष्योऽसाविन्द्रभूतिः समवशरणं प्रविवेश। प्रविश्यासौ ललित-लतालिङ्गनाकुलिते, विलीन-खग-कुल-कलालाप-कोलाहले, अनिल-वेल्लित-विटपि-निपतत्कुसुम-निकरे, समुल्लसत्सुमनोरजो-राजि-राजित-भूतले, फल-भरावनम्र-विटपिगण-गुम्फिते, अनुपजात-केशर-केशरि-शिशु-सङ्ग-कुरङ्ग-शावक-निपीयमान-सिंहीस्तनमण्डले, द्विरद-कलभाकृष्यमाण-मृणाल-कलाप-कल्प-केशरामीलित-लोचन-मृगपति-पालिते, तपाकुल-भुजग-प्रविश्यमान-शिखण्डि-शिखण्ड-मण्डले वसन्तागम इव कुसुम-निकर-करम्बिते, जलधरसमय इव जल-प्रपात-शब्दायमाने, मातङ्ग-कुलाध्यासितेऽपि पवित्रे, विपुलाचले मध्य-भाग-भूषणभूतस्य, गगन-वितान-कलितस्य, पवन-व्यजन-वीजितस्य, रवि-शशि-किरण-कलाप-विच्छुरितस्य प्रोन्नत-सिंहासनस्योपरि पद्मासने विराजमानम्, मध्यलोकमिव रत्नाकरैः गिरिराजमिव शिखरसमूहैः, द्विजराजमिव द्विज-मण्डलैः, निष्कलङ्कं सुधाकरमिव नक्षत्रमण्डलैः, समुत्पाटित-कच-कलाप-शून्य-शिरोभागैः, दिगम्बरैर्मुनिवरैः परिवृतम्, सत्याङ्कुरैरिव, निर्मलेन्द्रिय-वृत्तिसन्तानैरिव, तपस्यागुणैरिव, करुणा-रसप्रवाहैरिव देह-कान्ति-मयूखैर्धवलित-पुरोभागम्, अतिकृशतया निम्नतर-गण्डगर्तम्, दृश्यमानास्थि-पञ्जरम् गाम्भीर्य्ये रत्नाकरमिव, स्थैर्ये महीधरमिव, तेजसि सवितारमिव, शान्तौ तुषार-किरणमिव, दिवसमिव बालरविबिम्बभास्वर-मुखमण्डलम्, मणिधरमिव सतत-पवन-भक्ष्यम्, सुभिक्षमिव नातिवर्षम्, कर-कमलतलामलक-फलवदखिलं जगदालोकयन्तम्, मोहान्धकार-दिवाकरम्, नासास-निहित-दृष्टिम्, दिगम्बरवेशम्, निर्मत्सरम्, निरहङ्कारम्, निर्ग्रन्थं वीतरागं भगवन्तं महावीरं व्यलोकयत्।

तत्रैवंविधस्य भगवतस्तस्य पाद-पद्म-वन्दनायामेवासौ स्वकीय-कल्याण-ममन्यत। कृतस्य मिथ्याभिमानस्य पश्चात्तापं चापि चकार—व्यर्थमेवैतावत् काल-पर्यन्तं मिथ्याभिमानं समाचरता मया गहनान्धकारे निपतितोऽयमात्मा। मद-पिशाचात्त्वस्माभिरधुनैव मुक्तिः सम्प्राप्तेति मन्यामहे। सञ्जातं शाश्वतिकं वास्तविकं च कल्याणमस्माकम्। समवशरणेऽस्मिन् शरणमुपलब्धम्, ज्ञातश्चास्मा-भिर्महामुनेरस्य महाप्रभावः। सर्वत्रापि माण्डपस्यानुपम-शोभा-विलासो हर्षमग्नं करोति मे मनः। एवं विचार्यासौ बद्धाञ्जलिर्भक्ति-विनम्र-मूर्तिश्च सम्भूयाब्रवीत्—भगवन् ! भवतः पुण्यमयेन दर्शनेनैवाहं कृतार्थोऽस्मि संवृत्तस्तथापि संसारस्य, परमार्थस्य च गूढतमरहस्यं परिस्फुटतया ज्ञातुमिच्छामि। जीवादिविषयिणी मे दृढा शङ्कापि वरीवर्ति। तदत्र भवन्तो भगवन्त एव प्रमाणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यमिधायासौ मौनं व्यालम्बत। विनीतचरणस्य शिष्यस्य पात्रत्ववशेन भगवानुवाच—

कदाचिदिमे मनुष्याः सहोदरभ्रातर इव निवसन्तिस्म। न कदापि स्वार्थसिद्धयर्थं परस्परं कलहायतेस्म कश्चित्। न भूमेर्विभाजनं भवति, न सम्पत्तेः समानवितरणम्, न च सदनस्य विभागो दृश्यते। न कोऽपि सम्पत्त्यर्थं भ्रातरं हन्ति, न पितरं विरुणद्धि न मातुराज्ञामुल्लङ्घयति, न धर्मं जहाति, न मर्यादामतिक्रामति। सर्वेऽपि स्वकीयं कर्त्तव्यमेव सन्ततं परिपूरयन्ति। ते धर्मार्थं, भ्रात्रर्थं, मित्रार्थं पित्रोराज्ञां पालयितुं च धनं, भूमिं, भवनं, जीवनं चापि विहातुं कदाचिदपि व्यथिता न भवन्ति। समस्तजनाः परिपूतमानवतायाः मृदुबन्धने एवाबद्धाः आसन्। न कोऽपि सामाजिकमर्यादामुल्लङ्घ्य स्वच्छन्दचारी सम्भवति। आचार-विचार-शिष्टाचार-शिक्षायाः नियमान् यथायथं परिपालयन्ति ते। सर्वे मनुष्याः मानवमात्रस्य कृते सर्वदैव सत्कर्मनिरताः दरीदृश्यन्ते। पतितस्योद्धाराय, मार्गभ्रष्टं मार्गे समानेतुं गहनान्धकारव्याकुलस्य प्रकाशं, वसनहीनेभ्यो वस्त्रम्, बुभुक्षितेभ्यो भोजनम्, तृषितेभ्यो जलम्, गृहहीनेभ्यो भवनम्, भूमिहीनेभ्यो भूमिम्, अशरणेभ्यश्च शरणं प्रदातुमेव तेषां सकलमपि जीवनं व्यस्तमासीत्। नासीत् पृथिव्यां कस्यचिदेकस्याधिकारः नासीद् भूमौ केषाञ्चिदेवाधिपत्यम्। न सीमाऽऽसीत्, न ग्रामः, न जनपदः, न मण्डलम्, न प्रदेशः, न राज्यम्, न प्रशासनम्, न राजा, न प्रजा, न कोषः, न सेना, न संघः, नापहरणम्, न प्रवञ्चना, न लुण्ठनम्, न पीडनम्, न च हत्यानुश्रूयते कस्यचित् क्वचित्। स हि भोगभूमिकालः समासीत्।

प्रकृतिप्रकोपेन पीडितेऽस्मिन् संसारे कदाचिदनावृष्टिभिः सस्यानि शुष्यन्ते, कदाचिच्चातिवृष्टिभिः सर्वाणि धान्यक्षेत्राणि प्लावितानि भवन्ति। सलिलपरिप्लुतानां नदीनां जलप्रवाहैर्गृहाणि, ग्रामाः, नगराणि, पशु-मनुष्यादयश्च समुद्रं नीयन्ते। कदाचिद् जलाभावेन जीवाः पिपासाकुलाः सन्तो जीवनं त्यजन्ति। कदाचिद् दुर्भिक्षैः पीड्यमानाः जनाः भोजनं विनैव बुभुक्षया क्षीयमाणा भवन्तः प्राणान् मुञ्चन्ति। कदाचिद् वान्तिप्रभृतिभिरसाध्यैः संक्रामकरोगैराक्रान्ताः ग्रामाः, नगराणि, देशाश्च मृत्युलोकं प्रविशन्ति। कदाचिद् भयङ्करशीतप्रभावेण, कदाचित् प्रचण्डनिदाघसन्तापेन च पीड्यन्ते मनुष्याः। शनैः शनैः जनसंख्यापि वृद्धिमापेदे। वस्तूनां भूयान् अभावो जातः। विलोक्येमामवस्थां मनुष्योऽसौ व्यग्रोऽभवत्। सङ्कटवेलायामात्मानं रक्षितुं प्रयत्नमचिन्तयत्। अन्नस्य, द्रव्यस्य, वस्त्रस्य, वस्त्वन्तराणां चोपभोगयोग्यानां संग्रहं कर्तुं प्रारेभे। धनसंग्रहे बाधासु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कामुचित् समुपस्थितासु छल-कपट-राजनीति-प्रवञ्चनाप्रभृतीनि दुष्कर्माणि प्रारब्धानि। सबलो दुर्बलं हन्तुमियेष। शक्तिशालिभिर्दुर्बला हठाद् दास्यकर्मणि सन्नियोजिताः। सर्वत्रं लुण्ठनवृत्तिः, तस्करवृत्तिः, शोषणवृत्तिश्च प्रचलिता। बलिनो बलाद् निर्बलैरुपार्जितं धनमधिकुर्वन्ति। परस्पर-विनाशार्थं सर्वैरपि शस्त्रास्त्राणि निर्मितानि प्रयुक्तानि च। यस्य यादृशी शक्तिस्तेन तादृशोऽधिकारः समुपलब्धः, तत एव शोषण-पीडनम्, जातिवादः, वर्गवादः, भाग्यवादश्चेति विड़म्बनाप्रपञ्चः प्रारब्धोऽभवत्।

दावाग्निदह्यमानगिरिकानने, कालकरालजिह्वाग्रभागतप्तपवनलेलिह्य-मानसकललताद्रुमे, प्रचण्डे-मार्त्तण्डकिरणातप-तप्तरजोव्याप्तभूमण्डले, पिपासा-शुष्यत्तालुभागविकलजीवसमुदाये, क्षीण-नद-नदी-सरोवरजीवने, बहिःस्थातुमध्य-शक्ये, दीन-प्राणापहारिणि, दारुणे, निद्रायामपि विघ्नभूते, दहति ग्रीष्मकाले विजृम्भमाणे सत्युदरार्धं-परिमितंभोजनम् उपभुज्य नग्नदेहाः, पादत्राणविहीनाः, छायाश्रयणं विनैव रक्तं शोषयन्तो, गलत्स्वेदकणक्लिन्नावयवाः, दीनाः दुःसहातपे, मध्याह्नकाले प्रत्यहं कठिनानि कार्याणि प्रकुर्वन्ति। पाषाणान् विदलयन्ति, मृत्तिकां खनन्ति, हलमुत्कर्षन्ति, भारं वहन्ति च। हा धिक्! एवंविधा-मवस्थां प्राप्यापि ते कदाप्युदरपरिमितं भोजनं न लभन्ते। येन केन प्रकारेणै-कस्मिन् दिने तैः कथञ्चित् खाद्यान्नलेशो लभ्यते चेत् तदा नास्ति दिवसेऽन्यस्मिन् आहारसामग्र्याः प्राप्त्याशा कुतोऽपि। शरीराच्छादनार्थं कन्थापि न दृश्यते तेषामवयवेषु। कोऽस्य परिश्रमस्यास्ति परिणामः। रक्तं कृषकस्य शुष्कम्, तृष्णा त्वन्येषां शान्ता भवति। येऽन्नं समुत्पादयन्ति, त एव बुभुक्षया पीड्यन्ते। गोपालकानां शिशवो दुग्धं विना क्षीणा भवन्ति क्षीरं त्वन्ये पिबन्ति। एवंप्रकारेण यो भवनं निर्माति स पर्णकुटीरेषु निवसति। यश्च वस्त्रं वयति स शिशिरकाले वसनं विना मरण-शरणं गच्छति। श्रावण-भाद्रपदमासयोरासारवृष्टावपि जीर्णेषु, तिमिराच्छन्नेषु, कुटिल-सर्प-कृमि-कीट-व्याप्तेषु च कुटीरेषु विलपति मानवतेयम्। तथाप्येतादृशा असहाया एव विविधकरदण्डैर्निष्पीड्यन्ते, धनिनस्तूत्कोचादिभिरुपायसहस्रैः शासकानाम् आनुकूल्यं सम्प्राप्य यथेच्छं सुखं भुञ्जते। वस्तुतः प्राणस्यापि दण्डक्लेशः समनुभूयते दीनैस्तैः। विच्छिन्नतन्त्रीजाला तेषां जीवन-वीणा प्रत्यहं करुणं स्वनति न विश्राम्यति कदाचिदपि। न च यथाक्रमं स्वरसन्धानं कुरुते। कथय, किमिदं, दीनानां जीवनं, मरणं वा? कन्द-मूल-तृण-पर्णाशनास्ते साम्राज्य-दानवस्य चरणयोर्नयनजलैरभिषेकं कुर्वन्तो जीवनं यापयन्ति। कः शृणोति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेषां क्रन्दनम् । कस्तावत् करुणाजलैरपि परिहरति तेषां सन्तापम् । साहाय्यं तु दूरापेतम् । वाचापि तेषामाश्वासनं दुर्लभं मन्दभाग्यानाम् । केचिद् विविधविकार-दूषितासु भवन-प्रणालीषु प्रवहमानं मण्डं पिबन्ति । मृत्युं प्राप्यापि पुनर्नवजीवनं लभन्ते । द्रवति कस्यचिदपि हृदयम् ? कस्तत्र स्वकीयभोजनांशेन तोषयति तान् ? विनैव खाद्यं, विनैव चौषधिम्, विनैव जलं च दुःखाग्नौ क्वथमानाः प्राणा स्त्यजन्ति ते । किञ्चिदुन्नमय्य शिरोधरां पश्य जगतो गतिम् । विलोकय मानवकष्टान् । विचारय च सांसारिकीं विडम्बनाम् ।

केचित् समाराधनीयानां मातॄणाम्, केचित् पूज्यानां भगिनीनाम्, केचित् पालनीयानां संरक्षणीयानां च पुत्रीणामाभूषणानि विक्रयव्यापारेण, प्रतिभूव्यवहारेण वा परहस्तगतानि विधाय बुभुक्षया पीड्यमानाः, श्वसितुमपि निस्सहाश्च नयन-नीरपरिप्लुतान् कवलान् गृह्णन्ति । तेषां सर्वस्वमाददानानां निष्ठुराणां दुर्जनानां हृदयानि न प्रकम्पन्ते ।

केचित् स्ववंशाङ्कुरस्य, नरकत्रातुः, समाराधनतत्परस्य, सर्वदैव लालनीयस्य, पालनीयस्य, शिक्षणीयस्य च पुत्रस्य, केचिद् धर्मपरायणायाः पतिव्रतायाः असूर्यम्पश्यायाः विलपन्त्याश्च वल्लभायाः विक्रयं कुर्वन्तः कथं कथमपि जीविताः सन्ति । ते गृहे पालितां तां शुनिकामिव मृत्यवे प्रददति । न धर्माद् बिभ्यति न सामाजिकमर्यादायाः, न च लोकापवादेभ्यश्च । कथय, किं ते निर्ममाः सन्ति धर्मविरोधिनो, दुर्व्यवस्थाऽथवास्ति । नास्त्यत्र तेषां दोषलेशोऽपि । बुभुक्षितः किं न करोति पापम् । बहवो निर्धनाः रक्तदानं कृत्वा स्वकीयमुदरं पालयन्ति । मांसं समर्प्य जीवनं ग्लपयन्ति तथापि तेषां सुखस्वप्नाः न कदाचिदपि पूर्णा भवन्ति । न कदाप्याशालतिका कोरकिता जायते तेषाम् । किं कुर्वन्तु ते ? मानवस्य रुधिरपानेन किं मानवः सुखी भवितुं शक्नोति ? विडम्बनेयं केवला । केचित् नेत्रयोः तारकद्वयं विक्रीय धान्यलेशं लभन्ते । दृष्टिहीनाश्च सम्भूय पदे-पदे स्खलिता भवन्ति । कदा ते मृत्युकूपे निपतिष्यन्तीति न कोऽपि जानाति । को जानाति तेषां हृदयविदारिणीं वेदनाम् ? जीवनस्य सामग्रीकलनायां व्यस्तैस्तैर्न लेशमात्रमप्यवकाशो लभ्यते । निश्चयेन प्राणनायापि ते समयं नोपलभन्ते ।

कतिचित् पित्रोर्दुर्दशया, नारीणां अपमानैः, शिशूनां करुणक्रन्दनैर्विद्धमर्माणो विक्षिप्ताश्च सन्तो रथ्यासु, गृहे-गृहे, द्वारे-द्वारे, चतुष्पथेषु, चत्वरेषु च हास्यास्पदतां प्राप्ताः विश्वविपिने पर्यटन्ति । नास्ति तेषां गौरवहीनानां कुत्र-चिदपि सम्मानम् । सर्वत्रैव ते ताडनम् अपशब्दान् वा शृण्वन्ति गृहमेधिनाम् । दर्शकास्तेषां क्रियाकलापैरसम्बद्धप्रलापैश्च प्रमुदिता सन्तः समुपहसन्ति । न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कोऽपि चिकित्सोपरि तेषां ध्यानं ददाति। कस्यास्ति दोषः? न चिन्तयति कश्चनापि। कतिचिदङ्गेषु तैलं विसृज्याग्निना दहन्ति स्वकीयं शरीरम्। निश्चयेन ते शोषणपीडापेक्षया ज्वलनपीडां लघुतरां गणयन्ति। दारिद्र्यदलित-जीवनस्यापेक्षया मरणमेव शरणं मन्यन्ते। कतिचित् कण्ठनालं रज्जुपाशेन वद्ध्वात्मानं घ्नन्ति। केचिद् अधिकारवञ्चिताः, सामाजिकानादरभावेन परि-पीडिताश्च भूत्वा हालाहल-पानेन नाशयन्ति स्वकीयान् अमूल्यप्राणान्। कति-चिदात्मानं जलेषु निमज्ज्य चिरकालाय सुस्वपन्ति। केचिद् यानचक्राणाम-धस्तात् चूर्णयन्ति देहपञ्जरम्। केचित् पर्वतेभ्यः, केचिद् वृक्षेभ्यश्च पात-यित्वात्मानं स्वजीवनं परित्यजन्ति। वसुन्धरायाश्चरणयोः प्राणप्रसूनैः पूजा-मिवैते कुर्वन्ति। बह्व्यो महिलाः शिशून् क्रोडे निधाय कूपेषु, नदीषु, सरोवरेषु च सम्पतन्ति। नश्यति मानवकल्पतरुकरम्वितं नन्दनवनमिदम्। जातं च कुटिलकण्टकाकीर्णं जन-जनजीवनम्। दग्धहृदये दारुणज्वाला निर्दहति, नेत्रयोश्च वारिधारा प्रवहत्यजस्रम्। इदमेव भारतीययुवकानां जीवनदर्शनम्। शोषण-पीडनस्य विभीषिकापीयमेव। इयमेवास्ति व्यवस्था जनसमाजस्य। दीनानां सायं प्रातश्च कथं गच्छतः? कथं ते विनैव भोजनं कठिनानि कार्याणि कुर्वन्ति? कथं च यापयन्ति विनैव निद्रां निशाम्? महदिदम् आश्चर्यम्। दीनाः दिवारात्रं रुदन्तः कालं क्षिपन्ति। धनिनस्तु वारुणीं निपीय मदमत्ताः वीणारागस्य तरङ्गेषु विगाहन्ते। कठिनपाषाणतोऽपि निर्झरस्रोतांसि स्रवन्ति, लोहशकलमपि हुताशनसम्पर्काद् द्रवीभूतं भवति, किन्तु न मानवहृदयं विरुणाद्धि करुणा। धिगिदं नैष्ठुर्यम्।

केचित् गगनचुम्बिषु, रमणीसंङ्गीतमुखरेषु, विविधभोगविलाससामग्रीपरि-पूर्णेषु च प्रासादेषु निवसन्ति। केचित् निदाघप्रचण्डकरतप्यमानासु, वर्षाजल-कणच्यवन्तीषु, शीतलहरीकम्पनशीलासु समये-समये वह्निना दह्यमानासु, पुनःपुनः पवनेन निक्षिप्यमानपर्णपुटासु, सङ्कीर्णासु च जीर्णपर्णशालासु जीवनं यापयन्ति। केचित् शशाङ्कधवलासु, कुसुमसुकुमारासु, मनोहरासु च शय्यासु स्वपन्ति दिवानिशम्। नास्ति तेषां कृतेऽत्र किमपि करणीयम्। प्रतिक्षणं विश्रामं कुर्वते ते। केचित्तु प्राणहरेषु, विकरालकालदन्तगणेष्विव करपत्राग्रभागेष्विव, पापाङ्कुरेष्विव, दुःखमयेषु कण्टकेषु विनैव निद्रामविरलाश्रुप्रवाहावलिप्तदेहाः यामिनीः यापयन्ति। केषाञ्चिद् विलासभवनेषु क्लान्तलक्ष्मीतनुलतास्रवत्स्वेदविन्दुपरम्परेव, सरस्वती-धवलदन्तकिरणराजिरिव, भवनश्रीकुन्तलजालग्रथितकुसुमावलिरिव, सौभाग्यबाला-करकमलवर्षितलाजवृष्टिरिव रत्नराशिर्विद्योतते। केषाञ्चिद् हताशानां,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्दभाग्यानां, सर्वथा सहायशून्यानां च कुटीरेषु न दीपकोऽपि प्रकाशते। सर्वदैव ते सघनतिमिराच्छन्नासु कुटीषु कृमि-कीट-विषधराणां कोपभाजनानि भवन्ति। यत् किञ्चिदप्युपार्जितं श्रमवृत्या तत्सर्वमपि तस्करेभ्यः समर्पयन्ति। हा! हतो मन्दभाग्यः। केषाञ्चिद् भोगभवनेषु परिपालिताः नरदंशकाश्च निष्क्रियाः, अनवरतभुङ्कारनिरताः श्वानोऽपि प्रत्यहं दुग्धं पिबन्ति एलालवङ्गघनसार-सुगन्धीनि भोजनानि भुञ्जते, समयानुसारशीततापरहितकक्षेषु शयनसुख-मनुभवन्ति, रमणी-मृदुलकरकमललालनस्नेहरसं च लभन्ते। केषाञ्चिद् दारिद्र्य-व्याधिव्यथितानां, हृतविधिविलसितानां, रिक्तकुटीषु बुभुक्षया पीड्यमानाः, पिपासया शुष्यमाणतालवः, श्वसितुमपि निस्सहाः क्रन्दन्तः शिशवः प्राणान् परित्यजन्ति। किं तेषां नृशंसमृत्युः सन्तानैकाहितभाग्ययोः पित्रोः हृदयं न विदारयति? तयोः हृदये पुत्रसुखप्राप्तेर्बलवती लालसा किम् नास्ति? कस्समु-दारचेतास्तयोः कष्टमनुभवेत्? केषाञ्चिद् विविधवाद्यरववाचालितेषु गेहेषु वायुवेगदोलितपुष्पस्तवकविभूषितवल्लरीणामिव, जलधरपटलमध्यपरिस्फुरन्तीनां विद्युल्लतानामिव, सौन्दर्यसदनप्रज्वलद्दीपशिखानामिव, कमनीयनर्त्तकीनामुन्मद-कलहंसमिथुनकलरवकल्पः सुरतमृदितरतिमधुरस्वरसदृशः नूपुरध्वनिर्ध्वनयति धनिकवैर्यम्। केषाञ्चिद् शून्येष्वपि गृहेषु क्षुधाक्षीयमाणानाम्, भोजनलेशार्थमपि प्रसारितकराणाम्, दृग्जलमालापरिप्लुतदृष्टीनाम्, वाष्पावरुद्धकण्ठानां शिशूनां हृदयविदारकं श्रूयते हताशं करुणक्रन्दनमेव केवलम्। केचित् परिश्रमं विनैव रथ्यासु, चतुष्पथेषु, रङ्गभवनेषु च परिभ्रमन्तः कालं क्षिपन्ति। किं कतिपये जना एव वसुन्धरायाः सकलवैभवस्याधिकारिणः? त एव सुख-दुःखमनुभवन्ति? त एव राष्ट्रस्य कर्णधारकाः? किं तैरेव चलत्ययं संसारः? इतरे मनुष्याः मनुष्याः न सन्ति किम्? किं नास्ति तेषां संवेदनशीलता? ते वसुधायां भार-भूताः वर्त्तन्ते किम्? नास्ति तेषां किमपि योगदानं राष्ट्रं प्रति? ते जीवन-स्याप्यधिकारिणो न सन्ति? कीदृशोऽयमस्ति विषमो व्यवहारः? प्रत्येकं जनः किं समानरूपेण सुखं दुःखं वानुभवति? न कोऽपि स्वत एव दुःखं वाञ्छति? न दारिद्र्यं बहु मनुते, न शिक्षाभावं समभिनन्दति। निखिलोऽप्ययं तस्यास्ति विवशतायाः दुष्परिणामः। सर्वेऽपि बुभुक्षया पीड्यन्ते, पिपासया च व्याकुली-क्रियन्ते। सकलेभ्योऽपि जलं, भोजनं चावश्यकं जीवनार्थम्। सर्वेभ्य एव निवासार्थं भवनम्, देहाच्छादनार्थं परिधानम्, अनिवार्यम्। शिक्षापि मानवजीवना-र्थमनिवार्या विद्यते। समयानुकूल्येन मनोरञ्जनसाधनान्यप्यपेक्षितानि वर्त्तन्ते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिश्रमानुरूपं वेतनम्, ग्रीष्म-शिशिरानुरूपा भोजनाच्छादनस्य सुव्यवस्थाऽपि सुतरामावश्यकी प्रतीयते ।

किन्तु समेषाँ जनानामाशाकमलिनी: हिमपीडिताः सम्पाद्य, सर्वेषां लोचनेषु धूलिप्रक्षेपं विधाय, कलावलच्छलेन च सर्वविधं शोषणं कृत्वा कतिपये मुष्टिमेयाः एव सकलानि सुखान्यनुभवन्ति । समाजस्याधिकतरा सम्पत्तिः कतिपयेषामेव धनिकानां हस्तेषु सञ्चिता वर्त्तते । ते च तस्याः मद्य-नृत्यविलाससामग्रीष्वेव दुरुपयोगं प्रकुर्वन्ति । बहुसंख्याकाः श्रमिकगणाः, कृषकवर्गास्तथा चान्ये समाजसेवकाः तया सम्पदा वञ्चिता एव दरीदृश्यन्ते । धनपतयस्तु विपुलैश्वर्यनिमग्नहृदयाः, दिवारात्रं मधुमयोषु क्रीडासु व्यासक्ताः, भवन्ति । नास्ति तेषां सविधे दीनार्तिश्रवणायावकाशलेशोऽपि ।

साम्राज्यविरोधे ते किञ्चित् प्रतिवदन्ति चेत् तदा प्राणदण्डभाजनतां प्राप्नुवन्ति । दलिताः पीडिताश्चेमे मानवाः जीवन्तु मृत्युं वृणन्तु वा ।

यत्र सर्वेषां जनानां कपटनीतिवलेन मूलाधिकाराः हन्यन्ते । शिक्षासु, प्रशासनकार्येषु, राष्ट्रस्य सम्पत्तौ च तैः सार्धं विषमतापूर्णो व्यवहारो विधीयते, मूर्खाः, बालाः, व्यभिचारिणः, भ्रष्टाचारपरायणाः, शोषकाः, तस्करव्यापारिणः, पक्षपातसन्निपातविभीषकाश्चैव शस्त्रास्त्रबलेन साम्राज्याधिकारिणो भवन्ति । लब्धाधिकाराश्च ते सम्पत्तेर्यथेच्छं दुरुपयोगं कुर्वन्ति । यत्र धनिकवर्गाः तन्त्रेण, बलेन, कपटपूर्णव्यवहारैश्च स्वकीयं कोषं वर्धयन्तितराम् । भाग्यवादस्य विडम्बनया निर्धनानां श्रमार्जितं विभवं लुठन्ति । श्रमिकानामेव धनैर्धनिनो भूत्वा स्वच्छन्दं विहरन्ति । निरङ्कुशाश्च भवन्तः कृत्याकृत्यम्, भक्ष्याभक्ष्यम्, ग्राह्याग्राह्यम्, हिताहितं च न विचारयन्ति । पुनस्तानेव धनोपार्जकान् दास्यकर्मणि चापि नियोजयन्ति । क्रीडनैरिव तेषां मूल्यहीनैरिव जीवनैः सार्धं क्रीडन्ति । यत्र स्वकर्त्तव्यव्यापृतायाः प्रजायाः, समाजहितकारकाः, सार्वजनिककल्याणरूपाः, राष्ट्रोन्नायकाः, सारगर्भिताः, समुचिताश्च प्रस्तावाः मुहुर्मुहुः तिरस्क्रियन्ते, निक्षिप्यन्ते, विपाट्यन्ते च । पुनश्च दलितवर्गदुःखदुःखितानां, सर्वजनीनहितचिन्तकानां, समाजोन्नतिकांक्षिणां महापुरुषाणां जीवनानि विनाश्यन्ते सम्पत्तयो लुठ्यन्ते, छिद्यन्ते च शिरांसि । अङ्गविहीनाः क्रियन्ते देशात् निर्वास्यन्ते च ते । यत्र जात्याधमैः, धनविहीनैः, रूपहीनैः, कुवर्णैः, प्रदेशान्तरीयैः, अन्यान्यसम्प्रदायावलंबिभिश्च जनैः सार्धं घृणापूर्णो व्यवहारो भवति । सकलेषु क्रियाकलापेषु व्यवहारेषु च हेयत्वेन दृश्यन्ते ते सर्वे । तत्रावरुद्धोद्वेगास्ते कदाचित् मर्यादाभित्तिं विभिद्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दानवसाम्राज्योपरि समाक्रमिष्यन्तीति निश्चप्रचम्। कथयत, कस्तदा भविष्यति प्रज्वलितेन विश्वयुद्धाग्निना निखिलजगद्दहनस्योत्तरदायी ? निरपराधिनीयं जनसंहतिः पीडकवर्गो वा ? विचारयत, कस्तदोच्छलितवेगेन, जनक्रान्तिप्रचण्ड-प्रवातेन समूलोत्पाटितशोषकतरुवरान् रक्षिष्यति ? कस्तदा जनान्दोलनप्रलय-जलधिजलप्रवाहप्रवेगम् अवरोद्धुं समर्थः ? कश्च पारस्परिकसंङ्घर्षभूकम्प-वेगोत्तामितां धरित्रीं स्थिरीकरिष्यति ? संयमसेतुं निपात्य सर्वत्राप्यराजकता प्रसरिष्यति। गृहे-गृहे जनपदे-जनपदे, देशे-देशे छल-कपट-हत्यापहरण-व्यभिचार-भ्रष्टाचार-निमग्नमानसानां जनानां प्राचुर्यमेव दृश्यते। न कोऽपि स्वकीय-कुकृत्य-विषये किञ्चिदपि विचारयति। न म्लानो भवति। न पश्चात्तापं करोति, न लज्जते, न च दुष्टप्रकृतिं परिमार्जयति कश्चन। ते निरङ्कुशाः भूत्वा स्वच्छन्दं व्यवहरन्ति। अज्ञानात्पशुबलिं धर्मं मत्वा निष्करुणा मूढा जना यज्ञेषु पशून् घ्नन्ति।

विचारयत, शस्त्रबलेन, राजनीतिबलेन, हिंसाबलेन, बलात्तरेण वा कियत्काल-पर्यन्तं सुखशान्तिः समुपस्थापयितुं शक्यते। करतलैरवरुध्य मुखानि कियत्कालं यावद् दीनजनकरुणक्रन्दनं निरोद्धुं कल्प्यते। सैकतसेतुना किं सलिलप्रवाहोऽ-वरोद्धुं शक्यते केनापि ? किं जलकणलेशैः शाम्यति कदाचित् प्रलयकालकरालाग्नि-ज्वाला ? कस्य भुजबलेन स्तब्धो भवति प्रवातप्रवेगः ? मध्ये मध्ये किंचदवरुद्धा सत्यपि क्रान्तिर्मुहुर्मुहुः प्रज्वलिता भविष्यत्येव। प्रलयजलधरपटलाः गर्जन्तो भ्रमन्ति गगनाङ्गणे। विद्युद् विस्फूर्जयति। झंझावातः प्रवहत्यजस्रम्। जीर्णः सेतुरपि निर्भिन्नो जातश्चेत् तदाऽखिलापि वसुन्धरा प्रलय-जलधि-तरङ्गमाला-वलीढा संवृत्तेति मन्ये। शृणुत, सावधानतया, वैषम्यमेवैकं बीजमस्ति जन-संङ्घर्षस्य। न यावत् समाजतो विषमयी विषमता दूरीभवति न तावद् धरातले शान्तिं सुखं च सम्भावयामि।

यत्र न्यायप्रियाः, विचारनिपुणाः, प्रतिभासम्पन्नाः, समुदारचेतसः, पक्षपात-विहीनाः, संङ्कीर्णभावरहिताः, त्यागवृत्तयः, संयमिनः, सत्यवादिनः, अहिंसकाः, राग-द्वेष-लोभ-मोहविमुक्ताः, सर्वजनीनहितचिन्तनपरायणाश्च जनाः राष्ट्रस्य कर्णधारकाः भवन्ति, लब्धाधिकाराश्च ते सर्वदैव सुनीतिपद्धतिं परिपालयन्ति। सत्ताधिकारिणः सन्तोपि न किमपि निन्दनीयं विचेष्टन्ते। न केनापि सहान्याय्यं विषमतापूर्णं व्यवहारं वा कुर्वन्ति। सम्पत्तेर्दुरुपयोगमपि न विदधति। न च भोगविलासादिकर्मसु व्यासक्ताः भवन्ति ते। यत्र च विभिन्नजातीयाः, वर्गान्तरीयाः, विविध-सम्प्रदायावलम्बिनश्चापि जनाः समानरूपेण दृश्यन्ते,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समाव्रियन्ते, सम्बोध्यन्ते, व्यवह्रियन्ते च। सम्पत्तौ, शिक्षायां, प्रशासनसेवायां चापि समानाधिकारं विन्दन्ति। नास्ति तेषु कोऽपि कुत्सितो भेदभावः। उच्चावचत्वभावना, वर्गवादः, जातिवादः, सम्प्रदायवादश्चापि नास्ति। सर्वैः साकं सौहार्दपूर्णः सम्बन्धोऽभिवर्त्तते। परस्परं भावयन्तः समाजसेवायां तत्पराः भवन्ति सर्वे। अन्योन्यकल्याणकर्मकरणे एव संलग्नमनोवृत्तयो दरीदृश्यन्ते। नास्ति कश्चनापि घृणितः, उपेक्षितः, पीडितः, अपमानितः, वैषम्यव्यवहारेण दुःखितश्च। यत्रैकमात्रं साम्यबलमेव शासनस्याधारसूत्रं भवेत् नान्यत् किमपि। समुचितनीत्याऽऽनन्दितो भवेत् प्रत्येकं जनः। सर्वविधया सुव्यवस्थया लोकेषु मात्सर्यभावो न जागर्ति। न कश्चित् सर्वथा रिक्तहस्तः, न च कश्चित् मर्यादामतिक्रम्य समुन्नतो भवेत्। सर्वेभ्यः विकासस्यावसराः विद्यन्ते। नास्ति कुत्रापि पक्षपातादिको दोषलेशोऽपि।

यत्र सकलोऽपि जनः सुखभाग् भवेत्, न कश्चिद्दुःखमाप्नोति। सर्वेऽपि समरसभोगिनः स्युः। न कदाचिद् दुःखभारं न कदाचित् सुखलेशं वा लभेरन्, समरसता, समभावना, समसम्बन्धः, समसुखसाधनोपलब्धिः, समाधिकारप्राप्तिश्च भवेत्। न कश्चित् शोषकः न शोषितः, न पीडकः न पीडितः, नोत्तमर्णः नाधमर्णः, न शासकः न शासितः, न स्वामी न दासश्च स्यात्। न कदापि कस्यचित् मनः पराधीनं भवेत्। मानसिकपरतन्त्रतया शूरोऽपि, सकल-कला-कुशलोऽपि, विपुलशक्तिसम्पन्नोऽपि, किञ्चिदपि कर्तुं न प्रभवति। जीवमात्रस्य समुन्नत्यै दया-दम-त्याग-समाधिनिष्ठं व्यक्तिस्वातन्त्र्यं नितान्तमनिवार्यम्।

अतः सकलप्राणिनामभयदानं कुर्वद्भिः सर्वप्रथमं मनुजसमाजोत्थानार्थं भूयान् प्रयत्नो विधेयः। सत्येवंविधे प्रबन्धेऽस्मिन् जगति कुत्रचिदपि पापाचारः, भ्रष्टाचारः लुण्ठनम्, तस्करवृत्तिः, मिथ्यात्वादिकाश्च दोषा न स्थास्यन्ति। यतो हि विषमताऽभावावेव पापस्य मूलकारणे स्तः। तयोर्निवारणं नितान्तमावश्यकं वर्तते। एतेन स्व-परकल्याणकारकाः, सच्चारित्रवन्तः, विशुद्धान्तःकरणाः, सत्यवादिनः, कर्त्तव्यनिष्ठाः, समाज-सेवकाः, परस्पर-शुभचिन्तकाश्च भविष्यन्ति मनुष्याः। भूमण्डलतश्च राग-द्वेष-मद-मात्सर्यासत्य-हिंसा-स्तेयादि-दुर्वृत्तयः सर्वथा प्रनङ्क्ष्यन्ति। वर्षिष्यन्ति च करुणा-प्रेम-अपरिग्रहभावाश्च जनगणाङ्गणे पीयूषरसम्। साम्यनीति-बलेन समस्तनरेषु सुस्नेहाङ्कुरोद्गमेन जनो जनस्य कृते हसन्नेव निजजीवनं समर्पयिष्यति। चिरकाल-पर्यन्तं सुखं भोक्ष्यन्ते मानवाः। हसिष्यति पुनश्चास्यां वसुमती सुखमयो देवलोकः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंप्रकारेण मानव-समाजं सद्गुणैः सम्भूष्य लोकेऽत्र शान्ति-साम्राज्यं संस्थापनीयं भवादृशैस्तरुणैः। इदमेवास्ति सुफलं विद्याया यत् सकल-जीव-सुख-दुःख-सहानुभूति-संलग्नैर्भाव्यमिति। जीवादितत्त्वं समाश्रित्य यापि शङ्का तव मनसि वर्तते सापि न युक्ता। अहमहमिति प्रत्ययविषयो हि जीवपदार्थस्तद्विपरीतश्चाजीवपदार्थ इति प्रत्येयः। इत्येवं भगवतो महावीरस्य तात्कालिकमुपदेशं श्रुत्वा निःशङ्कः समुत्पन्नसन्सन्मतिरिन्द्रभूतिर्दशसंख्याकैर्वेदवेदाङ्गनिष्णातैर्भ्रातृभिः सह तत्पादमूले नैर्ग्रन्थ्यदीक्षां समाश्रितवान्। प्रथमगणधरश्चासौ जातः।

इति मङ्गलायतने वर्धमानतीर्थंकरस्य सविधे इन्द्रभूतेः शिष्यता-ग्रहणं नाम चतुर्थं सोपानम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चमं सोपानम्

अथेन्द्रभूति-प्रभृतीनां महतानुरोधेन महावीरो मोक्षमधिकृत्याब्रवीत्——लोकेऽस्मिन् न सर्वथा रोगात् निवारणं, न क्लेशान्मुक्तिः, न च शाश्वतिकं सुखम्। विशालं साम्राज्यं तृणवत्तुच्छम्, समुपार्जिताः सर्वाः सम्पत्तयश्च नाशशीलाः। अतएव रत्नत्रयं धर्ममवाप्यैव संसार-समुद्रः सन्तरणयोग्यो भवति, नान्यथा। न तनयो न दयिता न मित्राणि न च बान्धवाः सम्पदो वा पुमांसं भव-सागरात् समुद्धर्तुं शक्नुवन्ति। जीवोऽयमेकाकी एवाऽऽगच्छति, निर्गच्छति च, शरीरमपि न स्वकीयं स्वेन सह यात्यायाति वा। तत्तु मल-मूत्र-स्थानं, विनश्वरश्चैव, अतः धर्म-पालनमेव श्रेयस्करम्।

मानवस्य देहस्तरणिरिव वर्त्तते, सकलानि चेन्द्रियाणि छिद्रतुल्यानि। यावद्धि कर्मनीरस्याऽऽस्रवः प्रारब्धः, तावत् जीव-कर्णधारोऽपि न सुरक्षितः स्थातुं शक्नोति।

अतः सर्वदैव श्रद्धा-ज्ञान-संयमादिषु संलग्नीभूय धर्मोपार्जनं कर्त्तव्यम्। कैवल्योपलब्धिमन्तरेण न कश्चिद् मनुष्यो मोक्षं लब्धुं शक्नोति। सुखिनां सुख-वृद्ध्यर्थं दुखिनां च नराणां दुःख-विघातार्थं जिनेन्द्रोक्तो धर्मः साधनैव ग्राह्या। स एव सम्यग्दृष्टिः, सुधीः, सम्यक्चारित्रपालकश्च यो विधिवद् जिनेन्द्रमार्गमनुसरति।

यदा खलु ज्ञानी जीवः मौनमवलम्ब्य उपसर्ग-परीषहादिषु प्रविशति तदा तत्र शिव-सदन-सरणिः प्रत्यक्षीभूता भवति।

यदा मूढो भवति कोधाधीनवृत्तिः तदा स्वनाशमेव करोत्यसौ। यथा मृगेन्द्रस्य स्वभावो दारणम्, तथैव कोधस्यापि मारणमेव प्रकृतिः। यो नाधिकरोति कोपं, कोपस्तमधीनं करोति। महिष इवासौ रोषः स्वकीय-शृङ्गयोर्जीवं समुत्थाप्य पातयति महानाशगर्ते। कोधं विना न पापम्, नाभिशापः, नाभिमानम्, न चाप्य-शान्तिः सम्भाव्यते। अतः क्रोधस्य त्यागः श्रेयान्।

लोभस्यापि परित्यागः श्रेयस्कर एव। लोभवशाज्जनो बहुदुःखानि सहते। अपकीर्तिम्, अविश्वासम्, परापवादम्, विविधदण्डान् च प्राप्नोति। अयमेव द्वेषं जनयति, प्रकटयति च क्रोधाधिकम्। लोभी सर्वदैव धनमेव विलोकयति, न तु द्रव्यं विपत्तिहेतुकम्। यथा मार्जारो दधि-द्रव्यमेव पश्यति, न तु समक्षं दण्ड-प्रहारम्। प्रदीपः सुस्नेहद्रव्येण परिपूर्णोऽपि दशा-विशेषेण समृद्धोऽपि च सन्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लब्धोदयं पद्मबन्धुं विलोक्य न भजति मलिनताभावं किम् ? मानवोऽयं प्रलोभेनैव धरित्रीं खनति, रसं प्रवाहयति, रत्नाकरे निमज्जति, गिरिं लङ्घयति, सहते च सकलानि कष्टानि ।

यदा लुब्धकस्य निन्दा सगर्वा सती प्रसरति तदा तस्य पुण्यशालितापि न प्रभवति सुरक्षिता स्थातुम् ।

संसारेऽस्मिन् न कोऽपि सन्तुष्टः । प्रकामं जलं पिबन्तोऽपि पिपासिताः, अन्नं खादन्तोऽपि बुभुक्षिता एव प्रतीयन्ते । धनिकेभ्योऽधिकं धनं नितरामपेक्ष्यते । मनुष्यस्य मस्तके समुद्विग्नता, नयनयोर्नीरम्, वदने चाधीरतैव विराजते सततम् । असन्तुष्ट-मनुष्यस्य हृदये नात्म-गौरव-भावना, न चापि सम्मान-कामनाधिजायते । सः स्वकीयं 'देवदत्तम्' इति शुभं नामधेयं निराकृत्य 'धनदत्त' संज्ञामपि लब्धुं लुब्धो भवति लोभपरवशतया ।

कृतघ्न-मनुज-सदृशो दुष्ट-जीवो धरायां नोत्पद्यते । मध्ये-वसुन्धरं बहूनि पापानि प्रवर्त्तन्ते, किन्तु कृतघ्नतासदृशं नान्यत् पापं वरीवर्ति । तीक्ष्णतायां, विघाते, प्रहारे वास्ति कृतघ्नता-समानं न शस्त्रान्तरम् । यः कृतं न मन्यते, रहस्यं गोपयति, न करोति प्रत्युपकारम्, परस्योपकारं न स्मरति, सः सर्वोऽपि कृतघ्न एव ।

केचित् प्रशंसकान् प्रेम-भावेन विलोकयन्ति । सर्वदा प्रशंसाकरण-निरत-जन-शोषणमेव तेषां स्वभावः । सा स्नेह-प्रक्रियापि वृथास्ति, न भवन्ति जीवाः परमार्द्रहृदया यया ॥

उदारता पाप-समूहमाच्छादयति । देववृन्दैरभिषिक्तपादप इवोदारपुरुषः सदा फलवानेव भवति । उदारचेतसि कुलीनता-कोमलता-विनम्रता-विशुद्धताऽऽत्म-पवित्रताप्रभृतयो गुणाः समाविष्टा भवन्ति । उदारता हृदयदेशस्यैव धर्मोऽस्ति न तु हस्तपादयोः । वसुमत्यां साम्य-भावेन वर्षणं बलाहके वर्त्तते तथा चोदारपुरुषे ।

पवित्रादपि पवित्रम्, मौक्तिकादपि समुज्ज्वलमस्ति पतिव्रतायाः पातिव्रत्यं वसुधायां निष्कलङ्कश्चन्द्रमाः । पातिव्रत्य-गुणभूषिता नारी विपिनेऽपि सुर-वृन्द-रक्षिता भवति । पातिव्रत्यं त्वसमुद्रोद्भूतम्, जगत्प्रकाशकं चैकं महत्त्वपूर्णं रत्नम् ।

मानवः कुसुम-विलास-सदृशोऽस्ति प्रथमम्, पुनश्च हृदयस्थ-मनोरथ-गन्ध-बलेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाव-भृङ्गेषु समागतेषु सत्स्वेव फलवत्ता जायते तस्मिन्। जीवोऽयं चतुर्गति-बन्धन-विनाशे प्रयत्नशीलो भवेच्चेत् तदा स्वर्गो मोक्षो वा न दूरस्थः।

जीवन-मार्गेऽप्येवंविधा भास्वर-प्रभा प्रकाशते। यथा यथा तमः प्रसरति तथा तथा प्रकाशोऽपि विस्तारमाप्नोति। कुविचार-जलधराः यथा यथा नीर-विपत्ति वर्षेयुस्तथा तथा वीतरागविज्ञान-विद्युदपि ज्योतिः प्रददाति। सदैव साम्यभावना विपत्तौ सम्पत्तौ च जीवन-सङ्गिनी भवति पुंसाम्। अवश्यमेव यामिनी गमिष्यति समागमिष्यति च मधुमयी प्रभातवेला। इमामेव समतां मनसि निधाय मधुकरः कमल-कोषे घोरान्धकारे लभते प्रकाशम्। प्रभाते कोमल-दूर्वा-तन्तुषु मौक्तिकगणाः इव हिमकणाः किम् अनुपमाः साम्य-विन्दवः उताहो जालमार्गाः? यदाऽयं जीवोऽसारे संसारे परिभ्रमन्नयति बहुकालं तदेदं साम्यमेव तस्य महद्बलमिति निश्चेयम्।

एवं विनम्रतापि ज्ञानवतो भूषणम्, सर्वेषां च गुणानां जननी। यो जीवनं सफलं कर्त्तुमभिलषति तेन विनम्रताऽवश्यमेव समाश्रयणीया, नास्त्यन्यो मार्गः। तत्र न भीतिः, न शङ्का, न च दर्पश्चित्तं स्पन्दयितुं समर्थः। दया मनुष्याणां परमहितैषिणी। दया-विहीनो मानवः पवित्र-चारित्र्य-प्रभाव-शून्यः। यदि कश्चिद्दयां प्रदर्शयति तर्हि तं प्रत्यपि करुणापूर्णव्यवहारो विधेयः। कारुण्यरसेनैव स्वर्गे सौख्यं सम्भवति। जीवस्य क्रूरां मनोवृत्तिं मार्दवपूर्णव्यवहार एव परिवर्त्तयति। यः सकल-गुण-गणाधिष्ठानम्, दयाधाम, क्षमावतारश्च स निखिल-जन-हृदयेषु प्रियः निरवद्यश्च। करुणाभावः सर्वेषु जीवेषु सदैव विधेयः। ये करुणापरा मनुष्याः करुणाभिषिक्त-कथां शृण्वन्ति, आचरन्ति च, भवन्ति ते सर्वदैव समादरणीयाः। बन्धुत्वेन च समग्रभूतेषु व्यवहरन्ति। करुणा-कादम्बिनी सर्वदैव कारुण्यरसं वर्षन्ती सती निखिललोकायोज्जीवनं ददाति। दया-क्षमाभ्यामेव जीवने परिपूर्णता समागच्छति नान्यथा।

यथैव चित्रावली पृष्ठभूमेराश्रयेण सचित्रा भवति तथैव पुंसः पवित्रशीलतापि उच्चैर्वृत्तिसमेता सती पूर्वतोऽप्यधिका पावनतमा सम्पद्यते। प्रगाढ़-विश्वासः, निर्दोषन्यायः, सत्यं वापि उच्चैर्वृत्तिसमानं प्रशंसनीयं नास्ति। यो निज-निन्दां समाकर्ण्य हर्षितो प्रशंसां च स्वकीयां श्रुत्वा लज्जितो भवति सः सुधीरेव सम्यक् शीलवान् गण्यते बुधैः।

शतेषु रणवीरता, सहस्रेषु पाण्डित्यमस्ति, परन्तु कोटिष्वपि द्वित्राः एव जनाः समुदारचेतांसो भवन्ति न सर्वे। इदमस्माकम्, इदं त्वदीयम्, इदं विभाज्यम्,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्येवंविधाः विचाराः क्षुद्राणां भवन्ति न तूदारचेतसाम्। ते तु निखिलं विश्वमेकं कुटुम्बमिव मन्यन्ते।

प्रदाता नर एवास्ति संसेव्यः, स। तुच्छोऽपि किन्नु स्यात्। जनाः जलनिधिं परिहृत्य निपानस्य नीरमेवाभिलषन्ति। सन्तोषामृत-समानं न किञ्चिदपि शान्ति-प्रदं तत्त्वम्। यः पलायनवादी सः किमप्युपार्जितुं न प्रभवति। अन्येभ्यो जीवेभ्यः क्लेशम् अदत्त्वैव सञ्चितं धनं लाभ-प्रदम्। सः सुधीरेव धरायां पुण्यवान्, स एव भवसिन्धुं सन्तरति यस्त्वाऽऽशां समुन्मूलयति।

मनुष्यो निजकर्मणां संवरेण निर्जरया च क्षयमुपनीय मोक्षं लभते। धरित्रीं दुःखपूर्णां विज्ञाय निःश्रेयस-प्राप्त्यर्थं क्रियतामथ प्रयत्नः। मानव-योनौ जन्मातीव दुर्लभम्। नर-जीवनं लब्ध्वा सदा सम्यग् धर्म-साधना विधातव्या। त्रैलोक्याधिपत्यं समधिगन्तुं, विषादस्य निष्कासनार्थं, जनसाधारणस्य दुःखं दूरीकृत्य सुख-प्रदानार्थं च मनीषिभिर्जिनधर्मे प्रवृत्तैर्भाव्यम्।

त्रिभुवनस्याऽऽयुष्यम्, द्रव्याणि, समग्र-सुखानि च सर्वदैव नाशोन्मुखानि ज्ञात्वा धर्म-सेवनमेव यथार्थज्ञानम्। धर्मस्तु दशाङ्गः। उपभोगात् परं न किञ्चिदपि तुच्छं वस्त्वन्तरम्। न च योगात् समुन्नतः कश्चिद् धर्ममार्गः।

मुनीशाः परिग्रहान् विहाय, मनो-वचः-काय-शुद्धिं च विधाय, शास्त्र-तरणिं समवलम्ब्य संसार-सागरं तरन्ति। ये च मुनयोऽहिंसा-धर्मं परिपालयन्ति ते द्वादश-विध-तपोभिर्नितरां तुष्टिं पुष्टिं च विन्दन्ति।

मुनीन्द्रः कदाचिन्निराहारव्रतैः, कदाचिद् रस-परित्यागैः, कदाचित्परीषह-जयैश्च कर्म-निर्जरां करोति। एकान्ते शयनादिकं कार्यं विदधात्यसौ। तपन-शिशिर-कालेऽपि भवेदेकरसानुवृत्तिः। खलानपि प्रति क्षमाभाव एव धारयति सर्वदा। न च सम्मानमभिलषति स्वप्नेऽपि। सदैव सारल्येन मृदुना च व्यवहरति। आचरति च मानसिक-वाचिक-कायिकसमवृत्त्या सदोत्तमं धर्मम्।

सततमहिंसा पालनीया। सकलापि हिंसा त्याज्या। यतो हि सोत्तरकाले दुखदाऽशान्तिप्रदा च। न कर्त्तव्या मृषाभाषणे प्रीतिः। सत्यसमं नास्ति किञ्चिदपि तपः समग्रेऽस्मिल्लोके। अदत्तं वस्तु न गृह्णीयात्। वस्तुस्वामिनो तद्वस्तुचौर्ये महद्दुःखं जायते पापबन्धोऽपि भवति। अस्तेयविचारभूषितो जन इह परत्र च सम्मानास्पदः सुखी च भवति। ब्रह्मचर्यान्नास्ति परमं सुखम्। तत्पालने सदैव यतितव्यम्। स्वदारसन्तोषी पूर्णब्रह्मचारी च सदा पूज्योऽभिनन्दनीयश्च भवति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लोके। परलोके चापरिमितं सुखं लभते। परिग्रहो महतामनर्थानां मूलम्। तत्परिमाणं त्यागो वाऽनल्पसुखकारणम्। अपरिग्रही परिग्रहपरिमाणव्रती च सदा सुखी परहितचिन्तकश्च भवति। इत्थं सविवेकं सदाचारसंयुतं जीवनं यापनीयं भव्यजनैः सर्वदा।

शरीरं निर्बलं नश्वरं च, कालश्च निर्दयः। अत एवात्मकल्याणार्थं साधु-वृत्तिरवलम्बनीया सद्यः। न कोऽपि नरः सत्वरम् आत्मज्ञानं लभते, किन्तु चिरकालाभ्यासेनैव। प्रमादेनैव जन्म-मरणचक्रे निष्पीड्यतेऽयं जनः। तस्मात् कल्याणार्थं प्रमादोऽपि सर्वथा परिहर्त्तव्यः। मूढ एवेन्द्रिय-जन्य-भोगेषु भवति व्यासक्तः, ज्ञानी तु पञ्चेन्द्रियविषयेषु वेदनामेव विलोकयति। सर्वेऽपि विषयाः नीरसाः पुनर्भवतरुवरमूलमेव सिञ्चन्ति। अतस्तेषां सेवनमनासक्तभावेन कर्त्तव्यम्।

उपयोगलक्षणं जीवद्रव्यम्, अनन्तमनादि च वर्त्तते। अतोऽस्योत्पत्तौ न पञ्चभूतानां कारणता। अत्यन्तसूक्ष्माः पौद्गलिक-कर्म-वर्गणा लोके सर्वत्र विद्यमानाः सन्ति। एतासां संयोगेनैव देहस्य निर्माणं सम्पद्यते। जीवस्य क्रिया-कलाप-केन्द्रं वर्त्तते शरीरम्। तच्च पञ्चविधम्---

(१) औदरिकम्, (२) वैक्रियिकम्, (३) आहारकम्,
(४) तैजसम्, (५) कार्मणञ्चेति।

छेदन-भेदन-धर्म-युक्तं, रक्त-मांस-मज्जा-समन्वितम् औदरिकं शरीरम्। दृश्यादृश्यं, चतुर्दिक्षु विचरणशीलं, रक्तादिधातु-शून्यं, विविधरूप-धारकं च वैक्रियिकं शरीरम्। प्रमत्तगुणस्थानवर्तिनः शङ्कानिवृत्त्यर्थं संयमादिपालनार्थं वा हस्त-प्रमाणं, स्वच्छ-स्फटिकवन्निर्मलं, इष्टक्षेत्रगं जायमानं सूक्ष्ममाहारकगात्रम्। तैजस-पुद्गलैर्विरचितम् उष्णताप्रदम् च शरीरं तैजसम्। ज्ञानावरणादिकर्मणां समुदयरूपं कार्मण-शरीरम्। पञ्चविधो देहोऽयं जीवं राग-द्वेष-सुख-दुःख-हर्ष-शोकादि-चक्रे भ्रामयति, विदधाति च तस्य जन्म-मरण-विधानम्। करोति च नूतनेऽपि जन्मनि तस्यात्मानं कर्म-धूलि-निलीनम्।

जीवन-जलनिधेस्तटद्वयं जन्म मरणञ्चेति। इतो गमनं ततश्चागमनम्। वर्तमानपर्यायोत्पादः जन्म तन्नाश एव मृत्युः। स्थूलं वपुर्मृत्यु-वेलायां जीवं जहाति, सूक्ष्मशरीरमात्मना सार्धं गच्छति नव-जन्मप्राप्त्यर्थम्। इदमेव जन्म-मरण-चक्रम्। कर्मावरणं विना चक्रस्यास्य प्राप्तिर्न कदापि सम्भवा। अणुव्रतानां महाव्रतानां च पालनेनैव सर्वे जनाः परमानन्दजनकं निराकुलं चराचरसकलजग-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्प्रकाशकं कैवल्यबोधं प्राप्तुं समर्था भवन्ति। यथा नद्याः प्रगतिशीलप्रवाहस्य नियन्त्रणार्थं तटप्रदेशाः भवन्ति तथैवास्य जीवननदस्य प्रवाहनियमनार्थं अणु-महाव्रतरूपं तटद्वयं परमावश्यकम्। नैतत् संभवं बाह्याभ्यन्तरशुद्धिं विना। अन्यथाऽस्वस्थे सति मुक्तियात्रायाः साधनभूते शरीरे न धर्मसिद्धिर्न च मुक्तेरुपलब्धिः कर्त्तुं शक्यते।

कानि तान्यणुव्रतानि महाव्रतानि वेति जिज्ञासायामुच्यते—तत्र तावत्प्रथममणुव्रतानि निरूप्यन्ते। अणुव्रतानि पञ्चधा सन्ति—अहिंसाणुव्रतम्, सत्याणुव्रतम्, अचौर्याणुव्रतम्, ब्रह्मचर्याणुव्रतम्, परिग्रहपरिमाणाणुव्रतञ्चेति। तत्र हिंसाया एकदेशत्यागोऽहिंसाणुव्रतम्। हिंसा चतुर्विधा--सांकल्पिकी, आरम्भिकी, औद्योगिकी, विरोधजा चेति। 'इमं हन्मि' इति संकल्पपूर्वकः क्रियमाणो जीववधः सांकल्पिकी हिंसा। आहारपानादिक्रियासु जायमाना हिंसा आरम्भिकी। उद्योगे व्यापारे वा या हिंसा जायते सा औद्योगिकी। कुटुम्ब-समाज-राष्ट्र-रक्षार्थं शत्रुभिः सह कृते संग्रामे या हिंसा भवति सा विरोधजा हिंसा। एतासु चतसृषु हिंसासु सांकल्पिकी हिंसा सर्वथा त्याज्या एव। अन्यास्तु जीवनव्यवहारे गृहस्थानामपरिहार्याः। अतस्तासां त्यागस्तेषां कृते न सम्भवः। किन्तु त्रस-स्थावरजीवानां रक्षाभिप्रायो विधेय एव।

अस्याहिंसाणुव्रतस्य निर्दोषपालनार्थं बन्ध-वध-च्छेद-अतिभारारोपण-अन्नपान-निरोधाख्याः पञ्चातिचारा अपि परिहर्त्तव्याः।

द्वितीयं सत्याणुव्रतम्। तद्यथा-—इहलोक-परलोकसुखाभिलाषिणा गृहस्थेन असत्यभाषणस्य स्थूलस्वभावस्य वर्जनाभ्यासः करणीयः। असत्यभाषणेऽनभिरुचिः, आचरणे चासत्यप्रयोगाभावो व्यवहर्त्तव्यः। मिथ्यादोषारोपोऽपि न कर्त्तव्यः। गोपनीयविषयाणां प्राकट्यं न कार्यम्। विश्वासघातोऽपि न विधेयः। अन्यायपूर्णपरामर्शदानेऽसहमतिः सत्याणुव्रतरक्षणार्थमावश्यकी। सत्याणुव्रतस्वरूपं प्रदर्शयता स्वामिना युक्तमेवोक्तम्—

'स्थूलमलीकं न वदति न परान् वादयति सत्यमपि विपदे।
यत्तद्वदन्ति सन्तः स्थूलमृषावादवैरमणम्॥'

एवमेवाप्रशस्तमप्रियं वचनमपि न वचनीयमन्धादिवत्। प्राणघातकं सत्यमपि न वाच्यं सत्याणुव्रतिना।

अस्य व्रतस्य निरतिचारपरिपालनार्थं परिवाद-रहोभ्याख्या-पैशुन्य-कूटलेखकरण-न्यासापहारनामानः पञ्चातिचारा अपि त्याज्याः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तृतीयमचौर्याणुव्रतम् । आज्ञाप्राप्तिं विना मनसा वचसा वपुषा च कस्यचिद्वस्तुनोऽग्रहणमचौर्याणुव्रतम् । चौर्यस्य भेदद्वयम्— स्थूलं सूक्ष्मं चेति । स्थूलं चौर्यं स्थूलेनेन्द्रियेण, सूक्ष्मं चौर्यं तु मनसा भवति । मनसि चौर्यस्याभिप्रायोऽपि कार्यान्वयनाभावे सत्यपि दोषोपधायको भयङ्करोऽपराधः । एतेन मुक्तिमार्गोऽवरुध्यते । चौर्येणानीतस्य वस्तुनः क्रयणम् चौर्यार्थं चौरस्य प्रोत्साहनम् । राजकरस्य गोपनम् । मिथ्याऽऽयव्ययर्योविवरणम् । तुलाकार्ये प्रवञ्चना । शुद्धे वस्तुनि चाशुद्धस्य वस्तुनः संयोगः । एतेभ्यो मानसिक-वाचिकेभ्यश्चौर्यदोषेभ्यः सर्वदाऽऽत्मा रक्षणीयः । तदुक्तं स्वामिसमन्तभद्राचार्येणास्य व्रतस्य स्वरूपमतिचारांश्चाश्रित्य—

"निहितं वा पतितं वा सुविस्मृतं वा परस्वमविसृष्टं ।
न हरति यन्न च दत्ते तदकृशचौर्यादुपारमणम् ॥
चौरप्रयोगचौरार्थादानविलोपसदृशसन्मिश्राः ।
हीनाधिकविनिमानं पञ्चास्तेये व्यतीपाताः ॥"

चतुर्थं ब्रह्मचर्याणुव्रतम् । कामवासना जीवानां महान् रोगो वर्त्तते । तयाऽऽत्मनोऽऽत्मनि चर्या न भवति । कामपीडितो जनः स्वां परां वा पत्नीं न गणयति । प्रचुरं पापं सञ्चयति । लोके विपुलां निन्दां दण्डांश्च प्राप्नोति । परत्राधोगतिं याति । अतः परदारान् त्यक्त्वा स्वदार एव सन्तोषमाप्नोति यः स परदारनिवृत्त्यपरनामस्वदारसन्तोषव्रतधारी । अनेन व्रतेन शारीरिकस्वास्थ्यमनेके आत्मगुणाश्च सम्पद्यन्ते । एतस्यापि व्रतस्य स्वरूपं स्वामिना निगदितम्—

'न तु परदारान् गच्छति न परान् गमयति च पापभीतेर्यत् ।
सा परदारनिवृत्तिः स्वदारसन्तोषनामापि ॥'

अस्य पञ्चातिचारा अपि त्याज्याः । ते यथा—अन्यविवाहाकरण-अनङ्गक्रीड़ा-कामोद्दीपकचेष्टावचनप्रयोग-कामसेवनासक्ति-इत्वरिकागमनानि ।

ब्रह्मचर्यव्रतधारिणां किमप्यसाध्यं नास्ति । देवा अपि तान् नमन्ति ।

पञ्चमं परिग्रहपरिमाणाणुव्रतम् । परिग्रहो महद्दुःखदायकः । तस्य कदापि सीमा नास्ति । 'लोभाल्लोभः प्रजायते' इत्युक्तिः सर्वप्रसिद्धा । परिग्रहस्य सत्यामिच्छायां लोभः प्रवर्धते । ततस्तृष्णा, अधिकगृहलाभः, विपुलभूमेः प्राप्तिः । यानवाहनम्, मुद्रादेः संग्रहः, तदर्थमाग्रहश्च शनैः शनैः परिमाणस्य सीमानं लङ्घयति । अतः संयमेनास्य परिमाणकरणमेव श्रेयस्करम् ।

एतद्व्रतरक्षार्थं अतिवाहन-अतिसंग्रह-विषाद-अतिलोभ-अतिभारवहनाख्यानि पञ्च दूषणानि परिहर्त्तव्यानि । समाप्तमणुव्रतम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतेषां पञ्चाणुव्रतानां सम्यक् निर्वाहार्थं सप्त सहायकव्रतानि गृहस्थैरवश्यं पालनीयानि सन्ति। तद्यथा—त्रीणि गुणव्रतानि चत्वारि शिक्षाव्रतानि च। गुणव्रतानि यथा—दिग्व्रतम्, अनर्थदण्डव्रतम्, भोगोपभोगपरिमाणं च। तत्र दिग्व्रतं सूक्ष्मस्यापि पापस्य निवृत्त्यर्थं मरणपर्यन्तं पूर्वोत्तरदक्षिणपश्चिमदिशां मर्यादां कृत्वा 'इतो बहिर्न यास्यामीति' संकल्पपूर्वकं गृहीतं व्रतम्। इह व्रते सागर-नदी-अटवी-पर्वत-देश-योजनानि प्रसिद्धानि मर्यादाः कथितानि। तदाश्रित्यैवेदं व्रतमुक्तदिशां मर्यादा गृह्यते। एतद्व्रतप्रभावादवधेर्बहिरणुपापपरित्यागाद्दिग्व्रतधारिणां अणुव्रतानि पञ्चमहाव्रतत्वं प्राप्नुवन्ति। यतो हि तत्र मनोवचःकायैः कृतकारितानुमोदैः पञ्चानां पापानां सूक्ष्मस्थूलभेदभिन्नानां परित्यागो जायते। अस्य व्रतस्योर्ध्वाधस्तात्तिर्यग्व्यतिक्रमणानि क्षेत्रवृद्धिरवधीनां विस्मरणं चेति पञ्चातिचाराः परिहरणीयाः। गृहीतदिग्व्रतमर्यादाभ्यन्तरे निष्प्रयोजनेभ्यः पापकार्येभ्यः विरतिरनर्थदण्डव्रतम्। तत्पञ्चधा—पापोपदेशः, हिंसादानम्, अपध्यानम्, दुःश्रुतिः प्रमादचर्या च। श्रावकाचारग्रन्थेभ्य एतेषां पञ्चानर्थदण्डानां स्वरूपाणि ज्ञातव्यानि। एतस्यापि व्रतस्य कन्दर्प-कौत्कुच्य-मौखर्यातिप्रसाधनासमीक्ष्याधिकरणाख्याः पञ्चातिचाराः त्याज्याः। सकृद्भोग्यं भोजनादिकं भोगः, असकृद्भोग्यं शयनासनादिकमुपभोगः, तयोः परिमाणं भोगोपभोगपरिमाणं व्रतम्। अनेन व्रतेन भोगोपभोगेषु वस्तुषु चिरन्तनीया इन्द्रियविषयासक्तिः कृशतमा भवति। अस्यापि पञ्च दूषणानि सन्ति—विषयानुपेक्षा-अनुस्मृति-अतिलौल्य—अतितृषा-अति अनुभवाख्यानि। तानि व्रतिना परिहर्त्तव्यानि।

चत्वारि शिक्षाव्रतानि। यथा—देशावकाशिकम्, सामायिकम्, प्रोषधोपवासः, वैयावृत्त्यं चेति। गृहीतदिग्व्रतमर्यादासंकुचीकरणं प्रत्यहं देशावकाशिकम्। शास्त्रोक्तविधिना स्वध्यानाभ्यासः सामायिकम्। अष्टम्यां चतुर्दश्यां च चतुर्णां आहाराणां स्वेच्छया व्रतभावनया इति यावत् परिहारः प्रोषधोपवासः। गुणनिधये तपोधनाय दानं वैयावृत्त्यम्।

वैयावृत्त्यं हि प्रत्युपकारनिरपेक्षं धर्मनिमित्तं च क्रियते। एतच्चतुर्विधम्—आहारौषधोपकरणावासदानभेदात्। भक्त-पानादेर्दानमाहारदानम्। ज्वरादिरोगनिवृत्त्यर्थं औषधस्य दानमौषधदानम्। ज्ञानसंयमादिसाधनस्योपकरणस्य शास्त्र-कमण्डलुपिच्छादेर्दानमुपकरणदानम्। वसतिकादेर्दानं आवासदानम्। काले पात्रे दत्तमल्पमपि दानं तथैव बहुफलं फलति यथा क्षितिगतं वटबीजम्। गृहकर्मणा संचितं बहु पापमपि गृहविमुक्तानां संयमिनां वैयावृत्त्यं नाशयति। तपोधनानां प्रणतेरुच्चैर्गोत्रं, दानात् भोगान्, उपासनात्पूजां, भक्तेः सुन्दरं रूपं, स्तवनाच्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कीर्ति लभते। उक्तानां चतुर्णां शिक्षाव्रतानामपि पंच-पंचातिचारा भवन्ति ते सर्वेऽपि त्याज्याः।

एवं त्रीणि गुणव्रतानि चत्वारि शिक्षाव्रतानि मिलित्वा सप्त शीलव्रतानि भवन्ति। पूर्वोक्तानि पंचाणुव्रतानि सशीलव्रतानि द्वादश व्रतानि गृहस्थानां कृते निरूपितानि।

साम्प्रतं महाव्रतानि निरूप्यन्ते। अहिंसा, सत्यम्, अचौर्यम्, ब्रह्मचर्यम्, अपरिग्रहश्चेति पंचमहाव्रतानि मनोवचःकायैः कृतकारितानुमतैः सूक्ष्मस्थूलानां हिंसादीनां पंचानां पापानां विरतेर्मुनीनां भवन्ति। महाव्रतधारणेन मुनयः संवरं कुर्वन्ति। निर्जरामपि त एकदेशतः प्राप्नुवन्ति। यत्नतस्ते चलन्ति, यत्नतस्तिष्ठन्ति। पञ्च समितयस्तिस्रो गुप्तयः पञ्चतय इन्द्रियरोधो लोचः षट्तयमावश्यकमचेलक्यमस्नानं क्षितिशयनमदन्तधावनं स्थितिभोजनमेकभक्तश्चैवं एते निर्विकल्पसामायिकसंयमविकल्पत्वात् श्रमणानां मूलगुणाः। यस्य श्रमणस्य परमाणुप्रमाणमपि देहादिषु मूर्च्छा विद्यते स श्रमणः सर्वागमधारकोऽपि सन् सिद्धिं न लभते। वस्तुतः स एव श्रमणः स एव संयतो यो हि पञ्चसमितः त्रिगुप्तः पंचेन्द्रियसंवृत्तो जितकषायो दर्शनज्ञानसमग्रोऽस्ति। यः पदार्थेषु न मुह्यति न रज्यति नैव द्वेषमुपयाति स एव श्रमणो निश्चयेन विविधानि कर्माणि क्षपयति संवर-निर्जराभ्याम्। यथार्थतः वहिर्लोकं विहाय स्वरूपरमणे एवासौ लीनः, जीवन-तरणेः सर्वेषां छिद्राणां पूर्ति विधाय जलरूपकर्मागमस्य मार्गस्यावरोधं कुर्वन्नयं तपसाऽविपाकनिर्जराकरणोद्यतो भवति, यस्य शक्त्या फलभुक्ति विनैव प्रतीक्षितकर्माणि भस्मीभवन्ति। देहे वर्त्तमानोऽपि चेतनः समस्तात् कर्मसंघातात् तथैव मुक्तो भवति यथा जले जलजं, वह्नौ च दग्धं सुवर्णं विद्योतते। दुग्धजलमिश्रणमिवात्मकर्मणोः संयोगो बन्ध इत्युच्यते।

आत्मा स्वभावतो नीरूपः किन्तु अनादिकालतो रूपिणः कर्मणो नैसर्गिके चक्रे पतित्वायममोहग्रस्तोऽपि मोहग्रस्तः प्रतीयते। यथा चिक्कणपदार्थेषु धूलिः सम्पृक्तो भवति तथैव रागद्वेषमसृणहृदये कर्मरूपिणां कणानां समावेशो भविष्यत्येव अयमेवास्ति बन्धः। भावबन्धेन, द्रव्यबन्धेन चात्मनोऽरूपिताऽऽच्छाद्यते सरूपता च प्रकाश्यते। कर्मबन्धस्य कारणम् आस्रवो वर्त्तते। मुमुक्षुर्जीवः प्रवृत्तीनां दमनं कुर्वन् समस्तकर्मभ्यः स्वात्मानं मुक्तं करोति तदा कर्मजन्योपाधिभ्यो विमुक्तोऽसौ स्वकीयं शुद्धस्वरूपं प्राप्नोति। अयमेवास्ति मोक्षः। मोक्षस्थितौ ह्यात्मा सर्वज्ञः, सर्वदर्शी विराट्स्वरूपश्च सम्पद्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्तःकरणशुद्धये त्विमाः भावनाः भावयितव्याः–जगतो नश्वरवस्तुभ्यो मनसोऽपहारः संसारः कष्टागारम्। नात्र कोऽपि स्वकीयः। मृत्युरवश्यंभावी। आत्मैकशरणेन भाव्यम्। यदा मनुष्यः एकाकी एवागच्छति तदा कृतं सहचरान्वेषणेन। मलमूत्रागारं शरीरं प्रत्यनासक्तिः। राग-द्वेषाज्ञान-मोह-हिंसाऽसत्येभ्य आत्मरक्षा। सर्वेभ्यः पदार्थेभ्योऽयमात्मा सर्वथा भिन्नः। दुखात् कर्मभ्यश्च परिहारः। प्रारब्धकर्मभ्यो मुक्तेश्चिन्तनम्। पुरुषार्थद्वारात्मबलवृद्धिविचारणम्। येन ज्ञानेनात्मनः समुत्थानं मुक्तिश्च भवति तस्य दुर्लभज्ञानस्य मननम्। धर्मस्वरूपस्य महत्तायाश्च पुनः पुनश्चिन्तनमेवास्ति सल्लक्ष्यम्।

जीवोऽथवात्मा स्वभावेनामूर्त्तः सन्नपि कर्मबन्धकारणेन मूर्त्त इव प्रतीयते। स्वतन्त्रः सन्नपि परतन्त्रो भासते। स्वयमुत्थान-पतनयोः कारणं सन्नपि कर्मबन्धेन नित्योऽप्यनित्यः प्रतीयते। अनेकान्ते मुक्तेरेकः सुनिश्चितो धर्मोऽप्यस्ति। यो दशलक्षणस्य धर्मस्य सम्यक्तया पालनं विदधाति तस्मै नावश्यकः स्वतन्त्रः परमात्मा, न च तस्यात्मा कर्मबन्धस्य पराधीनतां स्वीकर्त्तुं बाधितो भवति। सर्वेषु जीवेषु वर्तमानश्चेतनः आत्मैव भगवान् नान्यः। कर्मबन्धप्रभावेन स मोहग्रस्तोऽभिजायते। आवरणे नष्टे सति सः स्वयमेव परमात्मपदं प्राप्नोति किमन्येनेश्वरेण। यः स्वात्मानं बलहीनं मन्यते सः परावलम्बनं विना कथं प्रवृत्तो भविष्यति। अतो बलवानात्मैव स्वशक्त्या परमात्मा भवितुं शक्नोति। ये न वर्त्तन्ते आत्मजिज्ञासवस्तैरेव स्वतन्त्र ईश्वरः स्वीकृतः। प्रत्येकं जीवः दशलक्षणस्य धर्मस्य परिपालनेन स्वशक्त्या परमात्मपदं प्राप्य सर्वज्ञः, सर्वदर्शी, भवितुं प्रभवति।

आत्मा त्रिविधः। बहिरात्मा, अन्तरात्मा परमात्मा चेति। जीवदेहयोरपृथग्बोधः बहिरात्मा, जीवशरीरयोर्भेदज्ञानं नामान्तरात्मा। अयमेवान्तरात्मा सम्यग्दृष्टिर्मोक्षमार्गस्य पथिको न बहिरात्मा मिथ्यादृष्टिः संसारकारणस्य मिथ्यात्वस्य सद्भावात्। परमात्मापि द्विविधः—अर्हन् सशरीरः, सिद्धः शरीररहितश्चेति। ज्ञानावरण-दर्शनावरण-मोहनीयान्तरायघातिकर्मणां नाशकस्तदभावादाविर्भूतदर्शनज्ञानसुखवीर्यानन्तचतुष्टयगुणस्वरूपः, परमौदारिकशुभशरीरस्थः, क्षुत्तृषाभय-रोग-मोह-चिन्ता-राग-द्वेषाद्यष्टादशदोषविरहितः शुद्धः, एवंगुणविशिष्ट आत्मा अर्हन् परमात्मा समभिधीयते। अयं सर्वज्ञः सर्वदर्शी मोक्षमार्गप्रणेता च भवति। सर्वदेशेषु विहरन् लोकानुपदिशति। तदनन्तरं वेदनीयायुर्नामगोत्राख्यानां चतुर्णां अघातिकर्मणां विगमे सति स एवार्हन् सम्यक्त्वाद्यष्टगुणसमेतः लोकालोकस्य ज्ञायको द्रष्टा अशरीरः सिद्धः परमात्मा भवति। सेयं शुद्धा सिद्धावस्थाऽऽत्मनोऽ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्तिमा परिणतिः। यदनन्तरं पुनर्भवं न प्राप्नोत्यात्मा। अनन्तकालपर्यन्तं लोकाग्र-शिखरे विराजतेऽसौ। तेषां मुक्तजीवानां कल्पशतेऽपि काले याते सति कोऽपि विकारो न जायते। ते मुक्तौ विद्यादर्शनादिगुणसम्पन्ना निरतिशया निरवधयः सुखमावसन्ति। कर्मबन्ध-विमुक्ताः सर्वेऽप्यात्मानः परमात्मपदस्याधिकारिणः संसारिभिरुपास्याश्च।

इदानीं मोक्षमार्गोऽभिधीयते। सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रञ्चेति त्रीणि मिलित्वा मोक्षमार्गो मोक्षोपाय इति यावत्। तत्र तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्। तत्त्वार्थविषयिणी निष्ठा श्रद्धा सा एव सम्यग्दर्शनमिति भावः। तत्त्वार्थाश्च जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षाः। चेतनालक्षणो जीवः। स द्विविधः—संसारिमुक्तभेदात्। संसारिणोऽपि जीवाः द्विप्रकाराः त्रसाः स्थावराश्च : त्रसाश्चतुर्विधा द्वीन्द्रियाः त्रीन्द्रियाः चतुरिन्द्रियाः पञ्चेद्रियाश्च। पंचेन्द्रिया अपि द्वेधा संज्ञिनोऽसंज्ञिनश्च। समनस्काः संज्ञिनः अमनस्काश्चासंज्ञिनः। स्थावराः पञ्चविधाः—पृथिव्यप्तेजोवायुवनस्पतयः। एतेषामेकमेव स्पर्शनेन्द्रियम्। द्वीन्द्रियादारभ्य पञ्चे-न्द्रियपर्यन्तानां कृमि-पिपीलिका-भ्रमर-मनुष्यादीनां त्रसानामेकैकवृद्धानीन्द्रियाणि। सम्मूर्च्छनगर्भोपपादा जन्मानि तेषां भवन्ति। जरायुजाण्डजपोतानां गर्भः। देवनार-काणामुपपादः। शेषाणां सम्मूर्च्छनम्। एकेन्द्रियादारभ्य असंज्ञिपर्यन्तानां तिरश्चां नियमतः सम्मूर्च्छनमेव जन्म भवति। अवशिष्टानां तु तिरश्चां गर्भसम्मूर्च्छने उभये जन्मनी भवतः। लब्ध्यपर्याप्तकानां मनुष्याणां सम्मूर्च्छनम् इति भावः। पञ्च शरीराणि तेषां संसारिणामौदारिकवैक्रियिकाहारकतैजसकार्मणानि। आद्यं गर्भसम्मूर्च्छनजन्मवतां मनुष्यतिरश्चाम्। द्वितीयं देवनारकाणामुपपादजन्मवताम्, केषाञ्चित्तपोऋद्धिविशेषप्राप्तानामपि। तैजसकार्मणे तु सर्वेषां संसारिणाम्। आहारकं तु प्रमत्तसयंतस्यैव तपोधनस्य। त्रयो वेदाः। नारकसम्मूर्च्छिनो नपुंसकवेदाः। देवाः स्त्रीपुरुषवेदाः। शेषास्त्रिवेदाः। त्रिविधकर्म-मलवर्जिता अनन्तसुख-ज्ञान-दर्शनाद्यनन्तगुणसम्पन्नाः लोकाग्रशिखरस्थिताः सिद्धा मुक्ता जीवाः।

अचेतनालक्षणोऽजीवः। स पञ्चविधः—पुद्गलः, धर्मः, अधर्मः, आकाशम्, कालश्चेति। पुद्गलो द्विविधः—स्थूलसूक्ष्मभेदात्, परमाणु-स्कन्धभेदाद्वा। चतुर्विधो वा स्कन्ध-स्कन्धदेश-स्कन्धप्रदेश-परमाणुभेदाद्वा। अनन्तसमस्तपरमाणूनां समुच्चयः स्कन्धः, तदर्धं स्कन्धदेशः, तदर्धार्धं स्कन्धप्रदेशः। परमाणुश्चाविभागी पुद्गलः। षड्विधो वा, बादरबादर-बादर बादरसूक्ष्म-सूक्ष्मबादर-सूक्ष्म-सूक्ष्म-सूक्ष्मभेदात्। तत्र छिन्नाः स्वयं सन्धानासमर्थाः काष्ठपाषाणादयो बादरबादराः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छिन्नाः स्वयं सन्धानसमर्थाः क्षीरघृततैलतोयरसप्रभृतयो बादराः। स्थूलोपलम्भा अपि छेत्तुं भेत्तुमादातुमशक्या छायाऽऽतपतमोज्योत्स्नादयो बादरसूक्ष्माः। सूक्ष्मत्वेऽपि स्थूलोपलम्भाः स्पर्शरसगन्धवर्णशब्दाः सूक्ष्मबादराः। सूक्ष्मत्वेऽपि ये ज्ञानावरणादिकर्मवर्गणायोग्या इन्द्रियज्ञानाविषयास्ते सूक्ष्माः। ये चात्यन्तसूक्ष्माः कर्मवर्गणाभ्योऽधः द्व्यणुकस्कन्धपर्यन्ताः ते सूक्ष्मसूक्ष्माः। एते सर्वेऽपि पुद्गला पूरणगलनस्वभावाः स्पर्शरसगन्धवर्णवन्तः मूर्ताः। इन्द्रियविषयाः स्पर्शरसगन्धवर्णशब्दाः, द्रव्येन्द्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि, कायाः औदारिकवैक्रियकाहारकतैजसकार्मणानि, द्रव्यमनः, द्रव्यकर्माणि ज्ञानावरणादीनि, नोकर्माणि, एतत्सर्वमपि पुद्गलद्रव्यम्।

धर्मो हि स्पर्शरसगन्धवर्णानामत्यन्ताभावादमूर्तस्वभावः। तत एव चाशब्दः। सकललोकाकाशमभिव्याप्य तिलेषु तैलवत्स्थितः। अयुतसिद्धप्रदेशत्वात् स्पृष्टः। स्वभावादेव सर्वतो विस्तृतत्वात्पृथुलः। निश्चयनयेनैकप्रदेशोऽपि व्यवहारनयेनासंख्यातप्रदेशः। गतिक्रियायुक्तानां जीवानां पुद्गलानां च गतौ तथैव सहायकभूतोऽयं यथा जलं मत्स्यानां गमनानुग्रहकरं भवति। जलं हि स्वयमगच्छदगमयच्च स्वयमेव गच्छतां मत्स्यानामुदासीनाऽविनाभूतसहायकारणमात्रत्वेन गमनमनुगृह्णाति। धर्मोऽपि स्वयमगच्छन् अगमयंश्च स्वयमेव गच्छतां जीवपुद्गलानामुदासीनाऽविनाभूतसहायकारणमात्रत्वेन गमननुगृह्णाति।

यथा धर्मो निरूपितस्तथाऽधर्मोऽपि ज्ञातव्यः। अयं तु विशेषः। स गतिक्रियायुक्तानामुदकवत्कारणभूतः। एषः पुनः स्थितिक्रियायुक्तानां पृथिवीवत्कारणभूतः। यथा पृथिवी स्वयं पूर्वमेव तिष्ठन्ती परमस्थापयन्ती च स्वयमेव तिष्ठतामश्वादीनामुदासीनाऽविनाभूतसहायकारणमात्रत्वेन स्थितिमनुगृह्णाति, तथाऽधर्मोऽपि। एतयोरतीन्द्रिययोरपि लोकालोकविभागान्यथानुपपत्त्यनुमानेन सिद्धिः।

षड्द्रव्यात्मके लोके सर्वेषां शेषपञ्चद्रव्याणां यत्समस्तावकाशं ददाति तदाकाशद्रव्यं ज्ञेयम्। तद्द्विविधम्—लोकाकाशम्, अलोकाकाशं च। यत्र जीवादिपञ्चद्रव्याणि अवलोक्यन्ते तल्लोकाकाशम्। ततो बहिः समन्ततः सर्वमाकाशमलोकाकाशमिति। इदममूर्त्तमिन्द्रियाग्राह्यम्। अवकाशदानान्यथानुपपत्त्या चानुमीयते छद्मस्थैः सर्वज्ञैस्तु प्रत्यक्षतः संविज्ञायते।

वर्तना-परिणाम-क्रिया-परत्वापरत्वहेतुः कालः। वर्तनाहेतुर्निश्चयकालः परिणामादिहेतुश्च व्यवहारकालः। क्रमानुपाती समयाख्यः पर्यायो व्यवहारकालः। तदाधारभूतं द्रव्यं निश्चयकालः। तत्र व्यवहारकालो निश्चयकालपर्यायरूपोऽपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जीवपुद्गलानां परिणामेनावच्छिद्यमानत्वात्तत्परिणामभव इत्युपगीयते। जीवपुद्गलानां परिणामस्तु बहिरङ्गनिमित्तभूतद्रव्यकालसद्भावे सति संभूतत्वाद्-द्रव्यकालसंभूत इत्युच्यते। अत्रेदं तात्पर्यम्। व्यवहारकालो जीवपुद्गलपरिणामेन निश्चीयते, निश्चयकालस्तु तत्परिणामान्यथानुपपत्त्येति सम्प्रधार्थम्। कालस्यैकप्रदेशमात्रत्वाद्बहुप्रदेशत्वाभावादस्तिकायत्वं नास्ति। शेषद्रव्याणां तु बहुप्रदेशत्वादस्तिकायत्वमस्ति।

कर्मागमनद्वारमास्रवः। मिथ्यात्वाविरतिप्रमादकषाययोगद्वारैः कर्माणि आस्रवन्ति, तस्मात्तेषामास्रवत्वं निरूपितम्। अयं भावास्रव-द्रव्यास्रवभेदात् द्वेधा वर्तते। येन भावेन कर्मास्रवति सो भावो भावास्रवः। कर्मागमनं च द्रव्यास्रवः।

आस्रवनिरोधः संवरः। स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैर्भवति। सम्यग्योगनिग्रहो गुप्तिः। सा त्रिधा--कायगुप्तिः वाग्गुप्तिः मनोगुप्तिश्च। सम्यक्प्रवृत्तिः समितिः। सा पञ्चधा—ईर्याभाषैषणानिक्षेपोत्सर्गभेदात्। उत्तमक्षमादिलक्षणो धर्मः। स दशधा--क्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिंचन्यब्रह्मचर्यभेदात्। संसार-शरीर-भोगस्वभावानुचिन्तनमनुप्रेक्षा। सा द्वादशधा---अनित्याशरणसंसारैकत्वान्यत्वाशुच्यास्रवसंवरनिर्जरालोकबोधिदुर्लभधर्म--भेदात्। क्षुधादिबाधासहनं परीषहजयः। तस्य द्वाविंशतिभेदाः—क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याक्रोशवधयाचनाऽलाभरोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाऽज्ञानाऽदर्शनानि। संसारकारणनिवृत्तिं प्रत्यागूर्णस्य सम्यग्ज्ञानवतः कर्मादाननिमित्तक्रियोपरमः सम्यक्चारित्रम्। अत्र चारित्रपदेन तदेव ग्राह्यम्। तत्पञ्चविधम्—सामायिकच्छेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्पराययथाख्यातभेदात्। यस्य योगिनो रागरूपो द्वेषरूपो मोहरूपो वा समग्रपरद्रव्येषु न हि विद्यते भावः तस्य निर्विकारचैतन्यत्वात्समसुखदुःखस्य भिक्षोः शुभमशुभञ्च कर्म नास्रवति। किन्तु संव्रियत एव। तदत्र मोहरागद्वेषपरिणाणामनिरोधो भावसंवरः। तन्निमित्तः शुभाशुभकर्मपरिणामनिरोधो योगद्वारेण प्रविशतां पुद्गलानां द्रव्यसंवरः।

सञ्चितानां पुरातनकर्मणामेकदेशसंक्षयो निर्जरा। संवरशुद्धोपयोगयुक्तस्य योगिनस्तपोभिरनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशादिभेदाद्बहिरङ्गैः प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानभेदादन्तरङ्गैश्च बहुविधैर्बहूनां कर्मणां निर्जरणं भवति सा निर्जरा। तदत्र कर्मवीर्यशातनसमर्थो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बहिरङ्गान्तरङ्गतपोभिर्वृंहितः शुद्धोपयोगो भावनिर्जरा । तदनुभावनीरसीभूताना-मेकदेशसंक्षयः समुपात्तकर्मपुद्गलानां द्रव्यनिर्जरा ।

जीवकर्मप्रदेशयोरन्योन्यसंश्लेषो बन्धः । यदि जीवो रक्तः सन् कर्मोदय-प्रभावत्वादुदीर्णं शुभमशुभं वा भावं करोति, तदा स आत्मा तेन निमित्तभूतेन भावेन पुद्गलकर्मणा विविधेन बद्धो भवति । तदत्र मोहरागद्वेषरूपः शुभोऽशुभो वा परिणामो जीवस्य भावबन्धः । तन्निमित्तेन शुभाशुभकर्मत्वपरिणतानां जीवेन सहान्योन्यमूर्च्छनं पुद्गलानां द्रव्यबन्धः । द्रव्यबन्धश्चतुर्विधः प्रकृतिप्रदेशस्थित्यनु-भागभेदात् । प्रकृतिबन्धोऽपि द्विविधः—मूलोत्तरप्रकृतिभेदात् । तत्र मूलप्रकृति-बन्धः अष्टविकल्पः—ज्ञानावरणदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायभेदात् । उत्तरप्रकृतिबन्धोऽष्टचत्वारिंशदुत्तरशतविकल्पो मतिज्ञानावरणादिभेदात् । सर्वतो योगविशेषात्सूक्ष्मैकक्षेत्रावगाहस्थिता अनन्तानन्तकर्मप्रदेशाः प्रदेशबन्धः । स्थिति-द्विविधा जघन्या उत्कृष्टा च । विपाकोऽनुभवः ।

बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः । स द्विविधो भावमोक्षो द्रव्यमोक्षश्च । सम्यक्दर्शन-ज्ञान-चारित्ररूपः परिणामो जीवस्य भावमोक्षः । द्रव्य-कर्मणां विप्रयोगो द्रव्यमोक्षः । बन्धहेतूनामभावे भवति ज्ञानिनः कर्माभावः । कर्माभावे च सति भवति सार्वज्ञ्यम्, सर्वदर्शित्वम्, अव्याबाधमिन्द्रियव्यापारातीत-मनन्तसुखञ्च । स एष जीवन्मुक्तिनामा भावमोक्षः । अस्मिन्खलु भावमोक्षे सति भगवतः केवलिनः प्रसिद्धपरमसंवरस्योत्तरकर्मसन्ततौ निरुद्धायां परमनिर्जरा-कारणध्यानप्रसिद्धौ सत्यां पूर्वकर्मसन्ततौ कदाचित्स्वभावेनैव कदाचित्समुद्घात-विधानेनायुःकर्मसमभूतस्थित्यामायुःकर्मानुसारेणैव निर्जीर्यमाणायामपुनर्भवाय तद्भवत्यागसमये वेदनीयायुर्नामगोत्ररूपाणां जीवेन सहात्यन्तविश्लेषः कर्मपुद्गलानां द्रव्यमोक्षः । एवं तत्त्वार्थेऽवगते सम्यग्दर्शनमवगतं स्यात् ।

तेषामेव तत्त्वार्थानां याथार्थ्येनावगमः सम्यग्ज्ञानम् ।

'अन्यूनमनतिरिक्तं याथातथ्यं विना च विपरीतात् ।
निस्सन्देहं वेद यदाहुस्तज्ज्ञानमागमिनः ॥'

तत्पञ्चविधम्—मतिज्ञानम्, श्रुतज्ञानम्, अवधिज्ञानम्, मनःपर्ययज्ञानम्, केवलज्ञानञ्च । इन्द्रियानिन्द्रियनिमित्तं मतिज्ञानम् । तदपि बहुविधम्, अवग्रहादि-भेदात् । मतिपूर्वं श्रुतम् । तद्द्विविधम्, अङ्गबाह्याङ्गप्रविष्टभेदात् । अङ्गबाह्यं चतुर्दशविधम्, सामायिकादिभेदात् । अङ्गप्रविष्टं च द्वादशविधम्, आचाराङ्गादि-भेदात् । इन्द्रियानिन्द्रियनिरपेक्षमात्ममात्रापेक्षं रूपिविषयमवधिज्ञानम् । तत्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षड्विधम्, अनुगाम्यननुगामिवर्धमानहीयमानावस्थितानवस्थितविकल्पात् । सप्रतिपाताप्रतिपातयोरत्रैवान्तर्भावात् । संक्षेपतस्तु त्रिविधम्—देशावधि-परमावधि-सर्वावधिभेदात् । तत्र देशावधिज्ञानं षड्विकल्पमपि सम्भवति । परमावधिज्ञानं तु संयमविशेषैकार्थसमवायि भवान्तरापेक्षयाऽननुगामि सप्रतिपातं च प्रत्येयम् । तद्भवापेक्षया च तदनुगाम्येव नाननुगामि । वर्धमानमेव न हीयमानम् । अवस्थितमेव नानवस्थितम् । अप्रतिपातमेव न सप्रतिपातम्, तथाविधविशुद्धिनिबन्धनत्वात् । एतेन सर्वावधिज्ञानं व्याख्यातम् । केवलं तद्वर्धमानमपि न भवति, परमप्रकर्षप्राप्तत्वात्, सकलावधिज्ञानावरणवीर्यान्तिरायक्षयोपशमवशात्प्रसूतत्वात् । अतिसंक्षेपतस्तु द्विविधमवधिज्ञानं भवप्रत्ययं गुणप्रत्ययं च । तदनन्तभागविषयं विकलमतीन्द्रियप्रत्यक्षं मनःपर्ययज्ञानम् । तद्द्वेधा, ऋजु-विपुलमतिविकल्पात् । तत्रर्जुमतिमनःपर्ययज्ञानं ऋजुस्पष्टवाक्कायमनस्कृतार्थस्य परमनोगतस्य परिच्छेदकत्वात् त्रिविधम् । विपुलमतिमनःपर्ययज्ञानं तु ऋजु-अऋजु-स्पष्टास्पष्टवाक्कायमनस्कृतार्थस्य परमनोगतस्य स्फुटतरमवबोधकत्वात् षट्प्रकारम् । केवलज्ञानं सकलमतीन्द्रियप्रत्यक्षं सूक्ष्मान्तरितदूरार्थविषयम् । तदसहायमेकमेव च, सकलमोहक्षयात्सकलज्ञानावरणवीर्यान्तिरायक्षयाच्च समुद्भूतत्वात्, सकलवैशद्यसद्भावात्, सकलविषयत्वाच्च । एवं सम्यग्ज्ञानं निरूपितम् ।

दर्शनमोहनिराकृते सम्यग्दृष्टिर्भवन् प्राप्ततत्त्वार्थावगमः सत्पुरुषः रागद्वेषपरिहारार्थं सम्यक्चारित्रमुपयाति । तच्च हिंसादिपञ्चपापानां विरतिरूपम् । एतद् द्विविधम्, विकलं सकलं च । विकलं चारित्रं परिग्रहवतां गृहस्थानाम् । सकलं च चारित्रं निर्ग्रन्थानां मुनीनां भवति । द्विविधमप्येतच्चारित्रं पूर्वं निरूपितम् ।

एवं भव्यो जीवः सम्यग्दर्शन-ज्ञान-चारित्रत्रयात्मकं मोक्षमार्गमधिगम्य संसारसागरं तरति, अनन्तकालं यावच्चाजरमरुजमक्षयमव्याबाधं विशोकमभयमशङ्कं सीमातीतसुखविद्यानिधानं शिवं भजति । ज्ञानदर्शनचारित्रात्मिकायां त्रिवेणीधारायां सम्यक् स्नात्वैवात्मानन्दोऽनुभूयते भव्यैः । सम्यक्त्वं विना ज्ञानं ज्ञानं विना च चारित्रं न साफल्यं लभते । तत्त्रयमेव जन्मसन्ततिच्छेदकारणमिति निश्चेयम् ।

इदमत्र तात्पर्यम्

सृष्टि-प्रवाहोऽनादिरनन्तश्च । पुराप्यासीद् इदानीमप्यस्ति, भविष्यति चाग्रेऽपि । नास्त्यस्य कोऽपि रचयिता । असत्-पदार्थो न कदापि सम्भवति, न च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सतः पदार्थस्य कदापि विनाशो जायते। संसारोऽयम् ईश्वरविरचितस्तदा त्वसद्द्रव्यत्वात् नास्योत्पत्तिः सम्भाव्यते। आसीद् यदि लोकस्तर्हि तस्योत्पादकत्वेन परमात्मा न स्वीकर्तुं शक्यते। 'एकोऽहं बहु स्यामः' इत्यादिभिः श्रुतिभिर्भगवतो यत् कर्तृत्वं साध्यते, तदपि तुच्छम्। ईश्वरे इच्छायाः सद्भावप्रदर्शनं तस्यानीश्वरतां प्रकटयति। परमात्मपदे प्राप्ते सति कामनायाः सर्वथात्यन्ताभावो भवति। रागद्वेषं विनाभिलाषा नोत्पद्यते। यत्र च रागद्वेषस्तत्र कथं सर्वज्ञत्वम् ईश्वरत्वं वा मन्तव्यम्।

ईश्वरश्चेद् दयालुः शक्तिमांश्च, तदा तेन कथं दुःखमयः संसारः प्रवर्तितः समभावभूषितेन प्रभुणा कश्चित् सुखी, कश्चिद् दुःखी, कश्चिद् धनी, कश्चित् निर्धनः, किमर्थं विहितः? कथ्यते यत् प्राणी स्वकर्मानुसारेण सुखदुःखे अनुभवति। यो यादृशं कर्म करोति, ईश्वरस्तस्मै तादृग्विधं फलं प्रददाति। नास्त्यत्र भगवतो दोषः। तत्रोच्यते—जीवः स्वकर्मानुसारं सुखदुखे प्राप्नोति चेत्, तर्हि कर्मणामेव फलप्रदायकत्वं संसिद्धम्, न तु परमात्मनः। यः कर्म करोति स एव भुङ्क्ते फलम्। नास्त्यत्र जगदीशस्य स्थानलेशोऽपि।

जडचेतनयोर्विविधः परिणाम एव संसारः, सम्भवंत्यनयोर्बहवो विकाराः। चेतनं द्रव्यम् अनादिकालाद् एवास्ते कर्मबद्धम्। अतस्तत् स्वकर्मानुसारेण विविधं रूपं धारयति मुहुर्मुहुः। नानाप्रकारकं सुखःदुखं चानुभवति। द्रव्यापेक्षया तत् शाश्वतं नित्यं च पर्यायस्य चापेक्षया त्वशाश्वतम् अनित्यञ्च। कस्यचिदपि पदार्थस्य मूलोच्छेदो न भवति। सर्वे पदार्थाः नापि सर्वदा एकस्मिन्नेव रूपे समवतिष्ठन्ते प्रत्युत प्रतिक्षणं परिवर्तनशीलतां भजन्ति ते। अतस्तेषाम् अनित्यत्वमप्यविरुद्धम्। समग्रं विश्वं नित्यानित्यञ्चेत्युभयरूपम्।

परिक्षीण-सकल-कर्मा एव परमात्मा सिद्धान्तेनानेन यस्य जीवस्य सर्वाणि कर्माणि समूलतया नष्टानि जातानि स एवास्तीश्वरः। कर्मणाम् आवरणे विनष्टे सत्ययमात्मा सर्वज्ञः सर्वदर्शी च भूत्वा स्वकीये शुद्ध-बुद्ध-स्वरूपे सन्तिष्ठते। आत्मनः शुद्धस्वरूपत्वमेवेश्वरत्वं निगद्यते। प्रत्येकमात्मा स्वकीयेन पुरुषार्थेन कर्मबन्धनं छित्वा विमुक्तो भवति। मुक्तात्मा एवास्ति परमात्मा। यः कर्माणि कुरुते स एव तत्फलस्य भोक्ता। कर्मानुसारेणैव मनुष्यस्य बुद्धिः परिणमति। सर्वदा इच्छायाः भावेऽभावेऽपि कर्मणां फलभोगो भोक्तव्य एवास्ति। जीवः कर्म-करणे स्वाधीनः किन्तु स्वकृत-कर्मफलभोगे पराधीनः। प्राणी स्वयमेव स्वकीयस्य भाग्यस्यास्ति निर्माता। सः स्वकीयेन पुरुषार्थेन विकासस्य परमरूपं परमात्मपदं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राप्तुं प्रभवति। कर्मवादः शिक्षयति—भो जीव! त्वदीयम् उत्थानं, पतनं च त्वदधीनमेवास्ते। त्वं स्वयमेव स्वकीयस्य जीवनस्य स्रष्टासि। नास्त्यन्यः कोऽपि तव पतनोत्थानयोः समर्थः। पराबलम्बनं त्यज। भज स्वकीये पुरुषार्थे दृढं विश्वासम्। अयमेवोन्नतेर्मूलमन्त्रः; सफलता-विफलता-सुख-दुःख-सम्पत्ति-विपत्ति-प्रभृतीनां च मूलाधारः। सञ्चितकर्माण्येवाशुभकर्मणां समुदये सङ्कटानि बाधाश्च सम्भवन्ति। तस्मिन् समये शान्तिभावेनैव तेषां सहनम् अशुभकर्म-विनाशनहेतुः शुभकर्मणां च समुदये तानि शुभफलानि भवन्ति। अतोऽनासक्तबुद्ध्यैव भोगः कर्त्तव्यस्तेषाम्। शुभकर्माणां फलोदये न हर्षोन्मत्तैः अशुभकर्मफलोदये नाधीरैश्च भाव्यं विवेकशीलैः।

सर्वदैव कर्म-प्रभाव-समक्षं प्रवाते गिरिभिरिव सर्वैः निष्कम्पैरेव स्थेयम्।

कर्मवादे विश्वासं कुर्वन्नेव जीवोऽन्यान्यजीवानां दोषं न ब्रवीति। स्वकर्मणा-मेव दोषं सर्वत्र मन्यतेऽसौ। स कर्मवादः प्राणिनः स्वातंत्र्यं प्रकटयति। अयमेव प्रेरयति प्रकटयितुम् आत्मनः परमशक्तिम्, अध्यात्मशिक्षां च।

स्याद्वादो जैनसिद्धान्तस्य मौलिकं विवेचनम्। सिद्धान्तोऽयं विशुद्धवैज्ञानिकः। प्रत्येकस्मिन् पदार्थेऽनन्तधर्माः विराजन्ते। वस्तुनो विभिन्नगुणानां विभिन्नदृष्टिबिन्दु-भिरवलोकनम् एव तस्य वास्तविकं ज्ञानम् नान्यथा। अतः पदार्थेषु विद्यमानानां विविधधर्माणां सापेक्षतया स्वीकार एव स्याद्वादः। यथैक एव पुरुषो भिन्नभिन्न-सम्बन्धिनां कृते कस्यचित् पिता, कस्यचित् पुत्रः कस्यचिद् भ्राता, कस्यचित् मातुलः। एवम् एकस्मिन्नेव वस्तुनि सापेक्षभेदेन अनेकेषां धर्माणां सत्ता प्रमाणिता भवति। धर्मान्तराणाम् अवहेलनया एकस्यैव च धर्मस्य स्वीकारेण न कस्यापि वस्तुनः सम्यग्ज्ञानं कर्तुं शक्यते। अमुकदृष्टिबिन्दुना पदार्थो नित्यः, अपरेण दृष्टिकोणे-नास्त्यनित्योऽपि। नित्यानित्यत्वमेव पदार्थस्य वास्तविकं स्वरूपम्। नास्ति कोऽपि पदार्थः एकान्तनित्यः, एकान्तोऽनित्यश्च। अयमेव पारिभाषिकशब्देन नयवादः सङ्कीर्त्यते। सिद्धान्तोऽयं विश्वस्य सर्वान् धर्मान् सत्यापयति। सत्यं सर्वत्राप्येकं व्यापकम् अखण्डं च सर्वेऽपि धर्मा दिनकर-किरणसमानाः। एक एव किरणो नास्ति रविरूपः। किरणानां समूहः एव सूर्यो व्यपदिश्यते अतः सकलधर्मसमन्वय एवास्ति। समन्वयं विना जीवः कर्मबन्धनाद् विमुक्तो न भवति। वेदान्ते माया-रूपेण, सांख्ये प्रकृतिनाम्ना, वैशेषिके चादृष्टरूपेण प्रतिपादितं तत्त्वं, जैनदर्शने कर्मरूपेण समभिधीयते। पुद्गलद्रव्येष्वनेकभेदाः विद्यन्ते। तस्मिन् भेदवर्गे द्रव्यरूपे कर्मद्रव्यमपि सम्मिलितम्। पुद्गलमिव कर्मद्रव्यं चापि सूक्ष्मरूपतया लोके व्याप्तमस्ति। द्रव्यतया जीव-द्रव्ये कर्मद्रव्यस्य योगः स्वाभाविकः। कर्म-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रव्यम् आत्मनि विकृतिं जनयति। तस्याऽऽवारणरूपतां च प्राप्नोति। इयमेवाविद्या। अस्यामवस्थायाम् आत्मनः स्वकर्तृत्वं नश्यति। कर्मबन्धनेन चासौ पर्यावृतो भवति। मुक्तिप्राप्त्यर्थं पूर्वोक्तरत्नत्रयमेव सेवनीयम्। अशुभकर्मभ्यो निवृत्य सत्कर्मसु पौनःपुन्येन प्रवृत्तिरेव चारित्रम्।

अनेके भव्यजीवाः प्रतिवर्षं मोक्षं लभन्ते। अतस्तेषामेवाऽऽदर्शोऽनुकरणीयः। प्रत्येकं मानवो घाति-कर्मणां विनाशं विधाय सर्वज्ञो भवति नान्यथा। हिंसा-दोषदूषितैर्यज्ञैः कदाचिदपि परमार्थसिद्धिर्न जायते। परिपूर्णाहिंसाव्रतपालनेनैवास्ति निर्वाणं सम्भवम्। बहवो जीवा अनेनैव नियमेन भव-सागरमुत्तीर्य भगवद्रूपतां प्राप्ताः। तत्र सर्वेषां कृते कर्मविजेतॄणां जीवानां सिद्धालयस्य द्वारं सर्वदा समुद्घाटितम्। तत्रास्ति समेषां समानोऽधिकारः। अनन्तकालपर्यन्तं मनुष्यः सकल-स्वातन्त्र्यं लब्ध्वामृतमश्नुते तत्र। नास्ति कोऽपि स्वामी, न दासः, नेन्द्रियाणि, न श्वास-प्रक्रिया, न च कदापि ग्रीष्म-शिशिर-प्रभृतीनि द्वन्द्वानि परिपीडयन्ति। न कोऽपि रोदिति न च हसति कश्चित्। सततमक्षयं निर्बाधञ्च सुखमनुभवन्ति सर्वे। न पुनर्भवसागरे निष्पतन्ति ते।

यो यथा कर्म कुरुते तथैव गतिं प्राप्नोति। यथैव बीज-वपनं तथैव फलोपलब्धिः। यथा नीरूपगगने सकलानि द्रव्याणि समाविशन्ति तथैव निराकारे तस्मिन् आत्मनि समग्रद्रव्याणि भवन्ति समाविष्टानि।

संसारोऽयं जीवाजीवभेदेन द्विविधः। प्रत्येकं सद्रूपमभद्रूपञ्चेति। यथा कश्चिद् पुराण-परिधानानि विहाय नूतनानि परिदधाति तथैव जीवः शरीरमेकं मुक्त्वा देहान्तरं भजति। केवलं तनुत एव मरणं भवति न त्वात्मनः; इत्थमेव सर्वथा श्रद्धानं विधेयं मनोषिभिः।

अहिंसा नाम परमो धर्म एव पालनीयः सुमतिभिः। अहिंसा सा मन्दाकिनी-निर्मल-धारा या समवगाहनशीलानां मनुष्याणां व्यपनोदयति सन्तापम्। अहिंसा सा पीयूषवर्तिका या नेत्रान्धतां नाशयति, निर्मूलयति च भव-व्याधिम्। अहिंसा सा जलधर-वृष्टिः या दुःख-दावानलं शमयति प्राणिनाम्। अहिंसा सा जननी जगदम्बा या परित्रायते जगतो निखिलजीवनिवहान्। यस्याः समाराधनेन सर्वे जन्तवो निर्भयाः सुखिनश्च भवन्ति सा भगवती त्वहिंसैव। अहिंसा-व्रत-पालनेन सकलोऽपि जीवलोकः स्वकीयं परिपूर्णं प्रभवति कर्तुं विकासम्। आत्मशक्तेर्जागरणार्थम् अहिंसैव मुख्याऽऽधारः। यस्मिन्नात्मनि त्वहिंसाया विश्व-बन्धुत्वस्य च यादृशी भावना तादृश्येव तस्याऽऽध्यात्मिकोन्नतिः। अहिंसामन्तरेण न कदापि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शान्तिः सम्भाव्यते भुवनेऽस्मिन् । अहिंसायाः दिव्यभावनया एव संसारस्य विकट-समस्यानां समाधानं विधातुं शक्यते नोपायान्तरैः ।

समग्र-द्रव्याणि नित्यानि संसारोऽपि नित्योऽनादिश्च । नास्त्यस्य कश्चिदपि स्रष्टा, संहारकर्ता च । जीवः सर्वदा स्वकर्मानुसारेण परिभ्रमति सर्वत्र न कस्याप्यन्यस्य वा प्रेरणया । कदाचित् स्वर्गीयशरीरम्, कदाचिन्नरकक्लेशम्, कदाचित् कृमि-कीट-योनिम्, कदाचित्तु हिंस्रक-जन्तु-सम्भवं समुपलभ्य सुख-दुःखे अनुभवति सः ।

अनेकानेकयोनिभ्यो मुक्तैर्मानवपर्यायं प्राप्याऽपि स्पन्दनं विनैव नियन्त्रितेनेव, पापग्रस्तेनेव, भूताविष्टेनेव शरीरेण कारागारकल्पे मातुरुदरे नव मासाः याप्यन्ते । जन्म लब्ध्वा सः दीनश्चेद् जातस्तर्हि समग्रजीवनम् अभिशप्तमिव प्रायश्चित्तरतमिवात्यन्तमुपेक्षितं भवति समाजे । पर्याप्तमैश्वर्यं प्राप्यते चेत् तदाऽपि तृष्णया, चौरभयेन, करपीडनेन, अन्याभिश्च भीतिभिरापत्तिग्रस्तं जायते जीवनम् । कदाचित् कान्ताम् अन्तरेण स्वकीयं यौवनं निष्फलं मन्यते, कदाचिद् रमणीसुखं लब्ध्वापि पुत्रं विनान्धकारग्रस्तमिव, सौन्दर्यविहीनमिव निस्सारं च मन्यते स्वात्मानम् । निरन्तररुग्णतया कीटानुविद्धं पादपमिव व्यथितं शरीरं न विकसितुं प्रभवति । इष्टानां वियोगैरनिष्टानां संयोगैश्च व्याहतं चेतः कर्त्तव्याकर्त्तव्यमूढः संजायते । सम्राजः, श्रेष्ठिनो, मन्त्रिगणाश्चाऽपि शत्रुभयेन सर्वदा चिन्ताग्रस्तचेतसो निवसन्ति, न कदापि स्वच्छन्दवातावरणसुखमनुभवन्ति ते ।

स्वर्गसुखप्राप्तिविषयेऽपि जनानां महाप्रमादो दृश्यते । तत्राऽपि परस्परं प्रतिस्पर्धिता, पुनश्च क्षीणे पुण्ये मर्त्यलोकपतनमवश्यंभावीति विदितमेव सर्वेषाम् । किं बहुना विकरालईर्ष्यानलस्तत्राऽपि मनःशान्तिं भस्मसात् करोति । संक्षेपतो नाऽस्मिन् भुवने कुत्रापि सुखलेशोऽपीति ध्रुवम् ।

एवं स्वात्मानं विस्मृत्य जीवश्चतसृषु गतिषु चतुरशीतिलक्षयोनिषु च दुष्टः सन् विभ्रमति । मणिं विहाय काचमादातुं प्रवृत्तो मूर्ख इव परमात्मसुखं तिरस्कृत्य कषायविषयेषु रमते । यस्यां योनौ जन्म लब्धं तस्याम् आसक्तो जातः । नाद्यावधि विचारितं यत् किमर्थं मया एतासु योनिषु मुहुर्मुहुर्भ्रमणं विहितम् । केन कारणेन च चतस्रो गतयोऽभिमानिताः । कश्च तावदुपायोऽस्ति एताभ्य स्वात्मानं विमोचयितुम् । किमिदानीं चास्माकं कर्त्तव्यम् ? मुहूर्त्तमात्रमपि स्थित्वेकान्ते न चिन्तितं—कोऽहं, कुतः समागतोऽस्मि किं मे स्वरूपम्, किंविधश्चास्मि सञ्जातः ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देवः, नारकीयः, पशुः, नरो वा स्यात्, सर्वेषु जीवेषु स आत्मा समानरूपेणावतिष्ठते। यादृश आत्मा भिक्षुषु, तादृश एव राजकुमारेषु। यादृशः पिपीलिकासु, तादृश एव गजेषु। यादृशश्च महोच्चैर्वर्गेषु तादृश एव निम्नवर्गेषु। अम्भसः पद्मपत्रमिवात्मा सर्वथा शरीरात् पृथगेव विवर्त्तते। शरीरं परिवर्त्तनशीलम्, आत्मा सर्वदैवैकरूपः। शरीरं नश्वरम्, आत्माऽविनश्वरः। शरीरं जडम्, आत्मा तु चेतनः। शरीरं तु गहनाज्ञानान्धकाररूपम्, भास्वरमक्लेद्यमच्छेद्यं चास्ति स्वरूपमात्मनः।

राजकुमाराणां, पशूनां, भिक्षूणां वा सर्वेषां जीवानां मरणकाले शरीरमत्रैव विनश्यति, केवलमात्मैवावतिष्ठते। यदि स्वकीयं शरीरमपि न शाश्वतिकं साहाय्यं प्रददाति तर्हि धनं किं स्वकीयं भविष्यति? नैवम्। तत्तु धरायामेव निखातं तिष्ठति। तथापि तस्मिन्नेव धने जनानामासक्तिर्दृश्यते। ममतायाः प्रभावेन जडचेतनयोरन्धकारप्रकाशयोः, सदसतोः, नित्यानित्ययोः, बन्धमोक्षयोश्चान्तरं नाभिजानन्ति ते।

अतः परित्यजेमां भ्रान्तधारणाम्। अज्ञो मा भूः। स्वात्मनि परमात्मानमनुभव। निजपरत्व-शीतताप-सुखदुःखादिकं द्वन्द्वभावं जहि, जानीहि च स्वात्मनो विमलं रूपम्। त्वय्यपि ज्ञानं विद्यते। परिचिनुहि हृदयम्। मोहादिकं ज्ञानावरणं चेतसः छिन्धि। भिन्धि च ममताद्वारम्। मिथ्यात्वं परित्यज। इदमेव जीवान् विकलीकरोति।

बद्धजीवस्य मुक्तये एक एवोपायः। तच्च तपः। तपोऽपि संयममूलकम्। दशलक्षणको धर्मश्च सर्वैर्मान्यः। ज्ञानेनाज्ञानेन वा क्षणे-क्षणेऽपराधस्य प्रवृत्तिः स्वाभाविकी, अपराधोऽपि द्विविधः—स्वयंकृतः, परकृतश्च। स्वयंकृतानामपराधानां मार्जनार्थं क्षमायाच्ञा, परेभ्योऽपराधेभ्यश्च क्षमादानं व्यवहर्तव्यम्।

धर्मस्य विनयो मूलम्। मनसि कोमलता व्यवहारे च विनम्रता प्रत्येकमानवस्य धर्मः। मदेभ्यः सततमात्मपरिहारश्चैते मार्दवधर्ममूलकाः।

विचारे, वचने, व्यवहारे च सर्वदैव सरलैर्भाव्यं सर्वैः। एतेन पारस्परिको विश्वासोऽभिवर्धते।

कीर्ति-प्रतिष्ठा-धनादिभ्यो वस्तुभ्यः शौचधर्मोऽङ्गीकर्तव्यः।

सत्यमेवेश्वरः। सत्यप्रकाशवर्त्तित्वमेव मानवता। लब्धसत्यबोधः एव प्राप्तसर्वस्वः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मनोवृत्तीनां, कामनानां च नियन्त्रणमेवास्ति संयमो धर्मः ।
बहिर्मुखान्तर्मुखेन्द्रियाणां विषयाणामात्मशक्त्या वशीकरणं तु सत्यं तपः ।
अप्राप्तवस्तूनामनिच्छा प्राप्तवस्तुभ्यश्च विमुखतैव त्यागोऽभिधीयते ।
सर्वत्रापि ममत्वाभावोऽकिञ्चनता चावलम्बनीया । ममतैवास्ति दुःखमूलम् ।
सर्वविधेभ्यः इन्द्रियग्राह्येभ्यो विषयेभ्यो मुक्तो भूत्वाऽऽत्मसमाधानं ब्रह्मचर्यम् ।
एतेन दशलक्षणेन धर्मेणैव जीवानां शाश्वतिकं कल्याणं सम्पादयितुं शक्यते ।

तप एवास्ति जीवनस्य साधना । त्यागिनस्त्यागाय तपस्तप्त्वात्मानं परमात्मरूपे परिवर्त्तयन्ति । संसारेऽस्मिन् यावन्तो गुणास्तत्त्वानि च तानि सर्वाणि जीवे विद्यमानानि सन्ति किन्तु सुषुप्तानि । येनात्मानं जागरितं कृत्वा परमात्मनः स्थितिरुपलब्धा, नास्ति तस्य किमप्यदर्शनीयम् ।

आत्मा प्रत्येकस्मिन् शरीरे वर्त्तते किन्तु तस्य शरीरात् पृथगस्तित्वमस्ति न चापृथक् । देहेऽस्मिन् सत्ता चिन्मयी, न मृण्मयी । अपरे चार्वाकप्रभृतयः शरीरात् पृथगात्मानं न स्वीकुर्वन्ति । गात्रेण सार्धमेव तस्य विलयोदयौ मन्यन्ते । यथाऽप्राप्तद्राक्षाफलो जम्बूको द्राक्षाफलानि निन्दति, तथैवानात्मज्ञः आत्मनः सत्तां न स्वीकरोति । न च कश्चिद् ध्यानवेद्यमात्मानं प्रदर्शयितुं समर्थः । अभ्यासयोगेनैवात्मनः समुपलब्धिर्जायते । ध्यानं विना ध्येयं सर्वदाऽनुपलभ्यम् । जिना एव एतंविधं तत्त्वं विजानन्ति । नाज्ञाः जनाः । तीर्थङ्करा एव च तदुपदिशन्ति । तीर्थङ्करेषु काश्चिद् विशेषताः श्रूयन्ते । ते धर्मशासनस्य शासकाः, मार्गदर्शकाश्च वर्तन्ते । वसन्ति तेषां शासने सहस्रशो जिनाः । जीवनकाले जिनास्तीर्थङ्कराश्चेति द्वे भूमिके । निर्वाणानन्तरं बन्धन-मुक्तिः, सिद्धावस्था चागच्छति । तस्मिन् समये केवलमात्मन एवास्तित्वम् अवशिष्यते । ज्ञान-दर्शनानन्द-शक्तीनां च भवति समानरूपतया पूर्णो विकासः । सः दीर्घ-ह्रस्व-वृत्त-त्रिकोणादि-संस्थान-रहितारूपागन्धारसास्पर्शाशब्दाशरीराजन्यासङ्गानुपमपदस्थितौ च विराजते । इदमेवास्ति परमं पदम् । इयमेव परमात्मनः स्थितिः । अस्यैव नामधेयं ब्रह्मलीनम् ।

समग्रसुखानां बीजमिव, कल्याणानां भण्डारमिव, क्रोध-लोभ-मानच्छलादीनां रोगाणामुपचार इव सकलदुरितविध्वंसकः, आत्मपतनावरोधकः, मिथ्यात्वतिमिरापहारसमर्थप्रकाशः, भवसागरनिमग्नजनावलम्बनपोतः, अनादिकर्मपाशच्छेदकश्च मोक्षः प्राप्य एव ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिवारपरतन्त्रैः, मायाबद्धैः, मुनीनां श्रेण्यां प्रवेष्टुमशक्नुवद्भिः, गृहस्थैरात्मधर्मं कठिनं ज्ञात्वा निराशैर्न भाव्यम्। ते स्वगृहेषु तिष्ठन्तोऽपि सप्तव्यसनानि परित्यज्य, मूलगुणाष्टकं च धारयित्वा, द्वादशव्रतं पालयेयुः, प्रकाशयेयुश्चात्मज्योतिः तपस्त्याग-शील-संयमैः। एतेषु गुणेषु यथा-यथा रुचिर्वर्धते तथा-तथा शान्तिसमतयोरुन्नतिर्भवति। एवमेकादशप्रतिमानां विधिवत् पालनं विधाय, जिनदीक्षां चादाय निर्ग्रन्थाख्यं श्रामण्यं धर्मं स्वीकुर्वन्तु ते।

केचन पुरुषाः स्वर्गसुखाय लुब्धाः दरीदृश्यन्ते। परं जले बुदबुदमाल्यस्येव, मेघे विद्युत्प्रकाशस्येव, स्वप्नसुखस्येव, इन्द्रजालप्रपञ्चस्येव नास्ति तस्य सुखस्य चिरस्थायित्वम्। अज्ञ एवैतादृशेषु सुखेषु सक्तो जायते न तु विवेकशीलः। तत्त्वज्ञस्तु भौतिकं स्वर्गिकं च सुखं गरलमिव, विनाशहेतुम्, मद्यमिव मदकारणम्, आत्महंसस्य बन्धनाय पञ्जरमिव, ज्ञानाम्बुजस्य तिमिरजालमिव मन्यते। तत्र गत्वाऽपि देवत्वं लब्ध्वाऽपि सुराः तपश्चर्यां कर्त्तुं पुनरपि मानवयोनिमिच्छन्ति। यतो ह्यमरपदवाच्याः अपि तेऽमरत्वविहीना एव, सज्जावन्तोऽप्यात्मना कलुषिता एव भवन्ति।

पुण्यानि पापानि वा, सर्वाणि कर्माणि, सर्वाश्च योनयः बन्धनस्य हेतुभूतानि। मोक्षं विना नास्ति कश्चिदपीह बन्धच्छेदाय हेतुः। अत एव मानवजीवनं लब्ध्वा मा प्रमादं कार्षीः, मा चाहङ्कारं विदध्याः पुण्ययोगेन सञ्चिते धने। सर्वासु योनिषु भ्रमणानन्तरं महता सौभाग्येन नरत्वमुपलभ्यते मर्त्यलोके। अतोऽस्मिन् बहुमूल्येऽवसरे भौतिकप्रपञ्चं विहाय परमार्थः साधनीयः सर्वैः। धर्माचरणेनैव मानवत्वं पशुत्वाद् भिद्यते नान्यथा। इयमेव योनिः सुकृतानां, पुण्यकर्मणां, तपश्चर्याणां मोक्षस्य चाधारभूमिः।

निगोदादागत्यात्रैव नरजन्मानि प्राप्यन्ते। पुनरपि भौतिकवादी भूत्वा केवलमामोदप्रमोदौ विधीयते चेत्तर्हि किं फलं मनुजजन्मनः। निगोदात् नरजन्म, नरलोकात् निगोदः। अतो हेतोर्नरभवं दुर्लभं ज्ञात्वा धर्माचरणं विधीयताम्। अथ धर्मस्य शरणमागत्य न ते पुनर्भ्रमणं भविष्यत्यस्मिन् लोके। धर्म एव शान्तेः करणम्, दुःखहरणम्, संसारमोक्षयोश्च सुखप्रदाता वर्तते। श्रावकधर्मरतो जनो लौकिकं सुखं लभते। मुनिधर्मपालकश्चालिङ्गति मुक्ति-वधूटीम्।

तं धर्मोपदेशं समाकर्ण्य बहवो विरक्ताः सम्पादितकल्याणाः, समुद्बुद्धसौभाग्याश्च सञ्जाताः। वारिषेणप्रभृतयो युवराजाः वैराग्यसम्पन्नाः पुण्यात्मानः महाभागाश्च समभवन्। श्रावकधर्मं गृहीत्वा तेऽभयकुमार-श्रेणिकादयोऽपि कृतकृत्या जाताः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंप्रकारेण कर्मनिवर्हणं समीचीनं धर्ममुपदिशन्नसौ सेन्द्रभूति-शिष्यमण्डलो निखिलेऽपि भुवने विजहार। तदनन्तरं विहारं परिहृत्य कृतासंख्यातलोककल्याणः, समधिगतसर्वार्थसिद्धिः समुद्धूत-सकल-कर्म-विमलान्तःकरणः, निस्सीम-ज्ञान-दर्शन-सुख-शक्तिकोऽसौ भगवान् महावीरः, बाल-तरुण-वृद्ध-महिला-मण्डल-मण्डिते, निखिल-जन-जेगीयमान-गुण-गण-गुञ्जिते, सुरपति-प्रभृति-विबुध-वृन्द-विभूषिते, प्रज्वलित-मङ्गल-प्रदीप-प्रभा-पिञ्जरिते, मृगपति-हरिण-शार्दूल-धेनु-मयूर-भुजग-कुञ्जर-सङ्कुले, शीतल-मन्द-सुरभि-समीर-समर्पित-सौरभ-रमणीये, पतत्रि-कुल-कूजित-पूजिते, समवेत-भुवन-त्रितय-जीव-निकरे पावनतम-पावामण्डपे निर्वाणं लेभे कार्तिककृष्णामावस्याया मङ्गलमयमुहूर्त्ते प्रत्यूषकाले। प्रज्वलितया दीप-मालिकया पावापुरस्य सर्वेऽपि राजमार्गाः, अट्टालिकाः, रथ्याः, पण्य-वीथयश्चत्वराणि च देदीप्यमानानि समभूवन्। नव-मङ्गल-दीप-ज्योतिषा परम-ज्योतिषस्तस्य पूजां विधाय सर्वेऽप्यात्मानं कृतकृत्यं मेनिरे। तस्मादेव दिवसादारभ्य मङ्गलमयो दीपावलिमहोत्सवः सम्पद्यतेऽद्यापि भारतेऽस्मिन्नित्योम्।

इति मङ्गलायतने वर्धमानतीर्थंकरस्य धर्मोपदेशपूर्वकं
निर्वाणप्रापणं नाम पञ्चमं सोपानम्।

समाप्तं मङ्गलायतनम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मंगलायतन

हिन्दी-सार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रथम सोपान

यह वन्दनीय भारत-भूमि मानो त्रिभुवन-लक्ष्मीकी विलास-स्थली हो, या भुवन-मन्दिरमें दमकती हुई दीपशिखा हो, या जगत्सरोवरमें खिली हुई कमलिनी हो, या विश्वपुरुषकी आत्मा हो।

इसके सन्निकट नदियोंके प्रवाह चामरोंकी भाँति दोलायमान हो रहे हैं। रत्नाकर विविध प्रकारके रत्नोंका उपहार समर्पित करनेमें दत्तचित्त है। उपधानके निकट नगपति भी प्रहरीके रूपमें विराजमान है। इससे यह सौभाग्यवती साम्राज्ञीके समान लगती है।

सम्भवतः यह सुषमादेवी ही मूर्तिमती होकर विश्राम कर रही है। हिमालय इसका रजत-किरीट है। ब्रह्मपुत्र केश-पाश, कश्मीर-प्रदेश ललाटका तिलक और पीरपञ्चाल शुभ्र दन्तावलीका स्थान ग्रहण करता है। अवगाहन करती हुई कामिनियोंके कुच-मण्डलसे चूते हुए कुङ्कुमरागसे रंजित वितस्ता नदी रसमयी अधररेखा बन चुकी है। गंगा एवं यमुना इसकी दो भुजाएँ हैं। पंजाब वक्षस्थल, देवसरोवर नाभिमण्डल, कटक कटिभाग और केरल चरण-कमलके रूपसे सुशोभित हैं। समुद्रकी लहरें मणिमय नूपुरोंकी झङ्कार करती रहती हैं।

या कोई कामधेनु ही धर्म, अर्थ, काम एवं मोक्ष देनेके लिए सन्नद्ध है। चारों दिशाएँ इसके चार चरण हैं। ब्रह्मदेश पूँछका अग्रभाग है। कश्मीरमें बहते हुए झरनोंके व्याजसे वह मुखसे रोमन्थकालिक फेन गिरा रही है। दिनकारकी किरणोंसे विभूषित हिमाद्रि-शिखर इसके शृङ्गभागकी शोभा-वृद्धि कर रहे हैं। पंजाब प्रदेश लटकता हुआ गल-कम्बल है। गङ्गा प्रभृति नदियोंका जल-प्रवाह ही इसका मधुर दुग्ध है।

यह कहीं रक्तवर्णके भवनोंकी छटाके छद्मसे नख-क्षत जनित रक्तिमाको धारण करती हुई तन्वङ्गीकी भाँति और कहीं स्वच्छ स्फटिक निर्मित मन्दिरोंकी धवलिमाके व्याजसे रतिहास करती हुई प्रमदाके समान दिखलायी देती है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रत्येक भवनके चारों ओर रमणीय उद्यान बने हुए हैं, जिनमें समुच्छलित यन्त्रधाराओंपर सूर्यकी किरणोंके सम्पर्कसे अनेक इन्द्रधनुष बनते हुए दिखायी पड़ते हैं। भ्रमरगण गुञ्जार कर रहे हैं। कोयलें कुहुक रहीं हैं। कुञ्जोंमें कामिनियोंके रतिकालमें टूटे हुए कुचहार पड़े हैं। इसी प्रकार सुन्दर सरोवरोंसे सुशोभित, समुत्तुङ्ग पर्वतमालाओंसे मण्डित एवं समृद्ध सस्यक्षेत्रोंसे परिपूर्ण यह भूमि स्वर्गसे बढ़कर गौरव-शालिनी है।

इस भूमिपर लतापर पुष्पके समान विदेह नामक देश है, जिसे आजकल विहार प्रदेश कहा जाता है। इस प्रदेशमें एक वैशाली नामकी कमनीय विशाल नगरी थी, जो लोकातिशायिनी कमनीयताके कारण साक्षात् अमरावती ही जान पड़ती थी। चेटक नामक गणराज्याध्यक्ष इसके वैभव-कालके शासक थे। इसी नगरीके क्रोड़में एक कुण्डग्राम नामक राज्य था, जो अपने ऐश्वर्यके लिए देवलोकसे भी अधिक प्रसिद्ध था।

इस राज्यमें महाप्रतापी सिद्धार्थ नामके राजा राज्य करते थे; जो करुणाके सागर, अहिंसाके बल्लभ एवं धर्मके अवतार थे। गौरवमें हिमालयकी भाँति, गम्भीरतामें जलनिधिके तुल्य, स्निग्धता में नवनीतके समान और प्रतापमें दिनकर जैसे थे। दानशीलतामें तो वे अद्वितीय थे।

उनके शासनकालमें कलङ्क केवल चन्द्रमामें था। आलस्य हाथीकी चालमें था। कलह रतिकलामें होता था। क्षति नखोंकी होती थी। प्रवंचनाकी प्रवृत्ति मृगतृष्णाओंमें थी। नियमन दुराचारका होता था। कुटिलता कामिनियोंके कुन्तल-जालमें थी और कठोरता पाषाणखण्डोंमें पायी जाती थी।

उनकी त्रिशला नामकी एक रानी थी। ठीक उसी प्रकार, जिस प्रकार कामदेवकी रति, विष्णुकी लक्ष्मी और रामचन्द्रकी सीता थी। उसके अद्भुत सौन्दर्यको देखकर ऐसा लगता था कि मानो वह राहुसे डरी हुई कलाधरकी कला ही परित्राणके लिए धरातल पर उतर पड़ी हो, या साक्षात् सुन्दरता ही सुवर्णकी कान्ति, चम्पकका सौरभ और अमृत-का माधुर्य लेकर मूर्तिमती हो गयी हो। राजा यदि मूर्त अनुराग था, तो वह देहधारिणी ममता थी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चक्रवाक-चक्रवाकी एवं चन्द्र-चन्द्रिकाकी भाँति उन दोनोंका शाश्वतिक साहचर्य था। सम्पन्न होनेपर भी वे दोनों अपने जीवनको पुत्रके मुख-कमलके बिना फलहीन वृक्षकी भाँति, जलरहित सरोवरके समान और पुष्पविहीन उद्यानके तुल्य तुच्छ समझते थे।

सोलह स्वर्गोंमें एक सौधर्म नामक स्वर्ग है। वैज्ञानिकोंको आज-तक भी वह ज्ञात नहीं हो सका है। अनवरत अनुसन्धानसे भी उसका पता लगाना सम्भव नहीं है। उस सुरलोकके निवासी देवताओंका समग्र जीवन भोगोंसे परिपालित एवं अर्थोपार्जनकी चिन्ताओंसे निर्मुक्त है। वे देवगण निरन्तर अप्रतिहत गतिसे निखिल ब्रह्माण्डका परिभ्रमण करते रहते हैं। सर्वाङ्ग सुरम्य सुन्दरियोंके साथ गिरि-काननोंमें निधुवन-क्रीड़ाका आनन्द लेते हैं। खिले हुए कमलके नयनोंवाली, फेनपुञ्जरूप निर्मल हास्य-विलाससे युक्त, शैवालजालके रूपमें कुन्तल-कलापको धारण करती हुई स्वर्गगङ्गा नायिकाकी भाँति जिसका आलिङ्गन किये हुए है। अवगाहन-निरत ललनाओंके स्तनतटके आघातसे उसकी तरंगे जर्जरित होती रहती हैं।

सौधर्मेन्द्र सुरपति उस स्वर्गके सर्वप्रिय शासकके रूपमें प्रख्यात हैं। उन्होंने किसी समय अवधिज्ञानके बलसे अच्युतेन्द्रकी वयःसमाप्तिको जान लिया और यह भी ज्ञात कर लिया कि छः मासके पश्चात् ये देवदेह-को त्यागकर भारतवर्षमें अन्तिम तीर्थङ्करके रूपमें अवतीर्ण होंगे।

इस प्रकार विचारकर इन्द्रने अपने परममित्र कुबेरको आमन्त्रित किया और कहा—मित्रवर! आपको बुलानेका एक विशेष कारण है। आपकी कार्यकुशलता एवं नैतिकतापर मुझे पूर्ण विश्वास है। आशा है आप मेरे वचनको गुरुतर भारके रूपमें ग्रहण नहीं करेंगे। सुर-लोकके श्रृङ्गारस्वरूप ये अच्युतेन्द्र छः मासतक ही यहाँ विराजमान रहेंगे। उसके पश्चात् ये वसुन्धरापर स्वनामधन्य सिद्धार्थकी धर्मपत्नी त्रिशलाके गर्भसे अवतार ग्रहण करेंगे। इनके अवतार लेते ही समग्र भूमण्डलपर अहिंसाको पताका फहरा उठेगी। अतः आप शीघ्रातिशीघ्र धरातलपर उतरें तथा नरपति सिद्धार्थके प्राङ्गणमें रत्नवृष्टि प्रारम्भ कर दें। इससे वहाँ जिनेन्द्रके अवतारकी वार्तासे सब लोग अवगत हो जायेंगे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इन्द्रकी आज्ञाको पुष्पमालाकी तरह सिरपर धारणकर कुबेरने प्रचुर रत्नराशि लेकर द्रुत गतिसे कुण्डग्रामकी ओर प्रस्थान किया। सिद्धार्थके राजभवनकी शोभा देखते ही बनती थी। राजभवनके द्वारदेशपर शुभ्र वस्त्रधारी द्वारपाल मूर्तिमान् आदेशकी भाँति स्थित थे। एक ओर गगनचुम्बी क्रीड़ापर्वत बने हुए थे, जिनके शिलाखण्ड, संचरण करती हुई वधुओंके लाक्षारागसे रञ्जित दिखायी पड़ रहे थे। शिखरों-पर मँडराते हुए मेघोंकी यवनिकाके भीतर कन्दराओंमें किन्नरोंके जोड़े निधुवन-क्रीडामें निमग्न थे। भवनका भीतरी भाग मदमत्त मातङ्गोंसे सङ्कुल था। वे गन्धगज देदीप्यमान दन्तयुगलके कारण विद्युत्के विलाससे मण्डित बलाहकोंके समान प्रतीत हो रहे थे। एक ओर केशर-कलापसे मण्डित तुरंग सिंहोंकी तरह सुशोभित हो रहे थे। न्याया-धिष्ठानमें धर्माधिकारी विविध विषयोंपर निर्णय दे रहे थे। सिरपर पहनी हुई सफेद पगड़ीके कारण वे चन्द्रबिम्बसे बिम्बित उदयाचलके शिखरगणके समान दिखायी पड़ते थे। अन्तःपुरके प्रांगणमें राजकन्याएँ कन्दुकक्रीड़ामें व्यस्त थीं। क्रीड़ाके आवेगसे जिनके बिखरे हुए केश-पाश उभरे उरोजोंपर ठीक उसी प्रकार मँडरा रहे थे, जिस प्रकार खिले हुए कमलोंपर भौंरे विचरते हैं। कहीं कवि-गोष्ठी हो रही थी, तो कहीं संगीत-समारोह। इधर-उधर जाते हुए कुब्ज, किरात, वधिर, वामन एवं मूकजनोंसे सारा मार्ग व्याकीर्ण हो चुका था।

उस पवित्र राजभवनकी परिक्रमाकर कुबेरने रत्नवृष्टि प्रारम्भ कर दी। ऊपरसे गिरती हुई रत्नराशि ऐसी मालूम पड़ती थी, मानों जिनेन्द्रके आगमनके उपलक्ष्यमें सोपान-पंक्ति बन रही हो। धरित्रीकी प्रत्येक बाला हीरक-हारोंसे अलंकृत हो गयी।

उसी समय वर्षाकालके मेघ भी गगनमें मँडराने लगे। इन्द्रधनुष बार-बार जन्म लेकर ऐसा लग रहा था, मानो रतिसुखमें बाधक होनेके कारण प्रियतमके द्वारा फेंकी गयी किसी सुरांगनाकी करधनी हो या अभिसारिकाके चरणमें लगे लाक्षारागसे रञ्जित अभिसारमार्ग हो या बिजली एवं मेघका मंगलमय ग्रन्थि-बन्धन हो या कादम्बिनीका अनमोल बिम्बाधर हो। चारों ओर मँडराते हुए बादल ऐसे लग रहे थे, सम्भवतः वप्रक्रीड़ामें निमग्न हाथियोंका समूह हो, या रतिक्रीड़ाके आवेगसे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किसी तरुणीका खुला हुआ केशपाश हो, या किसी वियोगिनीके जलते हुए हृदयसे निकला हुआ धूम-समूह हो, या गगन-वल्लभके द्वारा खींचा गया वसुमति-मुग्धाका पयोधर-परिधान हो, या जीवनसंगीके द्वारा किये गये नखक्षतोंको छुपानेके लिए पृथ्वीके द्वारा वक्षस्थलपर किया गया मृगमदका लेप हो। जलधरके क्रोड़में विलसती हुई बिजलीकी शोभा भी बड़ी निराली लगती थी, जैसे सघन अन्धकारमें कोई अभिसारिका अपने प्राणपतिके पास जा रही हो, या नीलमके भवनमें कोई नर्तकी नृत्य कर रही हो, या किसी मुग्धाकी स्मितिरेखा हो, या प्राणवल्लभकी खोजमें व्यस्त किसी विरहिणीके करकमलकी दीपिका हो, या रति-विमर्दित प्रमदाके वक्षस्थलसे गिरी हुई हारलता हो, या काव्यप्रणयनमें परायण कविकी लेखनी हो।

नरपति सिद्धार्थका हृदयदेश रससे आप्यायित हो उठा। वे अपने विलास-गृहमें प्रविष्ट हुए। विलास-भवन साक्षात् मदन-मन्दिर ही मालूम पड़ता था। उसका द्वारदेश हीरक-हारोंसे अलंकृत था। निर्दह्यमान अगरुधूपकी गन्धसे सम्पूर्ण कक्ष सुगन्धित हो रहा था। मधुकर-दम्पतिसे परिमृदित कुसुम-मालाएँ चारों ओर लटक रही थीं। पञ्जरजाल शुभ-सारिकाओंके रतिकलहसे कलकलायमान हो रहे थे। फुहारोंपर पड़ती हुई मणिकिरणोंसे अनेक इन्द्रधनुष बने हुए थे। वह प्रमोद-मन्दिर हिमालयके हृदयदेश या लक्ष्मीके प्रणयागारकी भाँति मालूम पड़ता था। उसमें नीलमणिसे बने हुए पर्यङ्कपर त्रिशला विराजमान थी, जो जलद-पटलमें विद्युतकी भाँति, गगनदेशमें चन्द्रिकाके समान एवं वनप्रान्तमें बहती हुई नदीके तुल्य सुशोभित हो रही थी। रत्नखचित भित्तिभागमें जिसके प्रतिबिम्बोंको देखकर ऐसा लगता था, मानो सुराङ्गनाएँ ही ईर्ष्यापूर्वक उसका अवलोकन कर रही हों। वह नख-पंक्तिकी किरणोंके व्याजसे हृदयका समुत्कट अनुराग प्रकट कर रही थीं। अपने दीर्घ कटाक्षोंसे समग्र कक्षको नीलोत्पल-कानन जैसा बना देती थीं। लावण्य-जलनिधिमें निमग्न सम्राज्ञी केवल कुचकुम्भके बलसे तैर रही थी। उसकी स्मित रेखासे दिग्मण्डल धवलित हो रहा था। त्रिवली ऐसी जान पड़ती थी, मानों हरहुताशनसे सन्तप्त एवं नाभि-सरोवरमें समवतरणशील कामदेवके लिए सोपानपंक्ति बनी हो।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वह परिपूर्ण सुधाकरके तुल्य मुख-मण्डलसे शरत्सुन्दरी जैसी मालूम पड़ती थी।

उसने झटसे उठकर कामदेवके समान आते हुए प्रियतमका अभिनन्दन किया। राजाने उसकी काँपती हुई देहलताका मधुर आंलिगन कर लिया। चिरकाल तक स्नेहक्रीड़ा करनेके पश्चात् दोनों प्रगाढ़ निद्रामें निमग्न हो गये।

उसी समय अच्युतेन्द्र स्वर्गको छोड़कर धरित्रीकी ओर चले। इधर त्रिशला गाढ़ निद्रामें सो रही थी। सुप्तावस्थामें उसे सोलह स्वप्न दिखायी पड़े। उसने क्रमशः ऐरावत हाथी, वृषभ, सिंह, लक्ष्मी, दो हार, चन्द्रमण्डल, सूर्य, मीनयुग, सुवर्णके दो कलश, निर्मल सरोवर, समुद्र, सिंहासन, विमान, नागेन्द्र भवन, रत्नराशि, धूमरहित अग्निको देखा। सबसे पहले दिखायी पड़ने वाला ऐरावत हाथी उसके मुँहमें प्रविष्ट हो गया। वह वास्तवमें भावी तीर्थङ्करका गर्भमें प्रवेश था।

रात्रि व्यतीत हुई। श्रीमती उषादेवीने जँभाई ली। वह उस समय प्राची-माताकी गोदमें बैठी हुई कन्याकी तरह बड़ी ही सुन्दर लग रही थी, मानों प्रियतमसे चुम्बित कपोलभागका प्रक्षालन करती हुई कोई सुराङ्गना हो, या गगनके शस्यक्षेत्रसे नक्षत्र-विहगोंको भगाती हुई कोई कृषककन्या हो, या प्राणवल्लभसे आश्लिष्ट देवललनाके द्वारा नक्षत्र-दीपकोंपर फेंकी गयी कुङ्कुमराशि हो, या प्रवासी पतिके चित्र-निर्माणमें परायण कोई प्रेमिका हो, या गगन-सरोवरमें तिरती हुई राजहंसी हो, या मुमुक्षुओंके लिए तिमिरविहीन मोक्षकी सरणि हो, या किसी सुरदम्पतीकी रतिशय्या हो, या सूर्यसे खींची गयी किसी देव-कन्याके जघनदेशकी साड़ी हो, या कविकी शृङ्गाररसस्यन्दिनी कविता हो। गगन-सिन्धुमें नक्षत्रोंके मोतियोंको कवलित करते हुए मराल-कुल-नायकके समान दिवाकर उदयाचलपर आरूढ़ हो गया। मलयानिलके सुस्पर्शसे रोमाञ्चित होकर लताएँ नाचने लगीं। कुलवधुएँ अपने कोमल कपोल एवं वक्षस्थलपर प्रियतमके द्वारा किये गये चीन्होंको छिपाती हुई निधुवन-शय्याको छोड़ने लगीं। कविजन काव्यनिर्माणमें एवं गृहस्थ गृहकार्यमें दत्तचित्त हो गये।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इधर परिचारिकाओंकी गीत-ध्वनिको सुनकर त्रिशला जाग उठी। उसने स्नानका कार्य भी पूरा कर लिया और थोड़ी देर देवार्चना करनेके बाद वह सज्जाकक्षमें प्रविष्ट हो गयी। वहाँ उसने सभामण्डप में जाने योग्य वेश धारण किया। सुसज्जित होकर वह अपने स्वप्न-वृत्तान्तसे महाराजको अवगत करानेके लिए सभास्थानकी ओर चल पड़ी।

